अन्यत्रभी कहा है जो, इस संसारका कोई यथेच्छासे कर्त्ता नहीं है, क्योंकि, कुम्भकारके कार्य्यमें उसप्रसंगका अन्यथाभाव दीखपडता है । और पुरुषने क्या तुमको और सूत्रधरादिको एकत्र समवेत करके इस त्रिभुवनकी सृष्टिकरलियी है ? ॥ २३ ॥

तस्मात् प्रागुक्तकारणत्रितयबलादावरणक्षये सार्वज्ञ्यं युक्तम् । न चास्योपदेष्ट्रन्तराभावात् सम्यग्दर्शनादित्रितयानुपपत्तिरिति भणनीयं पूर्वसर्वज्ञप्रणीतागमप्रभवत्वादमुष्यशेषार्थज्ञानस्य । न चान्योन्याश्रयतादिदोषः आगमसर्वज्ञपरम्पराया बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम् ॥ २४ ॥

इसकारण पूर्व्वकथित कारणत्रये प्रभावसे आवरण एक कालीनक्षय होनेपर जीवकी सर्वज्ञता युक्तहोजाती है । इस जीवका दूसरा कोई उपदेष्टा नहीं । सुतरां, उसका सम्यग्दर्शनादि त्रितयकी अनुपपत्ति होसकती है, ऐसाभी नही कहा जा सकता । क्योंकि, जो जीव प्रथम सर्वज्ञ हुआ था । उसका प्रणीतआगम होनेसे इसका इसप्रकार सर्व्वज्ञत्व समुद्भूत हुआ है । इसविषयमें अन्योन्याश्रयता आदिदोष नहीं हो सकता । क्योंकि, बीज और अंकुरकी नाई आगम सर्वज्ञ परम्परा अनादि कहकर परिगृहीत होता है ॥ २४ ॥

रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादित्रितयमर्हत्प्रवचनसंग्रहपरे परमागमसारे प्ररूपितं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति । विवृत च योगदेवेन येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेणार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यपरपर्य्यायं श्रद्धानं सम्यग्दर्शनं तथा च तत्त्वार्थसूत्रं तत्त्वार्थ श्रद्धानं सम्यग्दर्शनमिति ॥ २५ ॥

जो सम्यक् दर्शनादि त्रितय रत्नत्रयपदवेदनीय रूपसे प्रसिद्ध है । वह अर्हत प्रवचन संग्रहविषयक परमागमसारनामक ग्रंथमें विशेषरूपसे विवृत हुआ है । उसमें

लिखा है जो सम्यग् दर्शन, ज्ञान और चरित्र येही तीन साक्षात् मोक्षमार्ग हैं । योगदेव कर्तृक यह भी कहा गया है, जिसप्रकार जीवादि विषयोंकी व्यवस्थापना कियी है, अर्हत कर्तृक उसीप्रकार तत्त्वार्थ प्रतिपादित हुआ है । इसी तत्त्वार्थमें विपरीत अभिनिवेश त्यागादि पूर्व्वक श्रद्धानको सम्यग् दर्शन कहते हैं । तथा हि तत्त्वार्थसूत्र, तत्त्वार्थमें श्रद्धा नही संम्यग् दर्शन है ॥ २५ ॥

अन्यदपि—

रुचिर्जिनोक्ततत्त्वेषु सम्यक् श्रद्धानमुच्यते ।
जायते तन्निसर्गेण गुरोरधिगमेन वेति ॥ २६ ॥

अन्य प्रकारभी कहा है । जैसः—जिनने जो तत्त्वनिर्देश किया है, उसमें जो सम्यक् प्रकार रुचि है, उसीका नाम श्रद्धान है । निसर्ग एवं गुरुका अधिगम, इन्हीं दो उपायोंसे उत्पन्न होता है ॥ २६ ॥

परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः । व्याख्यानादिरूपपरोपदेशजनितं ज्ञानमधिगमः । येन स्वभावेन जीवादयः पदार्थाः व्यवस्थिताः तेन स्वभावेन मोहसंशयरहितत्त्वेनावगमः सम्यग्ज्ञानम् ॥ २७ ॥

उसमें, परका उपदेश निरपेक्ष आत्मस्वरूपको निसर्ग कहते हैं । और व्याख्यानादि रूप, [illegible] ज्ञानका नाम अधिगम है । एवं जिस स्वभावसे जीवादि पदार्थ सब व्यवस्थित, उसी स्वभावके बल मोह और संशय रहित होनेपर, जो अवगम लाभ होता है, उसका नाम सम्यग् ज्ञान है ॥ २७ ॥

यथोक्तम्—

यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा ।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीपिण इति ॥ २८ ॥

उसी प्रकार कहा है जैसे—यथावस्थित तत्त्व सबका संक्षेप वा विस्तार क्रमसे अवबोध, अर्थात् परिज्ञात होनेहीको मनीपिगण सम्यग्ज्ञान नामसे निर्देश करते है ॥ २८ ॥

तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्य्यायकेवलभेदेन । तदुक्तम्, मतिश्रुतावधिमनःपर्य्यायकेवलानि ज्ञानमिति । अस्यार्थः ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य व्यापृतः सन् यथार्थं मनुते मतिः । ज्ञानावरणक्षयोपशमे सति

मतिजनितं स्पष्टं ज्ञानं श्रुतम् । असम्यग्दर्शनादिगणजनितक्षयोपशमनिमित्तम् अवच्छिन्नविषयं ज्ञानमवधिः । ईर्ष्यान्तरायज्ञानावरणक्षयोपशमे सति परमनोगतस्यार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनःपर्य्यायः । तपःक्रियाविशेषान् यदर्थं सेवन्ते तपस्विनस्तज्ज्ञानासंस्पृष्टं केवलम् । तत्राद्यं परोक्षं प्रत्यक्षमन्यत् ।

तदुक्तम्—

विज्ञानं स्वपराभासि प्रमाणं बाधवर्जितम् ।
प्रत्यक्षञ्च परोक्षञ्च द्विधा मेयविनिश्चयादिति ॥ २९ ॥

यह ज्ञान पाँच प्रकारका है यथा मति श्रुति अवधि मनः पर्य्याय और केवल उसमें ज्ञानावरणका अधिक क्षय होनेपर मन जिसको यथार्थ मनन करता है उसका नाम मति है। ज्ञानावरणका क्षयोपशम होनेपर मतिजनित स्पष्ट ज्ञानका नाम श्रुति है । असम्यग् दर्शनादि गणजनित क्षयोपशम निमित्त जो अवच्छिन्न विषयके ज्ञान उसका नाम अवधि है। ईर्ष्यान्तरमें ज्ञानावरणका चूडान्तक्षय होनेपर, परका मनोगत विषयका जो सुस्पष्ट परिच्छेदक ज्ञान उत्पन्न होता है. उसका नाम मनका पर्य्यय है । और, तपस्विलोग जिस लिये तपःक्रिया विशेषकी सेवा करते हैं, एवं जिसमे अन्य विधज्ञानका संस्पर्शमात्र नही, तादृश ज्ञानका नाम केवलहै । उसमें प्रथमको परोक्ष और अपरको प्रत्यक्ष कहते है वह कहा गया है जैसे—जो अपनेको एव अन्यको विशेषरूपसे प्रतिपादित करता, वही बाधावर्जितज्ञानही प्रमाण है । वह दो प्रकारका प्रत्यक्ष एवं परोक्ष ॥ २९ ॥

अन्तर्गणिकभेदस्तु सविस्तरस्तत्रैवागमेऽवगन्तव्यः । संसरणकर्मोच्छित्तावुद्यतस्य श्रद्धधानस्य ज्ञानवतः पापगमनकारणक्रियानिवृत्तिः सम्यक्चारित्रम् । तदेतत् सप्रपञ्चमुक्तमर्हता ॥३०॥

इसमे जो अवान्तरभेद है. उसे उसीशास्त्रमें सविस्तर जानना चाहिये जिसके द्वारा बारा-बारबा जाना आना होता है. वैसे कर्मको उच्छेदनमें समुद्यत, श्रद्धाशील ज्ञानवान् पुरुषके पापतत्पके हेतुभूत क्रियाकी निवृत्तिको सम्यक्चारित्र कहते हैं । अर्हन्ने उसको सविस्तर निर्देश किया है ॥ ३० ॥

सर्वथावद्ययोगानां त्यागश्चारित्रमुच्यते ।
कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा ।
अहिंसासूनृतास्तेयब्रह्मचर्य्यापरिग्रहाः ॥ ३१ ॥

जैसे—विगर्हित विषय संसर्गका सर्वतो भावसे परिहारको चारित्र कहते हैं । यह चारित्र अहिंसादि व्रत भेदसे ५ प्रकारका है । जैसे, अहिंसा, सूनृत, अस्तेय, ब्रह्मचर्य्य, और अपरिग्रह ॥ ३१ ॥

न यत् प्रमादयोगेन जीवितव्यपरोपणम् ।
चराणां स्थावराणाञ्च तदहिंसाव्रतं मतम् ॥ ३२ ॥

उनमें प्रमादवशात्भी स्थावर जङ्गम पदार्थोंके हानि न करनेको अहिंसा व्रत कहतेहैं ॥ ३२ ॥

प्रियं पथ्यं वचस्तथ्यं सूनृतं व्रतमुच्यते ।
तत्तथ्यमपि नो तथ्यमप्रियञ्चाहितञ्च यत् ॥ ३३ ॥

प्रिय, हित और सत्य वाक्यका नाम सूनृत व्रत है । जिसमें लोककी अप्रतीति, और अहित उत्पन्नहो, वैसा वाक्य उसप्रकार होनेपरभी तथ्य नही ॥ ३३ ॥

अनादानमदत्तस्यास्तेयव्रतमुदीरितम् ।
बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते ॥ ३४ ॥

विना आज्ञा किसीके द्रव्य न लेनेका नाम स्तेय व्रत कहते हैं ॥ ३४ ॥

दिव्योदरिकक्कामानां कृतानुमतकारितैः ।
मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम् ॥ ३५ ॥

मनद्वारा, वाक्यद्वारा, और शरीरद्वारा दिव्य और औदयिक कर्म्मोंके त्याग करनेका नाम है । वह १८ प्रकारका है ॥ ३५ ॥

सर्वभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः ।
यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः ॥ ३६ ॥

सब विषयोंके प्रभाव घटनेपरभी उसके लिये मूर्च्छा अर्थात् मोह किसीप्रकार आविष्कार न होनेको अपरिग्रह व्रत कहते हैं । इसप्रकार अभाव होनेपर मूर्च्छा उपस्थित होनेसे चित्त विप्लव संघटित होजाता है ॥ ३६ ॥

भावनाभिर्भावितानि पञ्चभिः पञ्चधा क्रमात ।
महाव्रतानि लोकस्य साधयन्त्यव्ययं पदमिति ॥ ३७ ॥

उल्लिखित महाव्रत सब यथा क्रमसे पांचप्रकारके भावनाद्वारा भावित होनेपर लोगोंको अव्ययपद संसाधित करते हैं ॥ ३७ ॥

भावनापञ्चकप्रपञ्चनञ्च प्ररूपितम्--
हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम् ।
आलोच्य भाषणेनापि भावयेत् सूनृतं व्रतमित्यादिना॥३८॥

पांचप्रकारकी भावनाओंका सविस्तर वर्णन किया है । जैसे, हास्य, लोभ, भय, और क्रोध इनका प्रत्याख्यान और भाषण, इत्यादि सहायमें आलोचना करके निरन्तर सूनृत व्रतमें भावना करे ॥ ३८ ॥

एतानि सम्यग्दर्शनज्ञानचारित्राणि मिलितानि । मोक्षकारणं न प्रत्येकं यथा रसायनज्ञानं श्रद्धानावरणानि सम्भूय रसायन-फलं साधयन्ति न प्रत्येकम् ॥ ३९ ॥

उल्लिखित सम्यग्दर्शन, सम्यग्ज्ञान, और सम्यग्चरित्र परस्पर मिलकर मोक्ष समुद्भावन करता है । नहीं मिलनेसे एकाकी मोक्षसाधनमें असमर्थ होता है । जिसप्रकार रसायनज्ञान, श्रद्धान और आवरण ये सब मिलकर, रसायन फल साधन करते हैं, परन्तु--एक २ नहीं करसकता ॥ ३९ ॥

अत्र संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वे स्तः । तत्र बोधात्मको जीवः, अबोधात्मकस्त्वजीवः । तदुक्तं पद्मनन्दिना ।
चिदचिद्द्वे परे तत्त्वे विवेकस्तद्विवेचनम्--
उपादेयमुपादेयं हेयं हेयञ्च कुर्वतः ॥ ४० ॥

इसमें सक्षेप विधानमें जीव और अजीव नामक दोप्रकारका तत्त्व सन्निविष्ट हुआ है । उसमें बोधात्मक जीव, और अबोधात्मक अजीव है । सो पद्मनन्दीने कहा है:--जैसे चिन्त और अचिन्त भेदसे परमतत्त्व दो प्रकारका है । जो उपादेय है उसका ग्रहण एवं जो हेय है उसका परिहार पूर्वक उल्लिखित दो प्रकारके तत्त्वोंकी विवेचना अर्थात् सविशेष विचार करनेहीका नाम विवेक है ॥ ४० ॥

हेयं हि कर्तृरागादि तत कार्य्यमविवेकिनः ।
उपादेयं परं ज्योतिरुपयोगैकलक्षणमिति ॥ ४१ ॥

हेय शब्दसे कर्त्ताका रागादि समझना चाहिये । यह रागादि अविवेकी कार्य्य है । जो उपादेय है, वही परंज्योतिका एकमात्र लक्षन है ॥ ४१ ॥

सहजचिद्रूपपरिणतिं स्वीकुर्वाणज्ञानदर्शने उपयोगः । सपरस्प-रप्रदेशात्तु प्रदेशबन्धात् कर्मणैकीभूतस्यात्मनोऽन्यत्वप्रतिपत्ति-

कारणं भवति। सकलजीवसाधारणं चैतन्यमुपशमक्षयक्षयो-पशमवशादौपशमिकक्षयात्मकक्षयौपशामिकभावेन कर्मोदयव-शात् कलुषान्याकारेण च परिणतजीवपर्य्यायजीवाविवक्षायां स्वरूपं भवति॥ ४२॥

उनमें सहज चिद्रूप परिणति स्वीकार करनेपर, ज्ञानदर्शनमें जो उपयोग अर्थात् अधिकार उत्पन्न होता है, उसीको कर्म्मके साथ एक होकर आत्माकी अन्यत्व प्रतिपत्तिका हेतुभूत लक्षण कहते हैं। और सब जीव साधारण चैतन्य ही उपशमक्षय और क्षयोपशमन वशसे उपशमक क्षयात्मक और क्षयोपशमिक इन दो प्रकारके भाव सहायसे कर्म्मोदय प्रयुक्त कलुषरूप अन्य आकारस्वरूपमें परिणत होता है॥ ४२॥

यदवोचद्वाचकाचार्य्यः--औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य सत्त्वमौदयिकपारिणामिकौ चेति। अनुदयप्राप्तिरूपे कर्मण उपशमे सति जीवस्योत्पद्यमानो भावः औपशमिकः। यथा पङ्के कलुषतां कुर्वन्ति कतकादिद्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता। कर्मणः क्षयोपशमे सति जायमानो भावः क्षयिकः। यथा मोक्षः। उभयात्मा भावो मिश्रः। यथा जलस्यार्द्धस्वच्छता। कर्मोदये सति भवन् भाव औदयिकः। कर्मोपशाद्यनपेक्षः सहजो भावश्चे तनत्वादिः पारिणामिकः। तदेतत् सत्त्वं यथासम्भवं भव्यस्याभव्यस्य वा जीवस्य तत्त्वं स्वरूपमिति सूत्रार्थः॥ ४३॥

वाचकाचार्य्यने कहा है, जीवका औपशमिक, क्षायिक, मिश्र, औदयिक, और पारिणामिक इन पांचप्रकारके भावका नाम सत्त्व है। उनमें कर्म्मका अनुदय प्राप्तिरूप उपशम घटनेपर; जीवके उत्पद्यमान भावको औपशमिक कहते हैं। जिसप्रकार पङ्क कलुषत्व सम्पादन पूर्वक निर्म्मल्यादि द्रव्यसम्बन्ध वशतः अधःपतित होनेपर जलकी स्वच्छता संघटित होती है। कर्म्मके क्षयोपशम होनेपर, जीवके जायमान भावको क्षायिक कहते हैं। जिसप्रकार मोक्ष। इसप्रकार उभयात्मक भावको मिश्र कहते हैं। जिसप्रकार जलकी अर्द्धस्वच्छता। कर्म्मके उदय होनेपर जिसभावका आविर्भाव होता है उसका नाम औदयिक है। और कर्म्मकी उपशमादिकी अपेक्षा परिहार कर, जो सहज भावका आविष्कार होता है उसका नाम पारिणामिक है। चेतनत्वादि इसभावमें अन्तर्निविष्ट है। इसीका नाम सत्त्व

है। अर्थात् यथासम्भव भव्य और अभव्य जीवका तत्त्व या स्वरूप है । यही सूत्रका अर्थ है ॥ ४३ ॥

तदुक्तम् स्वरूपसम्बोधने-

ज्ञानाद् भिन्नो न चाभिन्नो भिन्नाभिन्नः कथञ्चन ।
ज्ञानं पूर्वापरीभूतं सोऽयमात्मेति कीर्तित इति ॥ ४४ ॥

रूप सम्बोधनमें कहा है कि जैसे:—जो ज्ञानसे भिन्न नही. अभिन्न और जो किसीप्रकार भिन्न वा अभिन्न भी है तो उसको आत्मा कहते हैं । यही आत्मा पूर्व्वापरिभूत ज्ञान स्वरूप है ॥ ४४ ॥

ननु भेदाभेदयोः परस्परपरिहारेणावस्थानादन्यतरस्यैव वास्तवत्वादुभयात्मकमयुक्तमिति चेत्तदयुक्तं बाधे प्रमाणाभावात् । अनुपलम्भो हि बाधकं प्रमाणं न सोऽस्ति समस्तेषु वस्तुष्वनेकरसात्मकत्वस्य स्याद्वादिनो मते सुप्रसिद्धत्वादित्यलम् ॥ ४५ ॥

यदि कहो, भेद और अभेद ये परस्पर परिहार कर अवस्थान करते हैं । इसलिये इनमें अन्यतरका वास्तवत्त्व कहनेसे उभयात्मकत्व कहना सङ्गत नही होसकता, यह सत्य तो है । किन्तु बाध विषयमें प्रमाण कह अभाववशतः यह सर्वथा अयुक्त है । अनुपलम्भ ही बाधक प्रमाण है । यहां वह नहीं है । सब ही वस्तुमें अनेक रसात्मकताका अनुपलम्भ होता है । अर्थात् किसी वस्तुमें अनेक रस रहनेपर भी एक समयमे इन अनेक रसोंकी प्रतीति नही होती । अतएव ये अनेक रस-आत्मामें ज्ञानका भेदाभेद वादीके मतमें भी प्रसिद्ध ही है ॥ ४५ ॥

अपरे पुनर्जीवाजीवयोरपरं पञ्चमाचक्षते जीवाकाशधर्माधर्मपुद्गलास्तिकायभेदात् । एतेषु पञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया स्थितिव्यपदेशः, अनेकप्रदेशत्वेन शरीरवत् कायव्यपदेशः । तत्र जीवा द्विविधाः, संसारिणो मुक्ताश्च । भवाद्भवान्तरप्राप्तिमन्तः संसारिणः । ते च द्विविधाः, समनस्का अमनस्काश्च । तत्र संज्ञिनः समनस्काः, शिक्षाक्रियालापग्रहणरूपा संज्ञा तद्विधुरास्त्वमनस्काः । ते चामनस्का द्विविधाः, त्रसस्थावरभेदात् । तत्र द्वीन्द्रियादयः शङ्खगण्डोलकप्रभृतयश्चतुर्विधा-

स्त्रयाः, पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः तत्र मार्गगतधूलिः पृथिवी, इष्टकादिः पृथिवीकायः, पृथिवी कायत्वेन येन गृहीता स पृथिवीकायकः, पृथिवीं कायत्वेन यो ग्रहीष्यति स पृथिवीजीवः । एवमबादिष्वपि भेदचतुष्टयं योज्यम् । तत्र पृथिव्यादि कायत्वेन गृहीतवन्तो ग्रहीष्यन्तश्च स्थावरा गृह्यन्ते न पृथिव्यादिपृथिवीकायादयः तेषां जीवत्वात् । ते च स्थावराः स्पर्शनैकेन्द्रियाश्च भवान्तरप्राप्तिविधुरा मुक्ताः धर्माः धर्माधर्माकाशास्तिकायास्ते एकत्वशालिनो निष्क्रियाश्च द्रव्यस्य देशान्तरप्राप्तिहेतुः ॥ ४६ ॥

कोई २ जीव और अजीव दोनोंका अन्यविध प्रपञ्च वर्णन करते हैं, जैसे जीव, आकाश, धर्म्म, अधर्म्म, पुद्गल, और अस्तिकाय येही पांच तत्त्व कालत्रय सम्बन्धी हैं । सुतरां इनकी जिस प्रकार स्थिति है, कहा जाता है, उसीप्रकार अनेक प्रदेशविशिष्ट कहकर, जीव की नाई इनका कार्यभी है, कहा जासकता है । उनमें जीव दोप्रकारका है, संसारी और मुक्त । जो लोग जन्मके बाद जन्म लेते हैं, उन लोगोंको संसारी कहते हैं । ससारी [illegible] के हैं समनस्क और अमनस्क । उनमें जो लोग संज्ञाविशिष्ट हैं, उनको समनस्क [illegible] हैं । यहां संज्ञा शब्दसे शिक्षा, क्रिया, आलाप. और ग्रहण होता है । जिनकी सञ्ज्ञा [illegible] उनको अमनस्क कहते हैं । अमनस्क और भी दोप्रकारका है । जैसेः— त्रय और [illegible]थावर । उनमें, उनको दो तो इन्द्रिय हैं, तादृश शङ्ख और गण्डोलक प्रभृति चारप्रकारके प्राणीको " त्रय " कहते हैं । और पृथिवी, जल, तेज, वायु और वनस्पति ये सब स्थावर नामसे परिगणित हैं । उनमें मार्गके धूलिका नाम पृथिवी है, और इष्टकादि पृथिवीका शरीर है । जिनने पृथिवीको कायरूपमें ग्रहण किया है, उसका नाम पृथिवीकायक है । और जो पृथिवीको कायत्वसे ग्रहण करेगा, उसको पृथिवीजीव कहते हैं । इन्हीं जल प्रभृति अवशिष्ट पदार्थोंमे भी चार भेदोंकी योजना होसकती है । जैसेः—जल, जलकाय, जलकायक और जलजीव इत्यादि । उनमें, जिन लोगोंने पृथिव्यादिको कायरूपसे ग्रहण किया है, और जो करेंगे, वे लोग स्थावर रूपसे परिगृहीत होते हैं । पृथिव्यादि और पृथिवीके कायादि जीव कहकर स्थावर सब स्पर्शनरूप एकमात्र इन्द्रियविशिष्ट उनकी जन्मान्तर प्राप्ति नहीं होती । इस कारण वे लोग मुक्त हैं । उनका धर्म्माधर्म्म आकाश और अस्तिकाय है, वे लोग एकत्व सम्पन्न और क्रियाहीन एवं द्रव्यकी देशान्तर प्राप्तिका कारण है ॥ ४६ ॥

तत्र धर्माधर्मौ प्रसिद्धौ आलोकेनाविच्छिन्ने नभसि लोकाकाशपदवेदनीये सर्वत्रावस्थितिगतिस्थित्युपग्रहो धर्माधर्मयोरुपकारः, अत एव धर्मास्तिकायः प्रवृत्त्यनुमेयः अधर्मास्तिकायः स्थित्यनुमेयः । अन्यवस्तुप्रदेशमध्येऽन्यस्य वस्तुनः प्रवेशोऽवगाहः तदाकाशकृत्यम् । स्पर्शरसवर्णवन्तः पुद्गलाः । ते च द्विविधाः,अणवः स्कन्धाश्च।भोक्तुमशक्त्या अणवः।द्व्यणुकादयः स्कन्धाः । तत्र द्व्यणुकादिस्कन्धभेदादण्वादिरुत्पद्यते, अण्वादिसङ्घातात् द्व्यणुकादिरुत्पद्यते। क्वचिद्भेदसंघाताभ्यां स्कन्धोत्पत्तिः, अतएव पूरयन्ति गलतीति पुद्गलाः । कालस्यानेकप्रदेशत्वाभावेनाऽस्तिकायत्वाभावेऽपि द्रव्यत्वमस्ति तल्लक्षणयोगात् ॥ ४७ ॥

उनमें धर्माधर्म्मके करनेकी आवश्यकता नहीं । वह प्रसिद्ध ही है । जो लौकिक आकाश शब्दसे परिज्ञात है, एवं जो आलोकद्वारा विच्छिन्न नही होता । उसी नभोमण्डलमें सर्व्वत्र अवस्थिति है इन तीन व्यापारोंका समाधान धर्म्माधर्म्मका उपकार । अर्थात् धर्म्माधर्म्मद्वारा यही उपकार लाभ होता है, जो, इसप्रकार सर्व्वत्र अवस्थानादि किया जासकता है । अतएव धर्म्मास्तिकाय प्रवृत्तिद्वारा अनुमेय । अर्थात् जिसस्थानमे प्रवृत्ति है, उसी स्थान मे धर्म्म है । अनुमान करना चाहिये । और जिसस्थानमे स्थिति है, अर्थात् प्रवृत्तिका अभाव है. उसी स्थानमें अधर्म्मास्तिकाय अर्थात् अधर्म्म है ~ नही धर्म्मका अभाव समझना होगा । अन्य वस्तुके प्रदेशमें अन्य वस्तुके प्रवेशको अवगाह कहते हैं । इसका नाम आकाशकृत्य अर्थात् आकाशका कार्य्य है । जिसमें स्पर्श. रस और वर्ण है. उनको पुद्गल कहते है । वे दोप्रकारके हैं. अणु और. स्कन्ध । उनमें जिनको भोग न किया जासके उनको अणु कहते है । और द्व्यणुकादिको स्कन्ध कहते हैं । उनमें. द्व्यणुकादि स्कन्ध भेद से अण्वादिकी उत्पत्ति होती है और अण्वादिकी संघातसे द्व्यणुकादि उत्पन्न होता है । या कहीं भेद और संघात दोनोंहीके योगसे स्कन्धकी उत्पत्ति होती है । इसी कारण, जो पूरण करना एवं गलितहो उसको पुद्गल कहते हैं कालके वह प्रदेशविशिष्टत्व न रहनेपर प्रयुक्त उसका अस्तिकायत्व न रहनेपरभी उसको द्रव्य नामसे निर्देश किया जासकता है । क्योंकि, उसमें द्रव्यका लक्षण है ॥ ४७ ॥

तदुक्तं गुणपर्य्यायवद्द्रव्यमिति । द्रव्याश्रया निर्गुणा गुणाः । यथा जीवस्य ज्ञानत्वादिसामान्यरूपाः पुद्गलस्य रूपत्वादि-

सामान्यस्वभावा धर्माधर्माकाशकायानां यथासम्भवं गतिस्थित्यवगाहहेतुत्वादिसामान्यानि गुणाः । तस्य द्रव्यस्योक्तरूपेण भवनमुत्पादः तद्भावः परिणामः पर्य्याय इति पर्य्यायाः । यथा जीवस्य घटादिज्ञानसुखक्लेशादयः पुद्गलस्य मृत्पिण्डघटादयः धर्मादीनां गत्यादिविशेषाः, अतएव षट् द्रव्याणीति प्रसिद्धिः ॥ ४८ ॥

इसी प्रकार—कहा है, जो गुण पर्याण विशिष्ट है, उसका नाम द्रव्य है । उसमें, जो द्रव्यके आश्रित और निर्गुण है; उसका नाम गुण है । जिसप्रकार, जीवका ज्ञानत्वादि सामान्यरूप गुण पुद्गलके रूपत्वादि सामान्य स्वभाव गुण है, और धर्म्माधर्म्म और आकाश और कायकी यथा सम्भव गति, स्थिति और अवगाहहेतुत्वादि सामान्यगुण उसी द्रव्यके उत्तररूपसे उत्पादन, परिणाम और पर्य्यायको पर्य्याय कहते हैं । इस कारण द्रव्य छः प्रकार कहकर प्रसिद्ध है ॥ ४८ ॥

केचन सप्त तत्त्वानीति वर्णयन्ति । तदाह जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षास्तत्त्वानीति । तत्र जीवाजीवौ निरूपितौ । आस्रवो निरूप्यते । औदारिकादिकायादिचलनद्वारेणात्मनश्चलनं योगपदवेदनीयमास्रवः । यथा सलिलावगाहिद्वारं नद्यास्रवणं कारणत्वादास्रव इति निगद्यते तथा योगप्रणाडिकया कर्मास्रवतीति स योग आस्रवः । यथा आर्द्रं वस्त्रं समन्ताद्वातानीतं रेणुजातमुपादत्ते तथा कषायजलार्द्र आत्मा योगानीतं कर्म सर्वप्रदेशैर्गृह्णाति । यथा वा निष्टप्तायःपिण्डे जले क्षिप्ते अम्भः समन्ताद्गृह्णाति तथा कषायोष्णो जीवो योगानीतं कर्म समन्तादादत्ते । कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः क्रोधो मानो माया लोभश्च । स द्विविधः शुभाशुभभेदात् । तत्राहिंसादिः शुभः काययोगः सत्यमितहितभाषणादिः शुभो वाग्योगः तदेतदास्रवभेदप्रभेदजातं कायवाङ्मनःकर्मयोगः स आस्रवः शुभः पुण्यस्य अशुभः पापस्येत्यादिना सूत्रसन्दर्भेण

ससंरम्भमभाणि । अपरे त्वेवं मेनिरे आस्रवयति पुरुषं विषये-ष्विन्द्रियप्रवृत्तिरास्रवः । इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान स्पृशद्रूपादिज्ञानरूपेण परिणामित इति ॥ ४९ ॥

कोई २ सातप्रकारके तत्त्व कहते हैं । जैसे जीव, अजीव, आस्रव, बन्ध, संवर, निर्जर और मोक्ष उनमें जीव और अजीवका स्वरूप पूर्वही निरूपित हुआ है इस समय आस्रव स्वरूपका व्याख्यान किया जाता है । औदयिकादि कायादिका चलनद्वारा आत्माका जो चलन होता है. जो योगशब्दसे प्रचलित होता है, उसका नाम आस्रव है । जिसप्रकार जलके चलनद्वारा नदीका चलन होता है । उसी चलनको कारणत्व वशात् आस्रव कहते है । उसीप्रकार योग प्रणाडीद्वारा कर्म्म सबका आस्रव अर्थात् स्वल न होता है । उसी योगको आस्रव कहते हैं । जिसप्रकार, भीगावस्त्र चारोंओरसे वायुवशात् आनीत रेणु समूहको ग्रहण करता है, उसीप्रकार कषाय जलसे आर्द्र होकर आत्मा योगबलसे मानीत कर्म्मको सर्व्व प्रदेशसे ग्रहण करता है । या जिसप्रकार अतिशय उत्तप्त लोहपिण्ड जलमे क्षिप्तहोनेपर सब ओरसे शीकर समस्त ग्रहण करते है, उसी प्रकार कषायोष्ण जीव योगानीत कर्म्म सब ओरसे ग्रहण किया जाता है । अर्थात् कुगति प्राप्तकर आत्माको हीनभावापन्न करते है, इसलिये इसका नाम कषाय है । क्रोध, लोभ, माया और मान इन सबको कषाय कहते हैं । कषाय दोप्रकारका है । जैसे:—शुभ और अशुभ । उनमे अहिंसादि शुभका योग एवं सत्य. मित और हित भाषणादि शुभ वाग्योग । दूसरे २ लोग यों कहते है जो. आस्रव शब्दसे इन्द्रिय प्रवृत्ति ग्रहण करना चाहिये । क्योंकि, इस पुरुषको आस्रवमें अर्थात् विषयमें गूढ आसक्त किया है । इसलिये इसका नाम आस्रव है । उसी प्रकार—पौरुष ज्योति इन्द्रियद्वारा ही विषय सब स्पर्शकर रूपादि ज्ञानरूपसे परि-णामित होता है ॥ ४९ ॥

मिथ्यादर्शनाविरतिप्रमादकषायवशाद्योगवशाच्चात्मा सूक्ष्मैक-क्षेत्रावगाहिनामनन्तानन्तप्रदेशानां पुद्गलानां कर्मबन्धयोग्याना-मादानमुपश्लेषणं यत् करोति स बन्धः । तदुक्तं, सकषायत्वा-ज्जीवः कर्मभावयोग्यान् पुद्गलानादत्ते स बन्ध इति तत्र कषाय-ग्रहणं सर्वबन्धहेतूपलक्षणार्थम् । बन्धहेतून् पपाठ वाचकाचार्य्यः मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतव इति मिथ्यादर्शनं द्विविधं मिथ्याकर्मोदयात् परोपदेशानपेक्षं तत्त्वाश्रद्धानं नैसर्गि-कमेकम् अपरं परोपदेशजम् । पृथिव्यादिषट्कापादानकं षाडि-

न्द्रियासंयमनञ्च अविरतिः । पञ्चसमिति गुप्तिष्वनुत्साहः प्रमादः । कषायः क्रोधादिः । तत्र कषायान्ताः स्थित्यनुभावबन्धहेतवः प्रकृतिप्रदेशबन्धहेतुर्योग इति विभागः ॥ ५० ॥

आत्मा मिथ्या दर्शन अविरति प्रमाद और कषायवशात एवं योगवशात् अनन्तानन्त प्रदेशविशिष्ट और कर्म्मबन्धके उपयोगी पुद्गल सबका जो परिग्रह और परिहार करते हैं। उसका नाम बन्ध है। सो कहा है, जैसेः—जीव कषायवशात् कर्म्मभाव योग्य पुद्गल सबको जो परिग्रह करते हैं, उसको बन्ध कहते हैं। यहां कषायशब्दसे जितने बन्धके हेतु हैं, जानना चाहिये वाचकाचार्य्यने इस प्रकार बन्ध हेतु सब निर्दिष्ट किया है । जैसेः—मिथ्यादर्शन, अविरति, प्रमाद और कषाय ये सब बन्धके हेतु हैं। मिथ्यादर्शन दोप्रकारका है। प्रथम मिथ्याकर्म्मके उदर वशसे परायेके उपदेशके व्यतिरेकसे समुद्र भूत तत्त्वाश्रद्धान है । यह नैसर्गिक है । द्वितीय परोपदेश जनिता पृथिवी प्रभृति छः उपदेशात्मक छः इन्द्रियका संयमन नहीं करनेका नाम अविरति है। पांच प्रकारकी समिति गुप्तिमें जो उत्साह विरह है, उसको प्रमाद कहते हैं। कषाय शब्दसे क्रोधादि उनमें मिथ्या दर्शनसे कषाय पर्य्यन्त ४ स्थिति और अनुभवसे बन्धका कारण है। और योग प्रकृति और प्रदेशके बन्धका हेतु है । यह विभाग है ॥ ५० ॥

बन्धश्चतुर्विध इत्युक्तं, प्रकृतिस्थित्यनुभावप्रदेशास्तु तद्विधय इति यथा निम्बगुडादेस्तिक्तत्वमधुरत्वादिस्वभावः एवमावरणीयस्य ज्ञानदर्शनावरणत्वमादित्यप्रभोच्छेदकाम्भोधरवत् प्रदीपप्रभातिरोधायककुम्भवच्च सदसद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलेहनवद्दर्शनमोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्जनसङ्गवच्चारित्रे मोहनीयस्यासंयमहेतुत्वं मद्यमदवदायुषो देहबन्धकर्तृत्वं जलवत् नाम्नो विचित्रनामकारित्वं चित्रकवद्गोत्रस्योच्चनीचकारित्वं कुम्भकारवद्दानादीनां विघ्ननिदानत्वमन्तरायस्य स्वभावः कोशाध्यक्षवत । सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्मावान्तरभेदमूलप्रकृतिवेदनीयः । तथावोचदुमास्वातिवाचकाचार्य्यः आद्यो ज्ञानदर्शनावरणवदनीयमोहनीयायुर्नामगोत्रान्तराया इति तद्भेदञ्च समगृह्णात पञ्चनवाष्टाविंश-

तिचतुर्द्विचत्वारिंशद्विपञ्चदशभेदा यथाक्रममिति । एतच्च सर्वं विद्यानन्दादिभिर्विवृतमिति विस्तरभयान्न प्रस्तूयते ॥ ५१ ॥

बन्ध चारप्रकारका है । प्रकृति, स्थिति, अनुभव और प्रदेश । निम्ब और गुड़ादिका तीताधन और मधुरता आदि स्वभावहै इसीप्रकार आवरणीय वस्तुका ज्ञान दर्शनका आवरण करनाही स्वभावहै । जिसप्रकार, मेघ सूर्य्यका प्रभावका आवरक एवं कुम्भ प्रदीप के प्रभाका उच्छेदक है पुनः सदसद्वेदनीयवस्तुका स्वभाव सुख और दुःखका उत्पादन करना । जैसेः—असिधारामें मधु अर्पण कर लेहन करनेपर सुख और दुःख दोनोंही उत्पन्न होते है । दर्शन मोहनीय अर्थात् जिसके देखनेहीसे मोह उत्पन्न हो, जैसे वस्तुका स्वभाव, तत्त्वार्थसे अश्रद्धानकारित्व, जिस प्रकार दुर्जनसंगसे तत्त्वार्थमें अश्रद्धान उत्पन्न होता है चरित्र मोहनीय वस्तुका स्वभाव असंयम समुत्पादन करना जिस प्रकार मद्यमद असंयमका [illegible] है । देहसे बन्धनका संधान करना आयुका स्वभाव है कुम्भकारकी नाईं उच्च नीच [illegible]त्व । असंशयका स्वभाव, को साध्यक्षकी नाईं ज्ञानादि व्यापारपरम्पराका विघ्न उत्पा[illegible] है । यह प्रकृतिबन्ध आठप्रकारका है । यह द्रव्य कर्म्म अवान्तरभेद और [illegible] द्वारा वेदनीय है अर्थात् परिज्ञात होजाता है उसी प्रकार उमास्वामी वाचक मूलप्रश्ने कहा है, ज्ञानदर्शन, आवरण, वेदनीय, मोहनीय आयु, नाम, गोत्र और [illegible], ये ही आठ प्रकारका प्रकृतिबन्ध है इससे भिन्न पांच, नौ, अठाईस, बेआलीस, अन्तराय प्रकार भेदभी परिदर्शित हुआ है विद्यानन्द प्रभृतिनेभी ये सब भेद कहे हैं, [illegible] वे सब प्रस्तावित नहीं किये गये ॥ ५१ ॥

[illegible] जागोसहिष्यादिक्षीराणामेतावन्तमनेहसं माधुर्य्यस्वभा-
यथा [illegible] स्थितिः तथा ज्ञानावरणादीनां मूलप्रकृतीनामादित-
[illegible]स्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटिकोट्यः परा
स्थितिरित्याद्युक्तं कालनुद्धानवत् स्वीयस्वभावादप्रच्युति-
स्थितिः ॥ ८२ ।

यथा अजागोमहिष्यादिक्षीराणां तीव्रमन्दादिभावेन स्वकार्य्य-कारणे सामर्थ्यविशेषोऽनुभावः तथा कर्मपुद्गलानां स्वकार्य्य-कारणे सामर्थ्यविशेषोऽनुभावः ॥ ५३ ॥

जैसे—अजा, गो और महिषी प्रभृतिकी क्षीर राशिका तीव्र मन्दादि भावसे स्वकार्य करनेमें सामर्थ्यविशेषको अनुभाव कहते हैं, उसीप्रकार कर्म्म पुद्गल सबका स्वकार्य्य कर-नेमें सामर्थ्यविशेषका नाम अनुभाव है ॥ ५३ ॥

कर्मभावपरिणतपुद्गलस्कन्धानामनन्तान्तप्रदेशानाम् आत्मप्र-देशानुप्रवेशः प्रदेशबन्धः ॥ ५४ ॥

कर्म्मभाव प्राप्त अनन्तानन्त प्रदेशविशिष्ट पुद्गलस्कन्ध सबका आत्मप्रदेशमें अनुप्रवे-शको प्रदेशबन्ध कहते हैं ॥ ५४ ॥

आस्रवनिरोधः संवरः, येनात्मनि प्रविशत् कर्म प्रतिषिध्यते स गुप्तिसमित्यादिः संवरः । संसारकारणाद्योगादात्मनो गो[पनं] गुप्तिः । सा त्रिविधा कायवाङ्मनोनिग्रहभेदात् । प्राणिपीडा[परि]हारेण सम्यगयनं समितिः सा ईर्ष्याभाषादिभेदात् पञ्चधा ॥

आस्रवनिरोधका नाम संवन्धहै । जिसके द्वारा आत्मामें प्रवेशोद्यत कर्म्म प्रतिषि[द्ध होता] है, उसका नाम गुप्तिसमित्यादि संवरहै । संचारके हेतुभूत योगसे आत्माके गो[पनको] गुप्ति कहते हैं गुप्ति तीन प्रकारकी है, जैसे—कायनिग्रह, मनोनिग्रह और वाक्य[निग्रह । प्राणि]योंकी जिसमें पीड़ा अर्थात् क्लेश उपस्थित न होसके, अनुरूप अयन अर्थात् [गमनका] नाम समिति है । यह समिति ईर्ष्या, और भाषा भेदसे पांच प्रकारकी [है । ईर्ष्या]समिति, भाषासमिति, रोषणासमिति, सादानसमिति और सोत्सर्गसमि[ति ॥ ५५ ॥]

प्रपञ्चितञ्च हेमचन्द्राचार्य्यैः—

लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः ।
जन्तुरक्षार्थमालोक्य गतिरीर्ष्या मता [सताम् ॥]

हेमचन्द्राचार्य्यने इसका यथाक्रमसे सविस्तर वर्णन किया [है । सूर्य्यकिरणोंसे] प्रकाशित लोगोंके अतिवाहित मार्गमें प्राणियोंकी रक्षणार्थ विशे[ष रूपसे देखकर चल]नेका नाम ईर्ष्यासमिति है ॥ ५६ ॥

का-
वदा-
चित्र-
निदान-
तिबन्धोऽ-
यावोचदुमा-
प्रमोदनीया-
पद्यावेश-

आपद्यनागतः सर्वजनीनं मितभाषणम्।
प्रिया वाचंयमानां सा भाषासमितिरुच्यते॥ ५७॥

जिसमें सबलोगोंके मनकी प्रीति उत्पन्न होसके इसप्रकार मितवाक्य प्रयोग करनेका नाम भाषासमिति है। जिन लोगोंने संयम किया है, यह भाषासमिति उन सबको प्रिय है॥ ५७॥

द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम्।
मुनिर्यदन्नमादत्ते सैषणासमितिर्मता॥ ५८॥

ये जो ४२ प्रकारके भिक्षादोष कहे गये हैं जिसमें उन सबका किसीप्रकार संस्पर्श नहीं तादृश अन्नग्रहणकरनेका नाम ऐषणासमिति है॥ ५८॥

आसनादीनि संवीक्ष्य प्रतिलङ्घ्य च यत्नतः।
गृह्णीयान्निक्षिपेद् ध्यायेत् सादानसमितिः स्मृता॥ ५९॥

हे! आसनादि समुदाय सम्यक् रूपसे दर्शन और यत्नपूर्वक प्रतिलङ्घन कर ग्रहण, निक्षेप और ध्यान करना चाहिये इसका नाम सादान समिति है॥ ५९॥

कफमूत्रमलप्रायैर्निर्जन्तु जगतीतले।
यत्नाद्यदुत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत्॥ ६०॥

कफ, मूत्र और मलकी अधिकतासे संसार जन्तुरहित होसकताहै। इस कारण साधु अन्तरायपूर्वक सो सब छोडेंगे। इसका नाम सोत्सर्गसमिति है॥ ६०॥

एवं ... स्रोतसो द्वारं संवृणोतीति संवर इति निराहुः।
... भियुक्तैः—

यथा ... भवहेतुः स्यात् संवरो मोहकारणम्।
... मुक्तिरन्यदस्याः प्रपञ्चनम्॥ ६१॥
... स्थितिरित्याद्यु...
स्थितिः॥ ६२॥

...तसे अर्थात् उत्पत्ति संसरण करनेसे उसका नाम संवर हुआ है। ... ने सो ही कहा है। जैसे आस्रव उत्पत्ति का हेतु, एवं ... ने इसप्रकार भी भाषा किया है। अन्य प्रकारभी इसका ॥

तपःप्रभृतिभिर्निर्जरणं निर्जराख्यं तत्त्वं
...कलापं पुण्यं सुखदुःखे च देहेन जन्यनि
...नादिकं तप उच्यते॥ ६२॥

अर्जित अर्थात् सञ्चित कर्म्मका तप प्रभृतिद्वारा निर्जरण अर्थात् क्षय करनेका नाम निर्जरा नामका तत्त्व है । जिसके द्वारा बहुत दिनोंका सञ्चित कषाय, कलाप, पुण्य, सुख और दुःख देहके साथ जरित अर्थात् विनाशित होता है, उसको तप कहते हैं । केशलुञ्चनादि इस तपका स्वरूप है ॥ ६२ ॥

सा निर्जरा द्विविधा यथा कालोपक्रमिकभेदात् । तत्र प्रथमा यस्मिन् काले यत् कर्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्जरा कामादिपाकजेति च जेगीयते । यत् कर्म तपोबलात् स्वकामनयोदयावलिं प्रवेश्य प्रपद्यते तत् कर्म निर्जरा ॥ ६३ ॥

यह निर्जराके दो प्रकार हैं । काल निर्जरा और औपक्रमिक निर्जरा । उनमे जिस कालमें जो कर्म्म फलप्रद करके अभिमत है, उसी कालमें फलदान करता है, इस हेतु काल निर्जरा हो जाता है । इस काल निर्जराको कामादि पाकजा भी कहते है । जो कर्म्म तपोबलसे कर्त्ताके स्वीय कामनासे उदय परम्परा लाभकर प्रतिपन्न होता है, उसका नाम कर्म्म निर्ज्जरा है ॥ ६२ ॥

यदाह--

संसारबीजभूतानां कर्मणां जरणादिह ।
निर्जरा संस्मृता द्वेधा सकामा कामनिर्जरा ।
स्मृता सकामा यमिनामकामा त्वन्यदेहिनामिति ॥ ६४ ॥

उसी प्रकारकी कहा है जो, संसारके बीजभूत कर्म्म सबका जरण अर्थात् क्षय करते है इससे निर्ज्जरा नाम हुआ है । यह दो प्रकारका है, सकामा और निर्ज्जरा है । उनमें यमी आदि पक्षमें सकामा और अन्य देही आदिके पक्षमें अकामा प्रशस्त है ॥ ६४ ॥

मिथ्यादर्शनादीनां बन्धहेतूनां निरोधः अभिनवकर्माभावात्, निर्जराहेतुसन्निधानेनार्जितस्य कर्मणो निरसनादात्यन्तिककर्म्ममोक्षणं मोक्षः, बन्धहेतुभवहेतुनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षणं मोक्ष इति तदनन्तरमूर्द्ध्वं गच्छत्यालोकान्तात् यथा हस्तदण्डादिभ्रमिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिन् तद्बलादेवासंस्कारक्षयं भ्रमति तथा भवस्थेनात्मना अपवर्गप्राप्तये बहुशो

यत् कृतं प्रणिधानं मुक्तस्य तदभावेऽपि पूर्वसंस्कारादालोकान्तं गमनमुपपद्यते यथा वा मृत्तिकालेपकृतमलाबुद्रव्यं जलेऽधः पतति पुनरपेतमृत्तिकाबन्धमूर्ध्वं गच्छति तथा कर्मरहित आत्मा असङ्गत्वादूर्ध्वं गच्छति । बन्धच्छेदादेरण्डबीजवच्चोर्ध्वगतिस्वभावाच्चाग्निशिखावत् ॥ ६५ ॥

उल्लिखित मिथ्या दर्शनादि जो सब बन्धके कारण कहकर परिगणित हैं, उनके निरोधका नाम मोक्ष है, अथवा अभिनव कर्म्मके अभाव एवं निर्ज्जरा हेतुके सन्निधान द्वारा अर्जित कर्म्मका निरसन इसी दोनों प्रकारके उपायोंसे आत्यन्तिक अर्थात् एकही वारमें जिस कर्म्मका मोक्षण अर्थात् परिहार संघटित होता है, उसको मोक्ष कहते हैं, अथवा बन्धका कारण एवं उत्पत्तिका हेतु-यही दो प्रकारका निर्ज्जरा सहायसे कर्म्मका निःशेष वर्ज्जनका नाम मोक्ष है । जैसेः—इस मोक्षके पीछे आलोकनामे ऊपर गमन होता है जैसेः—हाथ दण्डादि द्वारा भ्रमण कराकर चला देनेसे कुम्भकारके चक्र उसकी निवृत्तिमें भी उसके प्रभावसे जबतक वेगका क्षय नहीं होता, तबतक भ्रमण रखता है, इसी प्रकार भवस्थ आत्मा द्वारा अपवर्गप्राप्तिके लिये वारम्वार जो प्रणिधान समाहित होता है, मुक्तावस्थामें उसके अभाव होनेपरभी पूर्वसंस्कारबलसे आलोकान्त गमन उपपन्न होता है । अथवा जैसे, मिट्टीसे लिपा हुआ अलाबू (तुम्बी) जलमें डूबता है मृत्तिका लेप छुड़ा देनेसे, फिर तुम्बी जलपर उपर होजाती है, इसी प्रकार कर्म्मरहित असङ्गत्वतः उपर होजाता है एरण्ड बीज और अग्निकी शिखा इनका जिस प्रकार ऊर्ध्व गमन करना स्वभाव है, आत्मा भी उसी प्रकार स्वभावतः ऊर्ध्वगमन शील है, इसी कारण बन्धके उच्छेदहोनेसे, जो अविभाग रूपसे अवस्थान घटता है, उसकी इस प्रकार ऊर्ध्वगति होती है ॥ ६५ ॥

अन्योन्यं प्रदेशानुप्रवेशे सत्यविभागेनावस्थानं बन्धः परस्परप्राप्तिमात्रं सङ्गः । तदुक्तं पूर्वप्रयोगादसङ्गत्वाद् बन्धच्छेदात्तथा गतिपरिणामाच्चाविरुद्धं कुलालचक्रवद् व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्चेति ॥ ६६ ॥

अतएव पठन्ति--

गत्वा गत्वा निवर्त्तन्ते चन्द्रसूर्य्यादयो ग्रहाः ।
अद्यापि न निवर्त्तन्ते त्वालोकाकाशमागता इति ॥ ६७ ॥

इसी कारण निर्देश किया है कि, चन्द्र सूर्य्यादि ग्रहगण बारम्बार गमनकर निवृत्त होते हैं किन्तु जिनने आलोकाकाशसे गमन किया है, वे अबतक नही वापस आए हैं ॥ ६७॥

अन्ये तु गतसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन उपरिदेशावस्थानं मुक्तिरित्यास्थिषत । एवमुक्तानि सुखदुःखसाधनाभ्यां पुण्यपापाभ्यां सहितानि नवपदार्थान् केचनाङ्गीचक्रुः । तदुक्तं सिद्धान्ते, जीवाजीवौ पुण्यपापयुतावास्रवः संवरो निर्जरणं बन्धो मोक्षश्च नव तत्त्वानीति । सङ्ग्रहे प्रवृत्ता वयमुपरताः स्म ॥ ६८ ॥

अन्यान्य लोगोने कहा है, समस्त क्लेशहीन, सम्पूर्ण वासना विहीन और अनावरण ज्ञान सम्पन्न होनेपर आत्मा सुखमात्रकी प्राप्तिमें मुक्ति भावापन्न हुआ है । जो ऊपरको रहता है । उसका नाम मुक्ति है । इस प्रकार कोई २ सुख और दुःखका साधनस्वरूप पुण्य पाप सहित नव ९ पदार्थोंको मानते हैं । सिद्धान्तमें उसको कहा है । जैसे जीव और अजीव पुण्य, पाप, आस्रव, सम्वर, निर्जरण, बन्ध, मोक्ष, येही नव ९ तत्त्व हैं । हम लोग संग्रहमें प्रवृत्त हैं, सुतरां इसी स्थानमें निवृत्त हुए ॥ ६८ ॥

अत्र सर्वत्र सप्तभङ्गिनयाख्यं न्यायमवतारयन्ति जैनाः स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य इति ॥ ६९ ॥

जैन लोग सर्वत्र सप्तभङ्गि नय नामक न्यायकी अवतारणा करते हैं । जैसे, स्यादस्ति, किसप्रकार है; स्यान्नास्ति, अर्थात् किसप्रकार नही है । स्यादस्ति नास्ति च, अर्थात् किस प्रकार है और नहीं । स्यादस्ति चावक्तव्य, अर्थात् किस प्रकार है, सो नही कहा जाता स्यान्नास्तिचावक्तव्य, अर्थात् किसप्रकार नही सोभी नही कहा जाता । स्यादस्ति च नास्ति चावक्तव्य अर्थात् किस प्रकार है और नहीं कहा नही जाता येही सप्त भङ्गिनय नामक न्याय है ॥ ६९ ॥

तत्सर्वमनन्तवीर्य्यः प्रत्यपीपदत् । तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत् । स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते ॥ ७० ॥

अनन्तवीर्य्यने इन सबको इस प्रकार प्रतिपादन किया है. जो जहां विधान विवक्षित होता है, वही प्रथम न्यायकी अवतारणा होती है; जिस स्थानमें इस प्रथम न्यायका निषेध विवक्षित हो. उस स्थानमे द्वितीय न्यायका प्रयोग होता है ॥ ७० ॥

क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक् । युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः ॥ ७१ ॥

यथाक्रमसे दोनों वासनाओंकी एक साथ विवक्षा होनेपर समुदायका प्रयोग किया जाता है । जिस स्थानमे अशक्ति अर्थात् इस प्रकार प्रयोग नहीं किया जासके, उसी स्थानमें अवाच्य होजाता है ॥ ७१ ॥

आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते । अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः ॥ समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यत इति ॥ ७२ ॥

प्रथमन्यायकी अवाच्य विवक्षा होनेपर पञ्चमन्यायका प्रयोग विहित होता है । अन्त्यकी अवाच्य विवक्षा होनेपर षष्ठ न्यायका समुद्भाव होजाता है । और एक ही वार सबका प्रयोग होनेपर सप्तमन्याय कहा जाता है ॥ ७२ ॥

स्याच्छब्दः खल्वयं निपातः तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः । यथोक्तम्—वाक्येष्वनेकान्तद्योतिगम्यं प्रति विशेषणम् । स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपक इति ॥ ७३ ॥

यहां स्यात शब्द निश्चय अव्यय है तिङन्तके प्रतिरूपक प्रयोजित हुआ है । जिस कारण यह अनेकान्तका प्रकाशक है । प्रमाण जैसेः—वाक्यमें प्रयोजित अव्यय शब्द प्रतिविशेषणसे अतीव विस्तरपसे अनेकान्तका द्योतक होनेपर अर्थयोगवशतः, तिङन्तका प्रतिरूपक हो जाता है ॥ ७३ ॥

यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् । अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात पदात् कथञ्चिदिति अयमर्थो लभ्यत इति नानर्थक्यम् ॥ ७४ ॥

फलतः (स्यात्) इसपदसे कथञ्चित् इस प्रकार अर्थही लब्ध होता है । इसका कथन अनर्थक नहीं होता ॥ ७४ ॥

तदाह–स्याद्वादः सर्वथैकान्तत्यागात् किं वृत तद्विधे ।
सप्तभङ्गिनयापेक्षो हेयादेयविशेषकादिति ॥ ७५ ॥

प्रमाण यथा, जिस स्थानमें सर्वतोभावसे एकान्तका त्याग होता है, उसी स्थानमें स्याद्वाद प्रयोजित होता है । यह स्याद्वाद सप्तभङ्गिनयापेक्ष एवं हेय और उपादेय, इन दोनोंका पार्थक्य करदेताहै ॥ ७५ ॥

यदि वस्त्वस्त्येकान्ततः सर्वथा सर्वदा सर्वत्र सर्वात्मनास्तीति न उपादित्साजिहासाभ्यां क्वचित् कदा केनचित् प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्वहेयज्ञानानुपपत्तेश्च । अनेकान्तपक्षे तु कथञ्चित् क्वचित् केनचित् सत्वेन हानोपादाने प्रेक्षावतामुपपद्येते । किञ्च वस्तुनः सत्वं स्वभावः असत्वं वेत्यादि प्रष्टव्यं न तावदस्तितत्वं वस्तुनः स्वभाव इति समस्ति घटोऽस्तीत्यनयोः पर्य्यायतया युगपत् प्रयोगायोगात् नास्तीति प्रयोगविरोधाच्च । एवमन्यत्रापि योज्यम् ॥ ७६ ॥

यदि वस्तु एकान्तही रहती है, तो सर्वथा सर्वदा सर्वत्र सब अवयवमें रहताहै परिग्रह और परिहार इन दोनोंकी इच्छा क्रमसे कही कभी किसी द्वारा प्रवर्त्तित किया या पुनः निवर्त्तित नहीं होसकता । क्योंकि प्राप्त प्रापणीयत्व, हेय, और हान इन सबकी अनुपपत्ति होजाती है । अनेकान्त पक्षमें किसी प्रकार कही किसीसे किया परिग्रह और प्रत्याख्यान उपपादित होनेकी सम्भावना । पुनः यदि जिज्ञासा किया जावे जो सत्त्व किम्वा असत्त्व वस्तुका स्वभाव है ? इसके उत्तरमें कहा जा सकता है जो अस्तित्व वस्तुका स्वभाव नहीं । क्योंकि, है और घट है; इन दोनोका पर्य्याय विशिष्ट युगपत इनका प्रयोग नहीं हो सकता । विशेषतः नास्ति अर्थात् नहीं, इस प्रकार प्रयोगके साथ विरोध पड़ता है । इस प्रकार अन्यत्र भी योजना किया जासकताहै ॥ ७६ ॥

यथोक्तम्–
घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः ।
नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोरित्यादि ॥ ७७ ॥

इस कारण कहा है, घट है, नही कह सकते. कारण यह है जो, घटही सत् स्वरूप है, और नही भी कह नही यह सकते । क्योंकि, नही कहनेसे, असत्व और असत्वका विरोध घटता है । अर्थात् एक वस्तु है, और नही, कभी भी इस प्रकार नही होसकता॥७७॥

तस्मादित्थं वक्तव्यं सदसत्सदसदनिर्वचनीयवादभेदेन प्रतिवादिनश्चतुर्विधाः। पुनरप्यनिर्वचनीयमतेनामिश्रितानि सदसदादिमतानीति त्रिविधाः। तान् प्रति किं वस्त्वस्तीत्यादिपर्य्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्वे निर्विण्णाः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमङ्गीकुर्वतस्तत्र तत्र विजय इति सर्वमुपपन्नम् ॥ ७८ ॥

इस कारण इस प्रकार कहा जा सकता है; सत, असत, सदसत् और अनिर्वचनीय मतभेदसे प्रतिवादी ४ प्रकारका है । पुनः अनिर्वचनीय मत छोड़ देनेपर, सत्, असत् और सदसत् तीन प्रकारका होता है । इन सबको यदि पूछो कि, वस्तु है क्या ? तो कथञ्चित् है, इत्यादि प्रतिवचन सम्भावनामें वे सब निर्विण्ण हो कर चुप रहजाते है । इस प्रकार स्याद्वाद स्वीकार करने पर, सम्पूर्ण रूपसे अर्थ निर्णीत और उसका निबन्धन सर्वत्रही जयलाभ होता है । यह सर्वतो भावसे सिद्ध है ॥ ७८ ॥

यदवोचदाचार्य्यः स्याद्वादमञ्जर्य्याम्—
अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम् ।
एकदेशविशिष्टोऽर्थो न यस्य विषयो मतः ॥ ७९ ॥
न्यायानामेकनिष्ठानां प्रवृत्तौ श्रुतवर्त्मनि ।
सम्पूर्णार्थविनिश्चायि स्याद्वस्तु श्रुतमुच्यत इति ॥ ८० ॥

अन्योन्यपक्षप्रतिपक्षभावाद्
यथापरे मत्सरिणः प्रवादाः ।
नयानशेषानविशेषमिच्छ-
न्न पक्षपाती समयस्तथार्हत इति ॥ ८१ ॥

परस्परके पक्ष और प्रतिपक्ष भाव उपस्थित होनेपर, अपर लोग जिस प्रकार मात्सर्य प्रकाश करते हैं, अर्हत् उस प्रकार कुछभी नही करते । ये अपक्षपाती, सबमतोके परस्पर विरोध दूर करनेके लिये इनका परिश्रम है ॥ ८१ ॥

जिनदत्तसूरिणा जैनं मतमित्थमुक्तम् ।
बलभोगोपभोगानामुभयोर्दानलाभयोः ।
अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम् ॥ ८२ ॥

जिनदत्त सूरिने जैन मतपर इस प्रकार व्याख्या किये है । जैसे बल भोग उपभोग एवं दान और लाभ इन सबका अन्तरायभूत निद्रा, भय, अज्ञान, और जुगुप्सित ॥ ८२ ॥

हिंसा रत्यरती रागद्वेषौ रतिरति स्मरः ॥
शोको मिथ्यात्वमेतेऽष्टादश दोषा नयस्य च ॥ ८३ ॥

हिंसा, रति, अरति, राग, द्वेष, अति रति, स्मर, शोक और मिथ्या येही १८ नय दोष हैं ॥ ८३ ॥

जिनो देवो गुरुः सम्यक् तत्त्वज्ञानोपदेशकः ॥
ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्तिनि ॥ ८४ ॥

जिनदेवही गुरु और सम्यक् सत्तत्त्वज्ञानोपदेष्टा । ज्ञान दर्शन, और चारित्रयही मोक्षका प्रकाशक है ॥ ८४ ॥

स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च ॥
नित्यानित्यात्मकं सर्वं नव तत्त्वानि सप्त वा ॥ ८५ ॥

स्याद्वादके दो प्रमाण हैं, प्रत्यक्ष और अनुमान । सबही वस्तु नित्यानित्यात्मक, तत्त्व या सात हैं ॥ ८५ ॥

जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च ॥
बन्धो निर्जरणं मुक्तिरेषां व्याख्याधुनोच्यते ॥ ८६ ॥

इन सबका नाम जैसे:-जीव, अजीव, पुण्य, पाप, आस्रव संवर, बन्ध, निर्जरण, और मुक्ति । अधुना इनकी व्याख्या किये जाती है ॥ ८६ ॥

चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः ॥
सत्कर्मपुद्गलाः पुण्यं पापं तस्य विपर्य्ययः ॥ ८७ ॥

जीवका स्वरूप चेतना । अजीव उसके विरुद्ध धर्मयुक्त हो । सत्कर्म पुद्गलका नाम । पाप उसके विपरीत है ॥ ८७ ॥

आस्रवः कर्मणां बन्धो निर्जरस्तद्वियोजनम् ।
अष्टकर्मक्षयान्मोक्षोऽथान्तर्भावश्च कैश्चन ।
पुण्यस्य संस्रवे पापस्यास्रवे क्रियते पुनः ॥ ८८ ॥

आस्रव शब्दसे कर्म्मबन्ध । निर्जर शब्दसे उसका वियोजन । आठ कर्म्मके क्षय होनेसे मोक्ष होता है कोई २ इसको अन्तर्भाव कहते है । पुण्य संस्रवसे और पापके अस्रवसे अर्थात् विनाशसे मोक्ष विहित होता है ॥ ८८ ॥

लब्धानन्तचतुष्कस्य लोकागूढस्य चात्मनः ।
क्षीणाष्टकर्मणो मुक्तिर्निर्व्यावृत्तिर्जिनोदिता ॥ ८९ ॥

आत्मा अनन्त चतुष्कलाभ करके आठ प्रकारके कर्म्मके नाश योग प्राप्त होनेपर उसकी मुक्ति घटती है । जिनके मतसे इसका नाम निर्व्यावृत्ति अर्थात् इस प्रकार मुक्तिलाभ होनेपर और उसको कभी संसारमें फिर नहीं आना होगा ॥ ८९ ॥

सरजोहरणा भैक्षभुजो लुञ्चितमूर्द्धजाः ।
श्वेताम्बराः क्षमाशीला निःसङ्गा जैनसाधवः ॥ ९० ॥

जैन साधुगण भिक्षाद्वारा जीविका निर्वाह करते हैं माथ मुंडवाने, श्वेत वस्त्र धारण करते हैं, क्षमाशील और सर्वथा निर्लिप्त होते हैं ॥ ९० ॥

लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः ।
ऊर्द्ध्वाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः ॥ ९१ ॥

द्वितीय प्रकार जैनसाधु हैं । इनका नाम जिनर्षि है, ये लोग माथ मुंडवाये, पिच्छिका हस्त, पाणिपात्र, दिगम्बर एव ये लोग दाताके घरभी भोजन नहीं करते हैं ॥ ९१ ॥

भुङ्क्ते न केवलं न स्त्री मोक्षमेति दिगम्बरः ।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सह ॥ ९२ ॥
इति सर्वदर्शनसंग्रहे आर्हतदर्शनम् ॥ ३ ॥

अथ रामानुजदर्शनम् ॥ ४ ॥

तदेतदार्हतमतं प्रामाणिकगर्हणमर्हति न ह्येकस्मिन् वस्तुनि परमार्थे सति परमार्थसतां युगपत् सदसत्त्वादिधर्माणां समावेशः सम्भवति न च सदसत्त्वयोः परस्परविरुद्धयोः समुच्चयासम्भवे विकल्पः किं न स्यादिति वदितव्यं क्रिया हि विकल्प्यते न वस्त्विति न्यायात् ॥ १ ॥

आर्हतने जो कहा है उसका सर्व्वथा प्रमाणद्वारा खण्डन होसकता है। जो परमार्थ सत् तादृश एक वस्तुमें परमार्थ सत् सदसत्वादि धर्म्म सबका युगपत् समावेश सम्भव नहीं हो सकता, सूर्य्यमें आलोक है, और अन्धकार है, यह कभी नही कहा जा सकता अथवा घट है, और एकही साथ नही है ऐसा कहना भी सङ्गत नहीं होसकता। यदि कहो सत्त्व और असत्त्व परस्पर विरुद्ध, सुतरां उनका समुच्चय अर्थात् एकतः असम्भव है, किन्तु विकल्पमें इस प्रकार एकता होना असम्भव क्या ? ऐसा नही कह सकते क्योंकि क्रियाहीका विकल्प होता है। वस्तुका कभी नहीं होता। ऐसा न्यायप्रसिद्ध है ॥ १ ॥

न चानेकान्तं जगत् सर्वं हेरम्बनरसिंहवदिति दृष्टान्तावष्टम्भवशाद्वेष्टव्यम् एकस्मिन् देशे गजत्वं सिंहत्वं वा अपरस्मिन् नरत्वमिति देशभेदेन विरोधाभावेन तस्यैकस्मिन् देश एव सत्त्वासत्त्वादिना अनेकान्तत्वाभिधाने दृष्टान्तानुपपत्तेः। ननु द्रव्यात्मना सत्त्वं पर्य्यायात्मना तदभाव इत्युभयमप्युपपन्नमिति चेन्मैवं कालभेदेन हि कस्यचित् सत्त्वमसत्त्वञ्च स्वभाव इति न कश्चिद्दोषः ॥ २ ॥

हेरम्ब और नरसिंहके तुल्य इत्यादि दृष्टान्तका आश्रयवशात् जगत्को अनेकान्त नहीं कह सकते हो। एकदेशमें गजत्व और सिंहत्व एवं अपर देशमें नरत्व इस प्रकार देश भेदसे विरोधके अभाववशतः किस प्रकार विरोध उपस्थित नहीं होसकता। किन्तु ऐसा कोई दृष्टान्त नहीं जिसके द्वारा एकही देशमें सत्त्व और असत्त्वद्वारा संसारको इस प्रकार अनेकान्त कहा जासकता। इसका भावार्थ नरसिंहने यही कहा है यही ज्ञात पड़ता है, शरीरके ऊर्ध्वभाग सिंहकी नाईं एवं परभाग मनुष्यकी नाईं है इसमें देशभेद कहा गया इसी कारण कोई विरोध नहीं हुआ। एक देशमें कहनेपर विरोध होता, किन्तु भगवान्‌ने

पक्षमे सो नही है। एक देश कहागया है इस कारण विरोध हुआ। यदि कहो, वस्तु द्रव्यरूपसे है एवं संज्ञारूपसे नही इस स्थानमें सत्व और असत्व दोनोंही उत्पन्न हुए। ऐसाभी नही कह सकते हो। क्योंकि. कालभेदहोसे कोई वस्तु सत्व और असत्व स्वभाव, ऐसा कहनेसे दोष नहीं होसकता फलतः कालहीमें वस्तुका सत्व और असत्व (रहना और नही रहना) होताहै, स्थान वा नामसे नहीं ॥ २ ॥

न चैकस्य ह्रस्वत्वदीर्घत्ववदनेकान्तत्वं जगतः स्यादिति वाच्यं प्रतियोगिभेदेन विरोधाभावात्। तस्मात् प्रमाणाभावात् युगपत् सत्त्वासत्त्वे परस्परविरुद्धे नैकस्मिन् वस्तुनि वस्तुयुक्ते। एवमन्यासामपि भङ्गीनां भङ्गोऽवगन्तव्यः ॥ ३ ॥

और एकव्यक्तिके ह्रस्वत्व और दीर्घत्वकी नाई जगत्को अनेकान्त नही कहसकते। क्योंकिः इसमें प्रतियोगि भेदसे विरोधका अभाव भाता है। इसका भावार्थ यह है, ह्रस्वत्वके कहनेसे ह्रस्वत्वका अभाव नही होता; उसके दीर्घत्वका अभाव होता है। फलतः जो व्यक्ति ह्रस्व है उसको दीर्घभी कभी नही कह सकते। ऐसे प्रमाणके अभावसे सत्व और असत्व परस्पर विरुद्ध बहकर युगपत् एकवस्तुमें नही रहसकता। इस प्रकार अन्यान्य भङ्गि सबका भी भङ्ग अर्थात् खण्डन होता है जानना ॥ ३ ॥

किञ्च सर्वस्यास्य मूलभूतः सप्तभङ्गिनयः स्वयमेकान्तः अनेकान्तो वा। आद्ये सर्वमनेकान्तमिति प्रतिज्ञाव्याघातः। द्वितीये विवक्षितार्थासिद्धिः। अनेकान्तत्वेनासाधकत्वात्। तथा चैयमुभयतःपाशरज्जुः स्याद्वादिनः स्यात ॥ ४ ॥

अपि च नवत्वनतत्वादिनिर्द्धारणस्य फलस्य तन्निर्द्धारयितुः प्रमातुश्च तत्करणस्य प्रमाणस्य प्रमेयस्य नवत्वादेरनियमे नाऽऽसमर्थितमाप्तमतस्तीर्थकरत्वं देवानां प्रियेणार्हतमतप्रवर्त्तकेन। तथा जीवस्य देहानुरूपपरिमाणत्वाङ्गीकारे योगबलादनेकपरि-

आहृकयोगिजीवेषु प्रतिशरीरं जीवविच्छेदः प्रसज्येत, मनुजशरीरपरिमाणो जीवो मतङ्गजदेहं कृत्स्नं प्रवेष्टुं न प्रभवेत् ॥ ५॥

और एकवार नवतत्व और पुनः सात तत्व कहे गये हैं । सुतरां उसका निर्धारण फलका जैसा किसी प्रकार नियम नहीं उसी प्रकार उसका निर्धारण कर्ता प्रमाता, उसका करण प्रमाण और प्रमेय नवतत्वादिकीभी किसी प्रकार स्थिरता नहीं । सुतरां देवगणका प्रिय आर्हतमत प्रवर्त्तक अपनातीर्थंकरत्व वेशही समर्थित किया है । आर्हत मतमें लिखा है जो, देहके परिमाणानुसार जीवका परिमाण होता है । इसको माननेसे योगबलसे योगी जीव जब अनेक शरीर ग्रहण करते हैं, तब उसके प्रति शरीरके अनुसार जीव विच्छेद प्रसंक्तिकी सम्भावना घटती है । क्योंकि, मनुष्य शरीर परिमित जीव हाथीके शरीरमे सर्व्वतो भावसे प्रवेश नहीं करसकताहै ॥ ५ ॥

किञ्च गजादिशरीरं परित्यज्य पिपीलिकाशरीरं विशतः प्राचीनशरीरसन्निवेशविनाशोऽपि प्राप्नुयात् । न च यथा प्रदीपप्रभाविशेषः प्रपाप्रासादाद्युदरवर्त्तिसङ्कोचविकाशवान् तथा जीवोऽपि मनुजमतङ्गजादिशरीरेषु स्यादित्येषितव्यं प्रदीपवदेव सविकारत्वेनानित्यत्वप्राप्तौ कृतप्रणाशाकृताभ्यागमप्रसङ्गात् ॥ ६ ॥

और हस्ती आदि शरीर छोडकर पिपीलिकाके शरीरमें प्रवेश करते समय पूर्वशरीर सन्निवेशका विनाश होसक्ता है । यहां ऐसी सम्भावना नहीं करना, जो, प्रदीप प्रभा विशेष जैसे प्रपा और प्रासाद आदि अभ्यन्तरवर्त्ती होनेपर, उस परिमाणसे यथाक्रमसे संकोच और विकाश दोनोंही प्राप्त होता है । मनुष्य और हस्ती प्रभृति शरीरमें प्रवेश समय जीवकाभी उसी प्रकार संकोच विकाश संघटित होजाताहै । ऐसा होनेसे प्रदीपकी नाई विकारी पदार्थ कहकर जीवका अनित्यत्व दोषोत्पत्ति होती है । एवं अनित्यत्व होनेसे, कृतप्रणाश और अकृताभ्यागम ये दो प्रकारके दोषभी उपस्थित होते हैं । जीव किन्तु अनित्य और विकारी नहीं है ॥ ६ ॥

एवं प्रधानमल्लनिबर्हणन्यायेन जीवपदार्थदूषणाभिधानदिशान्यत्रापि दूषणमुत्प्रेक्षणीयम् । तस्मान्नित्यानिर्दोषश्रुतिविरुद्धत्वादिदमुपादेयं न भवति । तदुक्तं भगवता व्यासेन—नैकस्मिन्नसम्भवादिति । रामानुजेन च जैनमतनिराकरणपरत्वेन तदिदं सूत्रं व्याकारि । एष हि तस्य सिद्धान्तः चिदचिदीश्वरभेदेन भोक्तृभोग्यनियामकभेदेन व्यवस्थितास्त्रयः पदार्था इति ॥ ७ ॥

इसी प्रकार, जैसे प्रधान मल्लकी पराजय होनेसे अन्यान्य मल्लकी भी पराजय सम्भावना कियी जाती है, उसी प्रकार आर्हत मतके प्रधान अङ्गभूत जीव पदार्थ जब सर्व्वथा दोषयुक्त और भ्रमपूर्ण सिद्ध होता है, तब अन्यत्र भी इसी प्रकार दोष और भ्रम प्रतिपन्न होसकता है, इसी कारण यह आर्हतमत नित्य-निर्दोष-वेद-विरुद्ध कहा जाता, और कदापि ग्रहण नहीं किया जासकता । भगवान् व्यास देवने भी कहा है जो, एक पदार्थमें सम्भव नहीं हो सकता । रामानुजने जैन मतके खण्डन विषयमें इसी सूत्रकी व्याख्या कियी है । यही उनका सिद्धान्त है, जो. चित् अचित् और ईश्वरभेदसे भोक्ता. भोग और नियामक भेद संघटित होता है । तदनुसार पदार्थ तीन प्रकारका होता है ॥ ७ ॥

तदुक्तम्—

ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः ।
ईश्वरश्चित इत्युक्तो जीवो दृश्यमचित् पुनरिति ॥ ८ ॥

प्रमाण, जैसे, भगवान् हरि ही ईश्वर, चित् और अचित् भेदसे तीन पदार्थ है । उनमें ईश्वर और जीवको चित् पदार्थ कहते हैं । और परिदृश्यमान संसार ही अचित पदार्थ है ॥ ८ ॥

अपरे पुनरशेषविशेषप्रत्यनीकं चिन्मात्रं ब्रह्मैव परमार्थः । तच्च नित्यशुद्धबुद्धमुक्तस्वभावमपि तत्त्वमस्यादिसामानाधिकरण्याधिगतजीवैक्यं बध्यते मुच्यते च । तदतिरिक्तनानाविधभोक्तृभोक्तव्यादिभेदप्रपञ्चः सर्वोऽपि तस्मिन्नविद्यया परिकल्पितः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिवचननिचयप्रामाण्यादिति ब्रुवाणास्तरति शोकमात्मविदित्यादिश्रुतिशिरःशतवशेन निर्विशेषब्रह्मात्मैकत्वविद्यया अनाद्यविद्यानिवृत्तिमङ्गीकुर्वाणाः मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति भेदनिन्दाश्रवणेन पारमार्थिकं भेदं निराचक्षाणाः विचक्षणंमन्यास्तमिमं विभागं न सहन्ते ॥ ९ ॥

से जो विविध भेद विस्तारित हुआ है, सब ही अविद्या बलसे परिकल्पित हुए हैं । वे लोग कहते हैं जो, वही सत् स्वरूप, वही आगे थे, वही एक और अद्वितीय, इत्यादि वचन निश्चयसे उक्त अभेद प्रमाणित होता है । वे लोग और भी कहते हैं जो, आत्मवित् व्यक्ति शोकसे उत्तीर्ण होता है, इत्यादि सैंकडों उपनिषद्के वचनानुसार निर्विशेष ब्रह्मात्मैकत्वविद्या द्वारा यह अनादि अविद्याकी निवृत्ति होती है । पुनः जो लोग नानात्व दर्शन करते हैं, वे मृत्युसे भी मृत्युको प्राप्त होते हैं, इत्यादि विधान क्रमसे जो भेद निन्दा सुनी जाती है, तदनुसार वे लोग पारमार्थिक भेदका खण्डन करते हैं । इत्यादि कारणोंसे वे विचक्षणत्वाभिमानी पुरुष लोग उपरि लिखित ईश्वर, चित् और अचित इस प्रकार भेदसे तीन प्रकारका विभाग मानते हैं ॥ ९ ॥

तत्रायं समाधिरभिधीयते भवेदेतदेवं यद्यविद्यायां प्रमाणं विद्येत न च वमनादिभावरूपं ज्ञाननिवर्त्यमज्ञानमहमज्ञो मामन्यञ्च न जानामीति प्रत्यक्षप्रमाणसिद्धम् ॥ १० ॥

इस विषयका इसप्रकार समाधान वा मीमांसा होसकती है जो, यदि अभावरूप अविद्या प्रमाण है । तो इसप्रकार अभेदकी कल्पना होसकती है, किन्तु सो नहीं । क्योंकि अनादि भावस्वरूप अज्ञान ज्ञानद्वारा ही निवृत्त होता है । मैं अज्ञ, अपनेको या अन्यको जानता नहीं इसप्रकार अज्ञान प्रत्यक्ष प्रमाण सिद्ध ही होता है ॥ १० ॥

तदुक्तम्—

अनादिभावरूपं यद्विज्ञानेन विलीयते ।
तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षत इति ॥ ११ ॥

शास्त्रान्तरमें ज्ञानके उदय होनेपर, जो अनादि भाव स्वरूप वस्तुका विनाश होता है, उसका नाम अज्ञान, अज्ञानका इसीप्रकार लक्षण कहा गया है ॥ ११ ॥

न चैतत् ज्ञानाभावविषयमित्याशङ्कनीयं, को हि कं ब्रूयात प्रभाकरकरावलम्बी भट्टदत्तहस्तो वा नाद्यः ।

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके ।
वस्तुनि ज्ञायते किञ्चित कैश्चिद्रूपं कदाचनेति ॥ १२ ॥

ऐसी आशङ्का नहीं करसकते यह ज्ञानके अभाववस्तुको बुझाता है; क्योंकि, कौन किसे कहेगा ? जो लोग प्रभाकरके मतावलम्बी हैं, वे कहेंगे कि नहीं, भट्टदत्तके मतावलम्बी लोक कहेंगे ? इनमेंसे आद्य (प्रभाकरमतावलम्बी) कभी नहीं । क्योंकि, स्वरूप और पररूपद्वारा नित्य सदसदात्मक वस्तुमें किसप्रकार कुछ कभी जाना जा सकता है ॥ १२ ॥

भावान्तरमभावो हि कयाचित् तु व्यपेक्षया ।
भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात् ॥ १३ ॥

क्योंकि किसी प्रकार विधानसे अभाव पदार्थ भाव पदार्थके ही अन्तर्भूत है । क्योंकि अभावपदार्थ भावपदार्थसे भिन्न अन्य कौन वस्तुस्वरूप हैं, यह निरूपणही नही किया जासकता ॥ १३ ॥

इति वदता भावव्यतिरिक्तस्याभावस्यानभ्युपगमात् । अभावस्य षष्ठप्रमाणगोचरत्वेन ज्ञानस्य नित्यानुमेयत्वेन च तदभावस्य प्रत्यक्षविषयत्वानुपपत्तेः । यदि पुनः प्रत्यक्षाभाववादी कश्चिदेवमाचक्षीत तं प्रत्याचक्षीत अहमज्ञ इत्यस्मिन्ननुभवे अहमित्यात्मनोऽभावधर्मितया ज्ञानस्य प्रतियोगितया चावगतिरस्ति न वा अस्ति चेद्विरोधादेव न ज्ञानाभावानुभवसम्भवः॥१४॥

इस प्रकार निर्देश करनेसे, अभाव पदार्थ जो भावपदार्थसे भिन्न, उसका अभ्युपगम (स्वीकार) ही नही हुआ । अभावपदार्थ छठे प्रमाणका गोचर और ज्ञान नित्यानुमेय है । इसीकारण उस अभावकी प्रत्यक्ष विषयता अनुपपन्न होती है । पर भी इस स्थानमें एक हेतु है । यदि कोई प्रत्यक्ष भाववादी यह नही कहे उसको कहसकतेहो, मैं अज्ञ हूँ, इस प्रकार अनुभाव स्थानमें मैं, यह आत्माका अभाव धर्म्मत्व घटता है । इसी कारण प्रतियोगिताकी अवगति होती है । या नही ? यदि अवगति होती है, इसप्रकार कहा जावे, तो विरोध वशात् ज्ञानको अभावका अनुभव सम्भव नही होता ॥ १४ ॥

नेद्धर्मिप्रतियोगिज्ञानसापेक्षो ज्ञानाभावानुभवः सुतरां न सम्भवति तस्याज्ञानस्य भावरूपत्वे प्रागुक्तदूषणाभावादयमभावो भावरूपाज्ञानगोचर एवाभ्युपगन्तव्य इति । तदेतन गगनरोमन्थायितं भावरूपस्याज्ञानस्य ज्ञानाभावसमानयोगक्षेमत्वात् ।

ज्ञानके अभावका अनुभव यदि धर्म्म प्रतियोगि ज्ञान सापेक्ष नहीं होता है। तो उसका अनुभव ही नहीं होसकता। और यह अज्ञान यदि अभावरूप न होकर भावरूप ही हो, तो पूर्वोक्त दूषणके अभाव हेतु इस अनुभवको भाव रूप और अज्ञान गोचर कहकर स्वीकार किया जासका। किन्तु भावरूप अज्ञानका ज्ञानाभाव समानयोगक्षेमत्व हेतु आकाश रोमन्था·यित्वकी नाई मिथ्यात्व ही हुआ। इस प्रकार विषयत्व और आश्रयत्व द्वारा ज्ञानकी व्यावर्त्त·कता हेतु व्यापक अर्थ सिद्ध हुआ या नहीं ? इस प्रकार जिज्ञासा होनेपर, यह प्रज्ञानस्वरूप ज्ञानसाध्य ऐसी प्रतिपत्ति (निश्चय) स्थिरताके परे, सिद्ध नहीं हुआ, ऐसी आशङ्का ही नहीं होसकती विशेष, असिद्ध होनेपर, व्यावर्त्तक आश्रयशून्य विषय शून्य अज्ञानका अनुभव ही नही होसकता ॥ १५ ॥

अथ विशदः स्वरूपावभास एवाज्ञानविरोधिना ज्ञानेनाभासित इति आश्रयविषयज्ञाने सत्यपि नाज्ञानानुभवविरोध इति हन्त तर्हि ज्ञानाभावेऽपि समानमेतत् अन्यत्राभिनिवेशात् । तस्मादुभयाभ्युपगतज्ञानाभाव एवाहमज्ञो मामन्यञ्च न जानामीत्यनुभवगोचर इत्यभ्युपगन्तव्यम् ॥ १६ ॥

परिस्फुट—स्वरूपाभासही अज्ञानविशिष्ट ज्ञानद्वारा आभासित होताहै, इस प्रकार आश्रय विज्ञान होनेसे, फिर अज्ञानानुभवका विरोध नही होता है, सुतरां अन्यत्राभिनिवेशहेतु ज्ञानाभावमेंही समानहीं हुआ अतएव उभयाभ्युपगत ज्ञानाभावही मैं अज्ञ, मुझे (अपनेको) और अन्यकोभी नहीं जानता, ऐसे अनुभवका विषय, यही अभ्युपगत (स्वीकार) हुआ ॥ १६ ॥

अस्तु तर्ह्यनुमानं विवादास्पदं प्रमाणाज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम् अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावादिति । तदपि न क्षोदक्षमम् अज्ञानेऽप्यनभिमताज्ञानान्तरसाधने अपसिद्धान्तापातात् तदसाधने अनैकान्तिकत्वात् दृष्टान्तस्य साधनविकलत्वाच्च न हि प्रदीपप्रभाया अप्रकाशितार्थप्रकाशकत्वं सम्भवति ज्ञानस्यैव प्रकाशकत्वात् सत्यपि प्रदीपे ज्ञानेन विषयप्रकाशसम्भवात् प्रदीपप्रभायास्तु चक्षुरिन्द्रियस्य ज्ञानं समुत्पादयतो विरोधिमन्तमसनिरसनद्वारेणोपकारकत्वमात्रमेवेत्यलमतिविस्तरेण ॥ १७ ॥

अतएव प्रमाणज्ञान अप्रकाशित अर्थका प्रकाशकत्व हेतु अन्धकारमें प्रथमोत्पन्न प्रदीप प्रभाकी नाई स्वप्रागभाव व्यतिरिक्त स्वविषयका आवरणभूत स्वसाध्य स्वदेशगत अन्य वस्तुपूर्वक होजानेसे अनुमान विवादास्पद हो ऐसा विचार योग्य नहीं होता । कारण यह है जो, ऐसा होनेपर अनभिमत ज्ञानान्तरका साधन होजानेसे अज्ञानमें अपसिद्धान्त आपत्तित होताहै एवं उस प्रकार ज्ञानान्तरके असाधनमें अनैकान्तिकत्व होता है । विशेषतः दृष्टान्त भी साधनहीन होता है । ज्ञानही प्रकाशक वस्तु यदि कहो, प्रदीप रहनेपर भी ज्ञानविषयको प्रकाश करता है, नही तो करता नहीं इसमें भी कोई हानि नहीं दीखती कारण, प्रदीपप्रभा, प्रकाशविरोधी अन्धकारके निरसनद्वारा ज्ञानोत्पादक दर्शनेन्द्रियका उपकारक होने मात्र है । इस सम्बन्धमें और अधिक विस्तारका प्रयोजन नहीं ॥ १७ ॥

प्रतिप्रयोगश्च विवादाध्यासितमज्ञानं न ज्ञानमात्रब्रह्माश्रितं अज्ञानत्वाच्छुक्तिकाद्यज्ञानवदिति । ननु शुक्तिकाद्यज्ञानस्याश्रयस्य प्रत्यगर्थस्य ज्ञानमात्रस्वभावत्वमेवेति चेन्मैवं शङ्किष्ठाः । अनुभूतिर्हि स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुणत्वापादकस्वभावा ज्ञानावगतिसङ्गतिविदाद्यपरनामा सकर्मकानुभवितुरात्मत्वं ज्ञानत्वमित्याश्रयणात् ॥ १८ ॥

विवादाध्यासित अज्ञान निजका अज्ञानत्वका हेतु शुक्तिकादि निष्ठ अज्ञानकी नाई ज्ञानमात्र ब्रह्माश्रित नहीं, इसप्रकार प्रतिप्रयोग किया जाता है । आश्रयभूत व्यापक शुक्तिकादि निष्ठ अज्ञान ज्ञानमात्र स्वभाव है या नहीं, ऐसी आशङ्का भी नहीं किये जाती । कारण यह है जो, अनुभूति स्वकीय सद्भाव द्वारा ही जिस किसी वस्तुकी व्यवहारानुकूलता सम्पादन करती है । इसप्रकार सम्पादन करना ही उसका स्वभाव है । उसका अपर नाम ज्ञान, अवगति, सङ्गति और वित् इत्यादि । वह एवं उसका सकर्म्मक अनुभवितका आत्मत्व और ज्ञानत्व स्वीकृत होता है, इसी कारण इसप्रकार सम्भावना नहीं किये जासक्ती ॥ १८ ॥

ननु ज्ञानरूपस्यात्मनः कथं ज्ञानगुणकत्वमिति चेत्तदसारं यदा हि मणिद्युमणिप्रभृति तेजोद्रव्यं प्रभावद्रूपेणावतिष्ठमानं प्रभाख्यगुणाश्रयः । स्वाश्रयादन्यत्रापि वर्त्तमानत्वेन रूपत्वेन च प्रभाद्रव्यरूपापि तच्छेषत्वनिबन्धनगुणव्यवहारा एवमयमात्मा स्वप्रकाशचिद्रूप एव चैतन्यगुणः ॥ १९ ॥

अवस्थिति करताहै तो प्रभारूपसे गुणाश्रय होता है । प्रभाभी अपना आश्रय छोड़कर अन्यत्र वर्त्तमान और रूप स्वरूप होता है । एवं तत्प्रयुक्त यह प्रभा द्रव्यरूप और तत् शेषत्वनिबन्ध गुण व्यवहारविशिष्ट होता है इस प्रकार, आत्मा प्रभाशाली चिद्रूप होकरही चैतन्य गुण होजाता है ॥ १९ ॥

तथा च श्रुतिः सदा सैन्धवघनोऽनन्तरो बाह्यः कृत्स्न रसघन एव एवं वा अरे अयमात्मानन्तरो बाह्यः कृत्स्नः प्रज्ञानघन एव अत्रायं पुरुषः स्वयं ज्योतिर्भवति न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते । अथ यो वेदेदं जिघ्राणेति स आत्मा योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष इत्यादिका श्रुतिरपि न चानृतेन हि प्रत्यूढा इति श्रुतिरपि विद्यापर्वप्रमाणमित्याश्रयितुं शक्यं ऋतेतरविषयो ह्यनृतशब्दः ऋतशब्दश्च कर्मवचनः ऋतं पिबन्ताविति वचनात् ऋतं कर्मफलाभिसन्धिरहितं परमपुरुषाराधनयैव तत्प्राप्तिफलम् । अत्र तद्व्यतिरिक्तसांसारिकाल्पफलं कर्मानृतं ब्रह्मप्राप्तिविरोधि य एतं ब्रह्मलोकं न विदन्ति अनृतेन हि प्रत्यूढा इति वचनात् ॥ २० ॥

और उसी प्रकार श्रुतिमेभी कहा है । कि यह आत्मा सर्व्वदा सैन्धवकी नाईं घनस्वरूप है । उसका भीतर भी नही, बाहिर भी नही । वह कृत्स्न अर्थात् सर्व स्वरूप और रस घन अर्थात् सम्पूर्ण रसके परिपूर्ण आधारस्वरूप है । पुनः कहा है, यह आत्मा अन्तरशून्य बहिः शून्य, सर्व्व स्वरूप ही विज्ञानघन है (विज्ञानसे परिपूर्ण) पुनः कहा है, यह पुरुष (आत्मा) स्वयं ज्योतिः, विज्ञाताके विज्ञप्तिका लोप नहीं, वा होता नहीं, जो विज्ञानमय जो सम्पूर्ण प्राणोंमें विराजमान; जो हृदयमें अन्तर्ज्योति स्वरूप अधिष्ठित है, वही पुरुष अर्थात् आत्मा है यही आत्मा देखता है । सुनता है, रस अनुभव करता है, सूंघता है, मनन करता है, बोध करता है, कार्य्य करता है, विज्ञान ही इसका आत्मा है । इत्यादि श्रुति एवं अनृत द्वारा प्रत्यूढ इत्यादि श्रुतिभी विद्यापर्व्वका प्रमाण है, इस प्रकार स्वीकार करनेकी क्षमता नहीं और अनृत शब्द ऋतेतर विषय अर्थात् मिथ्या और ऋतकर्म्म वचन । कर्म्मफलकी अभिसन्धि त्यागपूर्वक परम पुरुषकी आराधना करही कर उसकी फल प्राप्ति होती है, इसी को ऋत कहते हैं इस स्थानमें उसको छोड़कर सांसारिक अल्पफलजनक कर्म्मका नाम

अनृत है । वह ब्रह्म मानिका विरोधी है । क्योंकि, इस प्रकार लिखा है, जो जो लोग इस ब्रह्मलोकको जानते हैं, वे लोग अमृतद्वारा मत्यूढ हैं ॥ २० ॥

मायान्तु प्रकृतिं विद्यादित्यादौ मायाशब्दो विचित्रार्थसर्गकत्रिगुणात्मकप्रकृत्यभिधायको नानिर्वचनीयाज्ञानवचनः ।

तेन मायासहस्रं तच्छंबरस्याशुगामिना ।
बालस्य रक्षता देहमेकैकं श्येनसूदितम् ॥ २१ ॥

मायाको प्रकृति जानना । इत्यादि स्थानमें भी माया शब्द विचित्रार्थका प्रयोजक त्रिगुणात्मिका प्रकृतिका वाचक, अनिर्वचनीय अज्ञान वचन नहीं है, शबरके बाणने लडकेके देहकी रक्षा कर श्यामको माराथा । ऐसी घटना माया सहस्रस्वरूप है ॥ २१ ॥

इत्यादौ विचित्रार्थसर्गसमर्थस्य पारमार्थिकस्यैवासुराद्यस्त्रविशेषस्यैव मायाशब्दाभिधेयत्वोपलम्भात् अतो न कदाचिदपि श्रुत्यानिर्वचनीयाज्ञानप्रतिपादनं नाप्यैक्योपदेशानुपपत्त्या तत्त्वपदयोः सविशेषब्रह्माभिधेयत्वेन विरुद्धयोर्जीवपरयोः स्वरूपैक्यस्य प्रतिपत्तुमशक्यतया अर्थापत्तेरनुदयदोषदूषितत्वात् । तथाहि तत्पदं निरस्तसमस्तदोषमनवधिकातिशयासङ्ख्येककल्याणगुणास्पदं जगदुदयविभवलयलीलं ब्रह्म प्रतिपादयति तदैक्षत बहु स्यां प्रजायेयेत्यादिषु तस्यैव प्रकृतत्वात् समानाधिकरणं त्वं पदं वा चिद्विशिष्टं जीवशरीरं ब्रह्माचष्टे प्रकारद्वयविशिष्टैकवस्तुपरत्वात् सामानाधिकरणस्य ॥ २२ ॥

प्रतिपाद्य है, उसने देखा जो, मैं बहुत होकर जन्म ग्रहण करूं, इत्यादि वाक्य परम्परामें उसीका प्रकृतत्व वशतः समानाधिकरण त्वं पदको अथवा चिद् विशिष्ट जीव शरीरको ब्रह्म कहते हैं। क्योंकि, जो प्रकारद्वय विशिष्ट एक वस्तुके निकट है, उसीको समानाधिकरण कहते हैं॥ २२॥

ननु सोऽयं देवदत्त इतिवत् तत्त्वमिति पदयोर्विरुद्धभागत्यागलक्षणयोर्निर्विशेषस्वरूपमात्मैक्यं समानाधिकरणार्थः किं न स्यात् यथा सोऽयमित्यत्र तच्छब्देन देशान्तरकालान्तरसम्बन्धी पुरुषः प्रतीयते इदंशब्देन च सन्निहितदेशवर्त्तमानकालसम्बन्धी तयोः सामानाधिकरण्ये नैक्यमवगम्यते। तत्रैकस्य युगपद्विरुद्धदेशकालप्रतीतिर्न सम्भवतीति द्वयोरपि पदयोः स्वरूपपरत्वे स्वरूपस्य चैक्यं प्रतिपत्तुं शक्यमेवमत्रापि किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धांशप्रहाणेनाखण्डस्वरूपं लक्ष्यते चेत् विषमोऽयमुपन्यासः॥ २३॥

यदि कहो जो, सो यही देवदत्त है इत्यादि वाक्यकी नाईं विरुद्धभाग त्यागलक्षण विशिष्ट तत् औरत्वं इन दो पदोंका जो निर्विशेष स्वरूप आत्मैक्य, उसीके अर्थमें सामानाधिकरण्य नही होगा क्यों? जिस प्रकार वही यही इत्यादि स्थलमें उसी शब्दसे देशान्तर और कालान्तर सम्बन्ध विशिष्ट पुरुषकी प्रतीति होती है, एवं इस शब्दसे सन्निहित देश और वर्त्तमान काल इन दोनोंके सहित जिसका सम्बन्ध है, उसीको समझाताहै। उसका निबन्धन सामानाधिकरण्य द्वारा दोनोंकी एकता जानी जाती है। उनमें एकका कभी युगपत् विरुद्ध देशकालप्रतीति साम्भवपर नहीं होता। इस कारण, दोनों शब्द स्वरूपपर होनेसे स्वरूपकी एकता प्रतिपादन करना शक्य होता है। उसी प्रकार यहांभी किञ्चित् ज्ञत्व और सर्व्वज्ञत्व इत्यादि विरुद्ध अंशका परित्याग द्वारा अखण्डस्वरूप लक्षित होता है। यह विषम उपन्यास है॥ २३॥

दृष्टान्तेऽपि विरोधवैधुर्य्येण लक्षणा गन्धासम्भवादेकस्य तावद् भूतवर्त्तमानकालद्वयसम्बन्धो न विरुद्धः। देशान्तरस्थितिर्भूता सन्निहितदेशस्थितिर्वर्त्तत इति देशभेदसम्बन्धविरोधश्च कालभेदेन परिहरणीयः। लक्षणापक्षेऽप्येकस्यैव पदस्य लक्षकत्वाश्रयणेन विरोधपरिहारे पदद्वयस्य लाक्षणिकत्वमस्वीकार्य्यं न

सङ्गच्छते । इतरथा एकस्य वस्तुनस्तत्तदन्ताविशिष्टत्वावगाहनेन प्रत्यभिज्ञायाः प्रामाण्यानङ्गीकारे स्थायित्वासिद्धौ क्षणभङ्गवादी बौद्धो विजयेत ॥ २४ ॥

दृष्टान्तपक्षमें विरोधकी सम्भावना एवं लक्षणका सम्पर्क मात्र नहीं इस कारण एक वस्तुके अतीत और वर्त्तमानरूप कालद्वय सम्बन्ध विरुद्ध नहीं होता । पूर्व्वमें देशान्तरमें स्थिति थी, इस समय भी सन्निहित देशमें स्थिति है, इसप्रकार देश-भेद-सम्बन्धविरोध परिहार किया जासकता है । लक्षणपक्षमें भी एकपक्षका लक्षकत्व संघटनवशात विरोधका परिहार हो जानेमें दोनों शब्दका लाक्षणिकत्व स्वीकार करना सङ्गत नही होसकता । अन्यथा एक वस्तुको सो यह कहकर ज्ञान नही करनेसे प्रत्यभिज्ञाका प्रामाण्य नहीं माना-जाता । इसप्रकार अङ्गीकार नही करनेसे, स्थायित्वकी असिद्धिवशात् क्षणभङ्गवादी बौद्ध हीका विजय होता है ॥ २४ ॥

एवमत्रापि जीवपरमात्मनोः शरीरात्मभावेन तादात्म्यं न विरुद्धमिति प्रतिपादितम् । जीवात्मा हि ब्रह्मणः शरीरतया प्रकारत्वात् ब्रह्मात्मकः य आत्मनि तिष्ठन्नात्मनोऽन्तरः य आत्मानं वेद यस्यात्मा शरीरम् इति श्रुत्यन्तरादत्यल्पमिदमुच्यते सर्वे शब्दाः परमात्मन एव वाचकाः । न च पर्य्यायत्वं द्वारभेदसम्भवात् । तथाहि जीवस्य शरीरतया प्रकारभूतानि देवमनुष्यादिसंस्थानानीव सर्वाणि वस्तूनीति ब्रह्मात्मकानि तानि सर्वाणि॥२५॥

अतः—
देवो मनुष्यो यक्षो वा पिशाचोरगराक्षसाः ।
पक्षी वृक्षो लता काष्ठं शिला तृणं घटः पटः ॥ २६ ॥

इसीकारण, देव, मनुष्य, यक्ष, पिशाच, उरग, राक्षस, पक्षी, वृक्ष, काष्ठ, शिला, तृण, घट और पट इत्यादि जो सब शब्द प्रकृति प्रत्ययके योगमें अभिधायक कहकर लोकमें प्रसिद्ध है, सो सब ही उसकी वाच्यतामें प्रतीयमान तत्तत्संस्थान विशिष्ट वस्तु सहायसे तदभिमानी जीव और उसका अन्तर्यामी परमात्मा पर्य्यन्त संस्थानका वाचक होता है। तत्त्वमुक्तावली और चतुरन्तर नामक ग्रंथमें देवादि शब्दोंका परमात्मा पर्य्यन्तत्व कहा है ॥ २६ ॥

इत्यादयः सर्वे शब्दाः प्रकृतिप्रत्यययोगेनाभिधायकतया प्रसिद्धा लोके तद्वाच्यतया प्रतीयमानतत्तत्संस्थानवद्वस्तुमुखेन तदभिमानिजीवतदन्तर्यामिपरमात्मपर्य्यन्तसंस्थानस्य वाचकाः । देवादिशब्दानां परमात्मपर्य्यन्तत्वमुक्तं तत्त्वमुक्तावल्यां चतुरन्तरे च ॥ २७ ॥

देवादि शब्द जीवका वाचक है । और निष्कर्ष अभिप्राययुक्त सब लौकिक और वैदिक प्रयोग, जीवसे अभिन्न सिद्ध भावाभिधान अर्थात् परमात्माका वाचक होता है । आत्मसम्बन्ध कालमें देव और मनुष्यादि मुक्तिविशिष्ट होकर जो अवस्थिति करता है, सो नहीं जाना जाता । वही जीवात्मा ही संसारमें अनुप्रवेशकर, नाम और रूप व्यक्त करता है ॥ २७ ॥

जीवं देवादिशब्दो वदति तदपृथक् सिद्धभावाभिधानं
निष्कर्षाकूतयुक्तो बहुरिह च दृढो लोकवेदप्रयोगः ॥
आत्मासम्बन्धकाले स्थितिरनवगता देवमर्त्यादिमूर्त्ति-
र्जीवात्मानुप्रवेशाज्जगति विभुरपि व्याकरोन्नामरूपे ॥

इत्यनेन देवादिशब्दानां शरीरपर्य्यन्तत्वं प्रतिपाद्य संस्थानैक्याद्यभाव इत्यादिना शरीरलक्षणं दर्शयित्वा शब्दस्तत्त्वस्वरूपप्रतिकृतिभिरित्यादिना विश्वेश्वरादपृथक्सिद्धत्वमुपपाद्य निष्कर्षाकूतेत्यादिना पद्येन सर्वेषां शब्दानां परमात्मपर्य्यन्तत्वं प्रतिपादितं तत् सर्वं तत एवावधार्य्यम् । अयमेवार्थः समर्थितो वेदार्थसंग्रहे नामरूपश्रुतिव्याकरणप्रसङ्गे रामानुजेन॥२८॥

यहां देवादि शब्दोंका शरीर पर्य्यन्तत्व प्रतिपादन कर, पीछे निष्कर्ष अभिप्राय इत्यादि शब्द प्रयोगद्वारा सब शब्दोंका परमात्मा पर्य्यन्तत्व जो प्रतिपादन किया गया है सो सब

ही परमात्मा है, ऐसा समझना वा निश्चय करना चाहिये । रामानुजने वेदार्थसंग्रह नामक ग्रंथमें नामरूप श्रुतिके व्याकरणका समय इसी प्रकारके अर्थका समर्थ न किया है ॥२८॥

किञ्च सर्वप्रमाणस्य सविशेषविषयतया निर्विशेषवस्तुनि न किमपि प्रमाणं समस्ति निर्विकल्पकप्रत्यक्षेऽपि सविशेषमेव वस्तु प्रतीयते । अन्यथा सविकल्पके सोयमिति पूर्वप्रतिपन्नप्रकारविशिष्टप्रतीत्यनुपपत्तेः ॥ २९ ॥

पुनः समुदाय प्रमाण सविशेष कहकर ब्रह्मरूप निर्विशेष वस्तुमें कोई प्रमाणही नही स्थान पाता है, जो वस्तु सविशेष है, वही निर्विकल्प प्रत्यक्ष प्रतीत होता है उसके न होनेसे सविकल्पक वस्तुमें वही इत्यादि पूर्व सिद्ध प्रकार विशिष्ट प्रतीतिकी अनुपपत्ति सम्भव होती है ॥ २९ ॥

किञ्च तत्त्वमस्यादिवाक्यं न प्रपञ्चस्य बाधकं भ्रान्तिमूलकत्वात् । भ्रान्तिप्रयुक्तरज्जुसर्पबाधयवत् नापि ब्रह्मात्मैक्यज्ञानं निवर्त्तकं तत्र प्रमाणाभावस्य प्रागेवोपपादनात् । न च प्रपञ्चस्य सत्यत्वप्रतिष्ठापनपक्षे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाव्याकोपः प्रकृतिपुरुषमहदहङ्कारतन्मात्रभूतेन्द्रियचतुर्दशभुवनात्मकब्रह्माण्डतदन्तर्वर्तिदेवतिर्य्यङ्मनुष्यस्थावरादिसर्वप्रकारसंस्थानसंस्थितं कार्य्यमपि सर्वं ब्रह्मैवेति कारणभूतब्रह्मात्मज्ञानादेव सर्वविज्ञानं भवतीत्येकविज्ञानेन सर्वविज्ञानस्योपपन्नतरत्वात् ॥३०॥

अपिच ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वे सर्वस्यासत्त्वादेवैक विज्ञानेन सर्वविज्ञानं बाध्येत । नामरूपविभागेनेहसूक्ष्मदशावत् प्रकृतिपुरुषशरीरं ब्रह्मकारणावस्थं जगतस्तदापत्तिरेव प्रलयः नामरूपविभागविभक्तस्थूलचिदचिद्वस्तुशरीरं ब्रह्मकार्य्यावस्थं ब्रह्मणस्तथाविधस्थूलभावश्च सृष्टिरित्यभिधीयते ॥ ३१ ॥

पुनः ब्रह्मव्यतिरिक्त सबही वस्तु मिथ्या एवं सबही सत्वहीन इसप्रकार एक विज्ञानद्वारा सर्व्वविज्ञान बाधित होता है नामरूप विभागके अनुपयुक्त सूक्ष्म दशाविशिष्ट प्रकृति पुरुष शरीर ब्रह्मकारणमें अवस्थित करता है । उसके आपत्तिकोही जगतका प्रलय कहते हैं और नाम, रूप, विभाग, विभक्त, स्थूलस्वरूप, चिद्वस्तु, शरीर ब्रह्मकार्य्यमें प्रतिष्ठित हैं । ब्रह्मके उस प्रकार स्थलभावकोही सृष्टि कहते हैं ॥ ३१ ॥

एवञ्च कार्य्यकारणयोरनन्यत्वमप्यारम्भणाधिकरणे प्रतिपादित-मुपपन्नतरं भवति । निर्गुणवादाश्च प्राकृतहेयगुणनिषेधविषय-तया व्यवस्थिताः नानात्वनिषेधवादाश्च एकस्यैव ब्रह्मणः शरी-रतया प्रकारभूतं सर्वं चेतनाचेतनात्मकं वस्त्विति सर्वस्यात्म-तया सर्वप्रकारं ब्रह्मैवावस्थितमिति सर्वात्मकब्रह्मपृथग्भूतवस्तु सद्भावनिषेधपरत्वाभ्युपगमेन प्रतिपादिताः ॥ ३२ ॥

इसप्रकार, आरम्भणाधिकरणमें कार्य्य कारण दोनोंका जो अनन्यत्व कहा गया है, वही अच्छीप्रकार सिद्ध होता है । पुनः प्राकृत हेय गुणका निषेध विषयता वशात् जो निर्गुण-वाद प्रतिष्ठापित हुआ है, वह भी कहा गया । इस प्रकार सब ही चेतनाचेतनात्मक वस्तु एकमात्र ब्रह्मका शरीररूप कहकर, उसीका प्रकारभूत एवं ब्रह्मही सबका आत्मा कहकर सब प्रकारसे अवस्थित हैं, इत्यादि विधानसे सर्व्वजनक ब्रह्मसे पृथग् भूतवस्तुका निषेध परत्व स्वीकारद्वारा ब्रह्मका सर्व्वात्मकत्व उपपादित होता है ॥ ३२ ॥

किमत्र तत्त्वं भेदः प्रभेदः उभयात्मकं वा सर्वशरीरतया सर्वप्र-कारं ब्रह्मैवावस्थितमित्यभेदोऽभ्युपेयते एकमेव ब्रह्मनानाभूतचि-दचित्प्रकारं नानात्वेनावस्थितमिति भेदाभेदौ चिदचिदीश्व-राणां स्वरूपस्वभाववैलक्षण्यादसंकराच्च भेदः ॥ ३३ ॥

इससमय इसविषयमें असल तत्त्व क्या है ? भेद या अभेद, अथवा भेदाभेद दोनों ही किम्वा सब ही मङ्गनतत्त्व है ? उनमें सर्व्वात्मकता वशात् ब्रह्म ही सब प्रकारसे अवस्थित

है, इसके द्वारा अभेद अभ्युपेत होता है। पुनः, एकमात्र ब्रह्महीं नानाभूत और चित् और अचित् प्रकारसे नानात्ववशात् विराजमान होता है, इसका द्वारा भेदाभेद प्रतिपादित होता है। चित्. अचित् और ईश्वर इन सबका स्वरूप और स्वभावका वैलक्षण्य एवं असङ्कर वशात् भेद प्रसिद्ध है ॥ २३ ॥

तत्र चिद्रूपाणां जीवात्मनामसङ्कुचितापरिच्छिन्ननिर्मलज्ञानरूपाणामनादिकर्मरूपाविद्यावेष्टितानां तत्तत्कर्मानुरूपज्ञानसङ्कोचविकाशो भोग्यभूता चित् भोक्ता संसर्गः तदनुगुणसुखदुःखोपभोगद्वयवत् कृता भगवत्प्रतिपत्तिः भगवत्पदप्राप्तिरित्यादयः स्वभावाः। अचिद्वस्तूनान्तु भोग्यभूतानामचेतनत्वमपुरुषार्थत्वं विकारास्पदत्वमित्यादयः परस्येश्वरस्य भोक्तृभोग्ययोरुभयोरन्तर्यामिरूपेणावस्थानमपरिच्छेद्यज्ञानैश्वर्य्यवीर्य्यशक्तितेजःप्रभृत्यनवस्थितिकातिशयासंख्येयकल्याणगुणगणता स्वसङ्कल्पप्रवृत्तस्वेतरसमस्तचिदचिद्वस्तुजातता स्वाभिमतस्वानुरूपैकरूपदिव्यरूपनिरतिशयविविधानन्तभूषणतेत्यादयः॥२४॥

इनमें जो असङ्कुचित, अपरिच्छिन्न और निर्मल ज्ञानस्वरूप एवं अनादि कर्मरूप अविद्यामें वेष्टित है, वही चिद्रूप जीवात्माके उस २ कर्म्मानुसार ज्ञानका सङ्कोच और विकास भोग्यभूत चित्तभोक्ता, संसर्ग एवं उसके अनुगुण सुखदुःखोपभोगद्वयके विहित भगवत् प्रतिपत्ति और तदीय पदप्राप्ति ये सब स्वभाव कहकर परिगणित है। भोग्यभूत अचिद् वस्तुगणकी अचेतनत्व अपुरुषार्थत्व और विकारास्पदीभूतत्त्व इत्यादि स्वभाव हैं। भोक्ता और भोग्य इन दोनोंके अन्तर्यामीरूपसे अविच्छिन्न ज्ञान, ऐश्वर्य्य, वीर्य्य, शक्ति और तेजःप्रभृति अतिशय असंख्येय कल्याण गुणगण विशिष्टता. स्वकीय संकल्पसे समुद्भूत आत्मभिन्न समस्त चिद् और अचिद् वस्तु सबका अधिष्ठातृता एवं स्वाभिमत स्वानुरूप, एकरूप, दिव्यरूप, निरतिशय, नानाविध और अनन्त भूषणोंसे अलङ्कार इत्यादि ईश्वरका स्वभाव ॥ २४ ॥

वेङ्कटनाथेन त्वित्थं निराटङ्कि पदार्थविभागः।

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदं तत्त्वमाहुः॥

द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ।

अन्त्यं प्रत्यक् पराक् च प्रथममुभयथा तत्र जीवेशभेदात्॥

नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥२५॥

वेङ्कटनाथनें इसप्रकार पदार्थ निर्णय किया है, द्रव्य और अद्रव्य प्रभेद वशात् तत्व दो प्रकारका है । द्रव्य और दो भागोंमें विच्छिन्न है । जैसे-जड़ और अजड़ । प्राक् और पराक् एवं जीव और ईश्वरभेदसे इन दोनोंके और यथाक्रमसे दो प्रकार हैं । कोई २ नित्या भूति और मति ये दो विभाग निर्देश करते हैं ॥ ३५ ॥

तत्र-

द्रव्यं नाना दशावत् प्रकृतिरिह गुणैः सत्त्वपूर्वैरुपेता
कालोऽब्दाद्याकृतिः स्यादणुरवगतिमान् जीव ईशोऽन्य आत्मा ।
संप्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव
ज्ञातुर्ज्ञेयावभासा मतिरिति कथितं संग्रहाद्द्रव्यलक्ष्म ॥
इत्यादिना ॥ ३६ ॥

उनमें द्रव्य विविध दशान्तर विशिष्ट, प्रकृति सत्त्वादि गुणोंसे अलंकृत है, काल भी शब्द प्रभृति आकृतिसम्पन्न है, जीव और ईश्वर आत्मा, उनमें जीव अणुस्वरूप और अनुभव स्वरूप है, जिसमें तीन गुणोंहीका आधिक्य है, उसका नाम नित्या भूति एवं जिसमें ज्ञाताका ज्ञेयविषयमें उपलब्धि उत्पन्न होती है, उसका नाम मति है । इसी संग्रहको सत्ता कहते हैं ॥ ३६ ॥

तत्र चिच्छब्दवाच्याजीवात्मानः परमात्मनः सकाशाद् भिन्नाः नित्याश्च । तथाच श्रुतिः, द्वा सुपर्णा सयुजा सखायेत्यादिका । अतएवोक्तं नानात्मानो व्यवस्थात इति । तन्नित्यत्वमपि श्रुतिप्रसिद्धम् ।

न जायते म्रियते वा विपाश्चि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे इति ॥ ३७ ॥

उनमें चिच्छब्दका वाच्य जीवात्मा परमात्मासे भिन्न और नित्यस्वरूप है । श्रुतिमें भी यह कहा है, कि दो पक्षी परस्पर समान और सखा हैं इत्यादि । उसका नित्यत्व भी श्रुति प्रसिद्ध । जैसे-इसका जन्म नहीं, मृत्यु नहीं, कभी होकर और होता नहीं । यह

जन्महीन, नित्य, शाश्वत और पुराणस्वरूप है । शरीरको हन्यमानत्वमें भी, यह मारा नहीं जाता ॥ ३७ ॥

अपरथा कृतप्रणाशाकृताभ्यागमप्रसङ्गः । अतएवोक्तं वीतरागजन्मादर्शनादिति । तदणुत्वमपि श्रुतिप्रसिद्धम् ।

वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पत इति ॥
आराग्रमात्रः पुरुषोऽणुरात्मा चेतसा वेदितव्य इति च ॥ ३८ ॥

फलतः नित्यत्व प्रभृति गुणका सन्निवेश न होनेसे, कृतप्रणाश और अकृताभ्यागम दोष संघटित होता है । उसका अणुत्व भी श्रुति प्रसिद्ध है । जैसे, एक केशके अग्रभागको १०० भागकर पुनः उस एक २ भागको सौ २ भाग करनेसे जो होगा वही जीवका स्वरूप जानना । इसप्रकार वह अणुस्वरूप है, पुरुषरूपी आत्मा एकमात्र चित्तका वेदनीय है ॥ ३८ ॥

अचिच्छब्दवाच्यं दृश्यं जडं जगत् त्रिविधं भोग्यभोगोपकरणभोगायतनभेदात् । तस्य जगतः कर्त्तोपादानं चेश्वरपदार्थः पुरुषोत्तमो वासुदेवादिपदवेदनीयः । तदप्युक्तम् ।

वासुदेवः परं ब्रह्म कल्याणगुणसंयुतः ।
भुवनानामुपादानं कर्त्ता जीवनियामक इति ॥ ३९ ॥

अचित् शब्दवाच्य दृश्यमान जड जगत् तीनों भाग विच्छिन्न जैसे, भोग्य, भोगोपकरण और भोगायतन । आदि पद वेदनीय ईश्वररूपी पुरुषोत्तम वासुदेवही इस जगत्का कर्त्ता और उपादान है । तथापि कहाहै, समुदाय कल्याणगुणसम्पन्न वासुदेवही परब्रह्म । [illegible] जो सम्पूर्ण भुवनोंका उपादान, कर्त्ता और सब जीवोंका नियामक है ॥ ३९ ॥

स एव वासुदेवः परमकारुणिको भक्तवत्सलः परमपुरुषस्तदुपासकानुगुणतत्तत्फलप्रदानाय स्वलीलावशादर्चाविभवव्यूहसूक्ष्मान्तर्यामिभेदेन पञ्चधावतिष्ठते । तत्रार्चा नाम प्रतिमादयः । रामाद्यवतारो विभवः । व्यूहश्चतुर्विधः वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धसंज्ञकः । सूक्ष्मं सम्पूर्णं षड्गुणं वासुदेवाख्यं परं ब्रह्म गुणा अपहतपाप्मत्वादयः । सोऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सः सत्यकामः सत्यसङ्कल्प इति श्रुतेः । अन्त-

र्यामीसकलजीवनियामकः य आत्मनि तिष्ठन्नात्मानमन्तरीय-मयतीति श्रुतेः तत्र पूर्वपूर्वमूर्त्युपासनया पुरुषार्थपरिपन्थिदुरि-तनिचयक्षये सत्युत्तरोत्तरमूर्त्युपास्त्यधिकारः । तदुक्तम्—

वासुदेवः स्वभक्तेषु वात्सल्यात् तत्तदीहितम् ।
अधिकार्य्यानुगुण्येन प्रयच्छति फलं बहु ॥ ४० ॥

वह परम कारुणिक और परम पुरुषरूपी है भक्तवत्सल वासुदेवही स्वकीय उपासक -मण्डलीके परम अभीप्सित तत्तत् फल प्रदान वासनामें अनन्य साधारण लीला रससे अर्चा, विभव, व्यूह, सूक्ष्म, अन्तर्यामी, भेदसे पांच प्रकारसे अधिष्ठित है । उनमें अर्चा शब्दसे प्रतिमादि विभव शब्दसे रामादि रूपमें अवतरण होना, व्यूह चार प्रकारका है, वासुदेव, सङ्कर्षण, प्रद्युम्न और अनिरुद्ध । सूक्ष्म शब्दसे षड्गुण पूर्ण वासुदेव नामक परब्रह्म । यहां गुण शब्दसे अपहत पाप्मत्व प्रभृति । जैसे श्रुतिमें कहा है, वही अपहत पाप्मा शोकहीन, रजोहीन, मृत्युहीन इत्यादि । इसप्रकार अन्तर्यामी शब्दसे सब जीवोंका नियामकरूपसे जो आत्मामें अधिष्ठित है । श्रुतिमें भी कहा है जो आत्मामें अन्तरसे अव-स्थित है । रहकर आत्माको नियन्त्रित करता है । उनमें पूर्व २ मूर्तिकी उपासनाद्वारा पुरुषार्थप्राप्तिके प्रतिकूल दुरित राशि दूर होनेपर उत्तरोत्तर मूर्तियोंकी उपासनामें अधिकार उत्पन्न होता है उसी प्रकार कहा भी है:—भगवान् वासुदेव स्वकीय भक्तोंके वात्सल्यवशात् अधिकारीके आनुगुण्यक्रमसे सबही अभीष्ट फलोंको प्रदान करते हैं ॥ ४० ॥

तदर्थं लीलया स्वीयाः पञ्च मूर्तीः करोति वै ।
प्रतिमादिकमर्चा स्यादवतारास्तु वैभवाः ॥ ४१ ॥

इसी कारण जो लीलारससे अपनी पांच मूर्तियोंका आविष्कार करते है । उनमें प्रति-मादिका नाम अर्चा रामादिका अवतार वैभव नामसे परिगणित है ॥ ४१ ॥

सङ्कर्षणो वासुदेवः प्रद्युम्नश्चानिरुद्धकः ।
व्यूहश्चतुर्विधो ज्ञेयः सूक्ष्मं सम्पूर्णषड्गुणम् ॥
तदेव वासुदेवाख्यं परं ब्रह्म निगद्यते ॥ ४२ ॥

सङ्कर्षण, वासुदेव, प्रद्युम्न और अनिरुद्ध ये चार प्रकारके व्यूह हैं । सूक्ष्म, सम्पूर्ण, षड्गुण विशिष्ट वही वस्तु वासुदेव परम ब्रह्म कहकर परिगणित होते हैं ॥ ४२ ॥

अन्तर्यामी जीवसंस्थो जीवप्रेरक ईरितः ॥
य आत्मनीतिवेदान्तवाक्यजालैर्निरूपितः ॥ ४३ ॥

जो जीवके भीतर रहकर उनकी प्रेरणा करे उसका नाम अन्तर्यामी है । वेदान्तकी बात परस्परमें विरुद्ध हैं जो इस प्रकार निरूपित हुआ है ॥ ४३ ॥

अर्चोपासनया क्षिप्ते कल्मषेऽधिकृतो भवेत् ॥
विभवोपासने पश्चाद् व्यूहोपास्तौ ततः परम् ।
सूक्ष्मे तदनुशक्तः स्यादन्तर्यामिणमीक्षितुमिति ॥ ४४ ॥

उनमें अर्चा वा प्रतिमादिकी उपासना करनेसे दुरित राशि दूर होतेहैं और उसके सहकारसे विभवोपासनामें अधिकार संघटन होता है। पश्चात् व्यूहके उपासनाका अधिकारी होजाता है। तदनंतर सूक्ष्मके उपासनाका सामर्थ्य होता है। पीछे अन्तर्यामीके साक्षात् करनेकी शक्ति समुद्भूत होती है ॥ ४४ ॥

तदुपासनञ्च पञ्चविधम् अभिगमनमुपादानमिज्या स्वाध्यायो योग इति श्रीपञ्चरात्रेऽभिहितम्। तत्राभिगमनं नाम देवतास्थानमार्गस्य संमार्जनोपलेपनादि। उपादानं गन्धपुष्पादिपूजासाधनसम्पादनम्। इज्या नाम देवतापूजनम्। स्वाध्यायो नाम अर्थानुसन्धानपूर्वको मन्त्रजपो वैष्णवसूक्तस्तोत्रपाठो नामसङ्कीर्त्तनं तत्त्वप्रतिपादकशास्त्राभ्यासश्च। योगो नाम देवतानुसन्धानम्। एवमुपासनाकर्मसमुच्चितेन विज्ञानेन दृष्टदर्शने नष्टे भगवद्भक्तस्य तन्निष्ठस्य भक्तवत्सलः परमकारुणिकः पुरुषोत्तमः स्वयाथात्म्यानुभवानुगुणानिरवधिकानन्तरूपं पुनरावृत्तिरहितं स्वपदं प्रयच्छति। तथाच स्मृतिः—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गता इति ॥ ४५ ॥

समुद्भावित विज्ञान योग सहाकारसे द्रष्टृ, दर्शन निवृत्त होनेपर भक्त वत्सल परम कारुणिक पुरुषोत्तम वासुदेव अपना याथात्म्य स्वरूपानुभवके अनुकूल, सब प्रकार सीमा विभाग विरहित, अनन्तस्वरूप एवं पुनर्जन्म विवर्जित स्वकीय पद भगवद्भक्त और उसके साथ से सक्त पुरुषोंको प्रदान करते हैं । और कहा है, मेरे शरणागत होनेसे महाजन परम संसिद्धिलाभपूर्व्वक, दुःखके निलय स्वरूप भंगुरभावापन्न पुनर्जन्मको प्राप्त नहीं होता ॥ ४५ ॥

स्वभक्तं वासुदेवोऽपि संप्राप्यानन्दमक्षयम् ।
पुनरावृत्तिरहितं स्वीयं धाम प्रयच्छतीति च ॥ ४६ ॥

वासुदेव अपने भक्तोंको अक्षय आनन्द एवं पुनरावृत्ति विरहित स्वीय धाम प्रदान करते हैं ॥ ४६ ॥

तदेतत् सर्वं हृदि निधाय महोपनिषन्मतावलम्बनेन भगवद्बोधायनाचार्य्यकृतां ब्रह्मसूत्रवृत्तिं विस्तीर्णामालक्ष्य रामानुजः शारीरिकमीमांसाभाष्यमकार्षीत् । तत्राथातो ब्रह्मजिज्ञासेति प्रथमसूत्रस्यायमर्थः । अत्र अथशब्दः पूर्वप्रवृत्तकर्माधिगमनानन्तर्य्यार्थः । तदुक्तं वृत्तिकारेण— वृत्तात् कर्माधिगमादनन्तरं ब्रह्म विविदिषतीति । अतः शब्दो हेत्वर्थः अधीतसाङ्गवेदस्याधिगततदर्थस्य विनश्वरफलात् कर्मणो विरक्तत्वाद्धेतोः स्थिरमोक्षाभिलाषुकस्य तदुपायभूतब्रह्मजिज्ञासा भवति । ब्रह्मशब्देन स्वभावतो निरस्तसमस्तदोषानवधिकातिशयासंख्येयकल्याण गुणः पुरुषोत्तमोऽभिधीयते ॥ ४७ ॥

इन सबको हृदयमें सम्यक् रूपसे स्थापन और उसके सहकारसे महोपनिषन्मत अनुसरण पूर्वक रामानुज भगवान्ने बोधायनाचार्य्य प्रणीत ब्रह्मसूत्र वृत्तिकी आलोडनाकर शारीरक मीमांसाका भाष्य प्रणयन किया है । उनने अनन्तर इस कारण ब्रह्मको जाननेके लिये इच्छा इत्यादि प्रथम सूत्रका अर्थ यह पूर्व्व प्रवृत्त कर्म्माधिगमनका आनन्तर्य्य समझानेके लिये यहां अथ शब्द प्रयोजित हुआ है । वृत्तिकारने भी वही कहा है । जैसे प्रवृत्त कर्म्माधिगमनका अनन्तर ब्रह्मको जाननेकी अभिलाषा होती है । इस कारण शब्दप्रयोगका भावार्थ यह है जो समुदायस्वाङ्गवेद अध्ययन और उनका अर्थ सम्यक् रूपसे प्रतिगमनकर, विनश्वर फल विशिष्ट कर्म्मकी विरक्ति उपस्थित होती है । इस कारण स्थिरपद लाभमें अभिलाषा हुई, उसके उपाय स्वरूप ब्रह्मको जाननेकी इच्छा प्रादुर्भूत होती है । ब्रह्म शब्दसे स्वभावतः समस्त

दोष विहीन, सब प्रकार अवधि शून्य अतिशय असंख्येय कल्याणगुणविशिष्ट पुरुषोत्तमको बोध करता है ॥ ४७ ॥

एवञ्च कर्मज्ञानस्य तदनुष्ठानस्य च वैराग्योत्पादनद्वारा चित्तकल्मषापनयनद्वारा च ब्रह्मज्ञानं प्रति साधनत्वेन तयोः कार्य्यकारणत्वेन पूर्वोत्तरमीमांसयोरेकशास्त्रत्वम् । अतएव वृत्तिकारा एकमेवेदं शास्त्रं जैमिनीयेन षोड़शलक्षणेनेत्याहुः । कर्मफलस्य क्षयित्वं ब्रह्मज्ञानफलस्य चाक्षयित्वं परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेत्यादिश्रुतिभिरनुमानार्थापत्युपबृंहिताभिः प्रत्यपादि । एकैकनिन्दया कर्मविशिष्टस्य ज्ञानस्य मोक्षसाधनत्वं दर्शयति श्रुतिः अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ततो भूय इव ते तमो य उ विद्यायां रताः । विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते इत्यादि ॥ ४८ ॥

इसप्रकार कर्मज्ञान और उसका अनुसन्धान इन दो विषयोंमें वैराग्यका उत्पादन और उसके सत्कारसे चित्त कलुष निःशेष करके निराकरण करनेके लिये परब्रह्म ज्ञानका प्रतिपादन होता है । तन्निबन्धन दोनो कारणोसे भावमें बद्ध होजानेसे, पूर्व्व मीमांसा और उत्तर मीमांसाका एक शास्त्रत्वसिद्ध होता है । इस कारण वृत्तिकारगणने कहा है, एकही शास्त्र जैमिनिप्रोक्त १६ लक्षणद्वारा कहा गया है । कर्म्मफलका क्षयशीलत्व और ब्रह्मज्ञान फलका अक्षयित्वकी परीक्षाकर श्रुतिमे एकैक निन्दाक्रमसे कर्म्मविशिष्ट ज्ञानका मोक्षसाधनत्व प्रदर्शित हुआ है । जैसे, लोग अविद्याका उपासक. वे लोग अन्धतममे प्रवेश करते है, जो लोग विद्यामें आसक्त उनकी भी ऐसी ही दशा होती है जो व्यक्तिविद्या और अविद्या दोनोके ज्ञाता है, सो अविद्याके सहित मृत्युको पारकर. विद्याबलसे मोक्ष लाभ करते हैं इत्यादि ॥ ४८ ॥

तदुक्तं पाञ्चरात्ररहस्ये—

स एव करुणासिन्धुर्भगवान् भक्तवत्सलः ।
उपासकानुरोधेन भजते मूर्तिपञ्चकम् ॥ ७१ ॥

तदर्चाविभवव्यूहसूक्ष्मान्तर्यामिसंज्ञकम् ।
यदाश्रित्यैव चिद्वर्गस्तत्तज्ज्ञेयं प्रपद्यते ॥ ५० ॥

इन पांच मूर्तियोंके नाम जैसे, अर्चा, विभव, व्यूह, सूक्ष्म और अन्तर्यामी हैं । चिन्मय, विग्रह भगवान् उस २ मूर्तिका आश्रयकर सबके अगोचर आविर्भूत होते हैं ॥ ५० ॥

पूर्वपूर्वोदितोपास्तिविशेषक्षीणकल्मषः ।
उत्तरोत्तरमूर्त्तीनामुपास्त्यधिकृतो भवेत् ॥ ५१ ॥

उनमें पूर्व्व २ मूर्तिकी उपासना करनेपर उसके प्रभावसे अशेष पापका निरास होकर उत्तरोत्तर मूर्तियोंकी उपासनाका अधिकार उत्पन्न होता है ॥ ५१ ॥

एवं ह्यहरहः श्रौतस्मार्त्तधर्मानुसारतः ।
उक्तोपासनया पुंसां वासुदेवः प्रसीदति ॥ ५२ ॥

इसप्रकार दिन दिन श्रौतस्मार्त्त धर्म्मके अनुसरणपूर्वक उक्तविधानसे उपासना करने पर, वासुदेव प्रसन्न होते हैं ॥ ५२ ॥

प्रसन्नात्मा हरिर्भक्त्या निदिध्यासनरूपया ।
अविद्यां कर्मसङ्घातरूपां सद्यो निवर्त्तयेत् ॥ ५३ ॥

भगवान् हरि निदिध्यासन रूपसे भक्ति करनेपर प्रसन्नचित्त होकर, क्रम २ से कर्म्मसंघातरूप अविद्याका सदा नाश करते हैं ॥ ५३ ॥

ततः स्वाभाविकाः पुंसां ते संसारातिरोहिताः ।
आविर्भवन्ति कल्याणाः सर्वज्ञत्वादयो गुणाः ॥ ५४ ॥

तब पुरुषका संसार तिरोहित और स्वभाव सिद्ध सर्व्वज्ञत्व प्रभृति कल्याण गुणपरम्पराका आविर्भाव होता है ॥ ५४ ॥

एवं गुणाः समानाः स्युर्मुक्तानामीश्वरस्य च ।
सर्वकर्तृत्वमेवैकं तेभ्यो देवे विशिष्यते ॥ ५५ ॥

इसप्रकार ईश्वर और भक्तलोग दोनोंका समान गुणका समावेश होता है । उनमें ईश्वर एकमात्र सर्वकर्तृत्वद्वारा उन सबकी अपेक्षा वैशिष्ट्य प्राप्त होते हैं ॥ ५५ ॥

मुक्तास्तु शेषिणि ब्रह्मण्यशेषे शेषरूपिणः ।
सर्वानश्नुवते कामान् सह तेन विपश्चितेति ॥ ५६ ॥

शेषरूपी भक्तगणमुक्तिलाभकर, वही शेषरूपी ब्रह्ममें लीन होकर, समुदायअभिलषित सिद्धि सम्भोग करते हैं ॥ ५६ ॥

तस्मात्तापत्रयातुरैरमृतत्वाय पुरुषोत्तमादिपदवेदनीयं ब्रह्म जिज्ञासितव्यमित्युक्तं भवति । प्रकृतिप्रत्ययैः प्रत्ययार्थं प्राधान्येन सह ब्रूत इतः स नोऽन्यत्रेति वचनबलादिच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधेयं तच्च ध्यानोपासनादिशब्दवाच्यं वेदनं न तु वाक्यजन्यमापातज्ञानं पदसन्दर्भश्राविणो व्युत्पन्नस्य विधानमन्तरेणापि प्राप्तत्वात्। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। आत्मेत्येवोपासीत विज्ञाय प्रज्ञां कुर्वीत अनुविद्य विजानातीत्यादिश्रुतिभ्यः । अत्र श्रोतव्य इत्यनुवादः अध्ययनविधिना साङ्गस्य ग्रहणे अधीतवेदस्य पुरुषस्य प्रयाजनवदर्थदर्शनात्तन्निर्णयाय स्वरसत एव श्रवणे प्रवर्त्तमानतया तस्य प्राप्तत्वात् । मन्तव्य इति चानुवादः श्रवणप्रतिष्ठार्थत्वेन मननस्यापि प्राप्तत्वादप्राप्ते शास्त्रमर्थवदिति न्यायात् । ध्यानञ्च तैलधारावदविच्छिन्नस्मृतिसन्तानरूपा वा स्मृतिः स्मृतिप्रतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष इति ध्रुवायाः स्मृतेरेव मोक्षोपायत्वश्रवणात् । सा च स्मृतिर्दर्शनसमानाकारा ॥ ८७ ॥

इस कारण तीनों तापोंसे आतुर पुरुषलोग अमृतत्व नामके निमित्त पुरुषोत्तम प्रभृति पदवेदनीय ब्रह्मजिज्ञासामें प्रवृत्त होंगे, यही कहा है । शास्त्रवाक्यानुसार इच्छाकी इष्यमाण प्रधानत्ववशात् इष्यमाण ज्ञान अर्जन करना कर्त्तव्य है यह ज्ञान, ध्यान और उपासनादि शब्दवाच्य, वेदनस्वरूप, वाक्यजनितके आपात ज्ञान नहीं । क्योंकि, पद सन्दर्भश्रवण परायण पुरुषका विधान व्यतिरेकके विना भी वह ज्ञान होता है । श्रुतिमें भी कहा है अरे ! आत्माका

इसप्रकार अविचलित स्मृतिका मोक्षोपायत्व प्रसिद्ध है । यह स्मृति साक्षात् दर्शनकी नाई, क्यों नहीं ॥ ५७ ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ५८ ॥

उसी परमात्माभगवान्का स्वरूप दृष्ट होनेपर, हृदयकी सब गांठें खुलजातीं सम्पूर्ण संशय नष्ट होजाते और सब कर्म्म क्षीण होजाते हैं ॥ ५८ ॥

इत्यनेनैकत्वात् । तथाच आत्मा वा अरे द्रष्टव्य इत्यनेनास्याद-र्शनरूपता विधीयते । भवति च भावनाप्रकर्षात् स्मृतेर्दर्शन रूपत्वम् । वाक्यकारेणैतत सर्वं प्रपञ्चितं वेदनमुपासनं स्यादि-त्यादिना । तदेव ध्यानं विशिनष्टि श्रुतिः—नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यस्त-स्यैष आत्मा विवृणुते तनूं स्वामिति । प्रियतम एव हि वरणीयो भवति यथायं प्रियतममात्मानं प्राप्नोति तथा स्वयमेव भगवान् प्रियतम इति भगवतैवाभिहितम् ॥ ५९ ॥

इत्यादिके साथ इस स्मृतिकी एकता है । और आत्मा वा अरे द्रष्टव्य अर्थात् आत्माका दर्शन करना चाहिये, इत्यादि वाक्यानुसार इसकी दर्शनं स्वरूपता कही गयी है । भावनाके प्रकर्षबलसे स्मृतिका दर्शन स्वरूपत्व घटता है । वाक्यकारने इन सबको प्रपञ्चित किया है, जैसे वेदनही उपासना इत्यादि श्रुतिमें इस ध्यानका विशेषरूपसे निर्देश किया है जैसे, यह आत्मा प्रवचन द्वारा नहीं पाया जाता, मेधाद्वारा भी पाया नहीं जाता, एवं बहुविध श्रुतद्वारा भी नहीं पाया जाता । जो [illegible] इसको वरण करता है, वही इसको पाता है । आत्मा उसीके निकट स्वकीय स्वरूप प्रकट करता है, इत्यादि । पुनः स्वयं भगवानहीने कहा है, आत्माही सबकी अपेक्षा प्रिय है । अतएव उसीको वरण करना चाहिये इत्यादि ॥ ५९ ॥

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते इति ॥ ६० ॥

गीता प्रभृतिमें कहा है कि जो [illegible] नित्य मनके अनुसार [illegible] सहकारसे पूर्ण प्रीतिसे मुझको भजता है, मैं उन [illegible] बुद्धियोग दान करता हूं; और [illegible] प्रभावसे मुझको प्राप्त होता है ॥ ६० ॥

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्ययेति च ॥ ६१ ॥

हे पार्थ ! वही परम पुरुष परमात्मा एकमात्र अनन्यभक्तिसे ही लभ्य होता है ॥ ६१ ॥

भक्तिस्तु निरतिशयानन्दप्रियानन्यप्रयोजनसकलेतरवैतृष्ण्यवज्ज्ञानविशेष एव । तत्सिद्धिश्च विवेकादिभ्यो भवतीति वाक्यकारेणोक्तं तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवान्निर्वचनाच्चेति । तत्र विवेको नामादुष्टादन्नात् सत्त्वशुद्धिः, अत्र निर्वचनम्—आहारशुद्धेः सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिरिति । विमोकः कामानभिष्वङ्गः शान्त उपासीतेति निर्वचनम् । पुनः पुनः संशीलनमभ्यासः निर्वचनञ्च स्मार्त्तमुदाहृतं भाष्यकारेण—सदा तद्भावभावित इति । श्रौतस्मार्त्तकर्मानुष्ठानं शक्तितः क्रिया क्रियावानेष ब्रह्मविदां वरिष्ठ इति निर्वचनम् सत्यार्जवदयादानादीनि कल्याणानि सत्येन लभ्यत इत्यादिनिर्वचनम् दैन्यविपर्य्ययोऽनवसादः नायमात्मा बलहीनेन लभ्यत इति निर्वचनम् तद्विपर्य्ययजा तुष्टिरनुद्धर्षः शान्तो दान्त इति निर्वचनम् ॥ ६२ ॥

जिसमें निरतिशय आनन्द है, जो सबहीका प्रिय है, जो अनन्य प्रयोजन विशिष्ट, एवं जिसके प्रभावसे सब इतर वस्तुमें वितृष्णाका उदय होता है । तादृश ज्ञान विशेषही भक्ति है । विवेकादिकी सहायतामें उसकी सिद्धि होती है । यह वाक्यकार कहते हैं । जैसे विवेक, विमोक, अभ्यास, क्रिया, अङ्कन, कल्याण, अनवसाद और अनुद्धर्ष एवं निर्व्वचन इन सब उपायोंसे भक्ति होती है । उनमें आत्मा दुष्ट अन्नसे सत्वशुद्धिका नाम विवेक है। इस विषयमें निर्व्वचन यह है, जो आहारशुद्धिसे सत्वशुद्धि एवं सत्वशुद्धिमे ध्रुवा स्मृति

तदेवमेवंविधनियमविशेषसमासादितपुरुषोत्तमप्रसादविध्वस्त-तमःस्वान्तस्य अनन्यप्रयोजनानवरतनिरतिशयप्रियवदात्मप्रत्ययावभासतापन्नध्यानरूपया भक्त्या पुरुषोत्तमपदं लभ्यत इति सिद्धम् । तदुक्तं यामुनेन—उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्य इति ज्ञानकर्मयोगसंस्कृतान्तःकरणस्येत्यर्थः ॥ ६३ ॥

एवंविध नियम विशेषके साहचर्य्यसे पुरुषोत्तमकी प्रसन्नता होनेपर, लोगोंके अन्तस्थ अन्धकार समूहका नाश होता है । तब, अनन्य प्रयोजन समेत निरवच्छिन्न निरतिशय प्रियतुल्य आत्मप्रभावके अवभास द्वारा ध्यानरूप भक्तिका उदय होता है, उसीमें वह पुरुषोत्तम पद लाभ होता है, यह सिद्ध हुआ । स्वयं यामुनने यही कहा है—जिसका अन्तः करण ज्ञान और कर्म्मयोग सहायसे सविशेष मार्जित और उन्नत हुआ है, वह व्यक्ति एकान्तिक आत्यान्तिक भक्तियोगद्वारा लाभ करता है, इत्यादि ॥ ६३ ॥

किं पुनर्ब्रह्म जिज्ञासितव्यमित्यपेक्षायां लक्षणमुक्तं जन्माद्यस्य यत इति । जन्मादीति सृष्टिस्थितिप्रलयं तद्गुणसंविज्ञानो बहुव्रीहिः अस्याचिन्त्यविविधरचनारच्यस्य नियतदेशकालभोगब्रह्मादिस्तम्बपर्य्यन्तक्षेत्रज्ञमिश्रस्य जगतः यतो यस्मात् सर्वेश्वरात् निखिलहेयप्रत्यनीकस्वरूपात् सत्यसङ्कल्पाद्यनवधिकातिशयासंख्येयकल्याणगुणात् सर्वज्ञात् सर्वशक्तेः पुंसः सृष्टिस्थितिप्रलयाः प्रवर्त्तन्त इति सूत्रार्थः ॥ ६४ ॥

किसलिये ब्रह्म जिज्ञासा करनी चाहिये, इस अपेक्षामें कहते हैं, कि वह परमेश्वर, निखिल हेय वस्तुके परिपन्थि स्वरूप, सत्यसङ्कल्प प्रभृत्ति अवधिशून्य अतिशय असंख्येय कल्याण गुणका आधार, सर्व्वज्ञ, सर्व्वशक्तिविशिष्ट पुरुषसे यह आचिन्त्य विविध रचना रच्य, नियत देश काल भोग ब्रह्मादि स्तम्ब पर्य्यन्त क्षेत्रज्ञ समेत जगत्का सृष्टि स्थिति प्रलय प्रवर्त्तित होता है इत्यादि ॥ ६४ ॥

इत्थम्भूते ब्रह्मणि किं प्रमाणमिति जिज्ञासायां शास्त्रमेव प्रमाणमित्युक्तं शास्त्रयोनित्वादिति । शास्त्रं योनिः कारणं प्रमाणं यस्य तच्छास्त्रयोनि तस्य भावस्तत्त्वं तस्माद् ब्रह्मज्ञानकारणा-

त्मज्ञानकारणत्वात् शास्त्रस्य तद्योनित्वं ब्रह्मण इत्यर्थः । न च ब्रह्मणः प्रमाणान्तरगम्यत्वं शङ्कितुं शक्यमतीन्द्रियत्वेन प्रत्यक्षस्य तत्र प्रवृत्त्यनुपपत्तेः नापि महार्णवादिकं सकर्तृकं कार्य्यत्वात् घटवत् इत्यनुमानस्य पूतिकूष्माण्डायमानत्वात् । तल्लक्षणं ब्रह्म, यतो वा इमानि भूतानीत्यादिवाक्यं प्रतिपादयतीति स्थितम् ॥ ६५ ॥

ब्रह्म जो एवं विध गुणविषय, उसका प्रमाण क्या ? इसके उत्तरमें कहते हैं, शास्त्रही उसका प्रमाण है । फलतः शास्त्रद्वारा ब्रह्मज्ञान और आत्मज्ञान दोनोंही विनिष्पादित होतें है । इसकारण शास्त्रही ब्रह्मकी योनि है, या नहीं, प्रमाण । इसके भिन्न ब्रह्मका अन्यविध प्रमाण शङ्का नहीं किसी जासकती । क्योंकि, वह अतीन्द्रिय है । इसकारण उसमें प्रत्यक्ष प्रवृत्ति सिद्ध नही होती । पुनः कार्य्यवशात् घटकी नाईं महासमुद्रादि भी कर्तृ विशेषसे समुत्पन्न हुआ है, इत्यादि अनुमान प्रति कूष्माण्डके तुल्य सदा हेयभावापन्न, इस कारण उसमें इसप्रकार अनुमानका भी किसी तरह अवसर नहीं । इस विषयमें श्रुति प्रमाण यह है जो, जिससे यह दृश्यमान भूत प्रपञ्च उत्पन्न हुआ है इत्यादि ॥ ६५ ॥

यद्यपि ब्रह्म प्रमाणान्तरगोचरतां नावतरति तथापि प्रवृत्तिनिवृत्तिपरत्वाभावसिद्धरूपं ब्रह्म न शास्त्रं प्रतिपादयितुं प्रभवतीति एतत्पर्य्यनुयोगपरिहारायोक्तं-तत्तु समन्वयादिति । तुशब्दः प्रसक्ताशङ्काव्यावृत्त्यर्थः तच्छास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवत्येव कुतः समन्वयात् परमपुरुषार्थभूतस्यैव ब्रह्मणोऽभिधेयतयान्वयादित्यर्थः । न च प्रवृत्तिनिवृत्त्योरन्यतरविरहिणः प्रयोजनशून्यत्वं स्वरूपपरेष्वपि पुत्रस्ते जातः नायं सर्प इत्यादिषु हर्षभयनिवृत्तिरूपप्रयोजनत्वं दृष्टमेवेति न किञ्चिदनुपपन्नम् । दिङ्मात्रमत्र प्रदर्शितं विस्तरस्तत्त्वाकरादेवावगन्तव्य इति विस्तरभीरुणोपरम्यत इति सर्वमनाकुलम् ॥ ६६ ॥

इति सर्वदर्शनसंग्रहे रामानुजदर्शनं समाप्तम् ॥ ४ ॥

ब्रह्मका शास्त्र प्रमाणकत्व सम्भव होता है। क्योंकि, ब्रह्म परम पुरुषार्थ स्वरूप है। सुतरां अभिधेयता वशात् उसके शास्त्रके सहित घनिष्ठ सम्बन्धकता है। प्रवृत्ति निवृत्ति इन दोमेंसे अन्यतर अभाव सत्त्वमें भी प्रयोजनका अभाव होता नहीं। तुम्हारा पुत्र उत्पन्न हुआ है, यह सर्प नहीं, इत्यादि स्थानमें हर्ष और भय निवृत्तिरूप प्रयोजनवत्ता दीख पड़ती है, सुतरां कुछ भी अनुपपन्न नहीं, इस स्थानमें दिङ्मात्र दिखलाया गया। आकरसे सविस्तार देखना चाहिये ॥ ६६ ॥

इति सर्व्वदर्शनसंग्रहमें रामानुजका दर्शन समाप्त हुआ ॥ ४ ॥

अथ पूर्णप्रज्ञदर्शनम् ॥ ५ ॥

तदेतद्रामानुजमतं जीवाणुत्वदासत्ववेदापौरुषेयत्वसिद्धार्थबोधकत्वस्वतःप्रमाणत्वप्रमाणत्रित्वपाञ्चरात्रोपजीव्यत्वप्रपञ्चभेदसत्यत्वादिसाम्येऽपि परस्परविरुद्धभेदादिपक्षत्रयकक्षीकारेण क्षपणकपक्षनिक्षिप्तमित्युपेक्षमाणः स आत्मा तत्त्वमसीत्यादेर्वेदान्तवाक्यजातस्य भङ्ग्यन्तरेणार्थान्तरपरत्वमुपपाद्य ब्रह्ममीमांसाविवरणव्याजेनानन्दतीर्थः प्रस्थानान्तरमास्थित। तन्मते हि द्विविधतत्त्वं स्वतन्त्रास्वतन्त्रभेदात्। तदुक्तं तत्त्वविवेके।

स्वतन्त्रमस्वतन्त्रञ्च द्विविधं तत्त्वमिष्यते।
स्वतन्त्रो भगवान् विष्णुर्निर्दोषोऽशेषसद्गुण इति ॥ १ ॥

जीवका अणुत्व, दासत्व, वेदका अपौरुषेयत्व, सिद्धार्थ बोधकत्व और स्वतः प्रमाण प्रमाणत्रित्व, पाञ्चरात्रोपजीव्यत्व, एवं प्रपञ्च भेद इत्यादि सब विषयमें रामानुजके इस मतके साथ एकता होनेपर भी, उसको परस्पर विरुद्ध भेदादि पक्षत्रयका स्वीकार किया गया है, इस कारणसे यह मत क्षपणक पक्ष निक्षिप्त समझकर उसमें उपेक्षा कर, आनन्द तीर्थने तत्त्वमसि आदि वेदान्त वाक्य परम्पराके भङ्गयन्तर क्रमसे अर्थान्तर परता उपपादित करके, ब्रह्ममीमांसा विवरण च्छलमें प्रस्थानान्तर व्यवस्थापित किया है। उनके मतमें स्वतन्त्र और अस्वतन्त्र भेदसे तत्त्व दो प्रकारका है। उनमें सम्पूर्ण दोष लेश परिशून्य, अशेष सद्गुण निलय भगवान् विष्णु स्वतन्त्र नामसे परिगणित हैं ॥ १ ॥

ननु सजातीयविजातीयस्वगतनानात्वशून्यं ब्रह्मतत्त्वमिति प्रतिपादकेषु वेदान्तेषु जागरूकेषु कथमशेषसद्गुणत्वं तस्य कथ्यत इति चेन्मैवं भेदप्रमापकबहुप्रमाणविरोधेन तेषां तत्र प्रामाण्यानुपपत्तेः। तथाहि प्रत्यक्षं तावदिदमस्माद्भिन्नमिति नीलपीतादेर्भेदमध्यक्षयति । अथ मन्येथाः किं प्रत्यक्षभेदमेवावगाहते किं वा धर्मिप्रतियोगिघटितम् ॥ २ ॥

यदि कहो कि, ब्रह्मतत्त्व सजातीय, विजातीय, स्वगत और नानात्वशून्य । सब वेदान्तोंने ऐसाही प्रतिपादन किया है उन सब वेदान्तोंके जागते हुए भी किस प्रकार उसका अशेष सद्गुणत्व कहा जासकता ? इसके उत्तरमें कहते हैं, भेद प्रमापक बहुविध प्रमाण विरोध वशात इसने सब वेदान्तोका इस विषयमे प्रामाण्यकी उपपत्ति नही होती । उसी प्रकार, इससे यह भिन्न इत्यादि विधानसे नील पीतादिका भेद निर्दिष्ट हुआ है । इस स्थानमें प्रत्यक्ष भेद या धर्मिप्रतियोगिघटित भेद कल्पित हुआहै । इसके उत्तरमें कहा जासकताहै, प्रत्यक्षभेद कल्पित होता नही क्योंकि धर्मिप्रति योगिकी प्रतिपत्ति व्यतिरेकसे तत्सापेक्ष भेदका अध्यवसाय सम्भाव्य नहीं होता ॥ २ ॥

न प्रथमः धर्मिप्रतियोगिप्रतिपत्तिमन्तरेण तत्सापेक्षस्य भेदस्याशक्याध्यवसायत्वात् । द्वितीयोऽपि धर्मिप्रतियोगिग्रहणपुरःसरं भेदग्रहणमथवा युगपत् तत्सर्वग्रहणम् । न पूर्वः बुद्धेर्विरम्य व्यापाराभावात् अन्योन्याश्रयप्रसङ्गाच्च । नापि चरमः कार्य्यकारणबुद्ध्योर्यौगपद्याभावात । धर्मिप्रतीतिर्हि भेदप्रत्ययस्य कारणं सन्निहितेऽपि धर्मिणि व्यवहितप्रतियोगिज्ञानमन्तरेण भेदस्याज्ञातत्वेनान्वयव्यतिरेकाभ्यां कार्य्यकारणभावावगमात् ॥ ३ ॥

पदार्थकी ज्ञानव्यतिरेक द्वारा कार्य्य कारणभाव अवगत होजाता हैं। उसके सहकारसे अन्वय और व्यतिरेक (Positine and Nigature) द्वारा कार्य्य कारण भाव अव-गत होजाता है ॥ ३ ॥

तस्मान्न भेदप्रत्यक्षं सुप्रसरमिति चेत् किं वस्तुस्वरूपभेदवादिनं प्रति इमानि दूषणान्युद्घुष्यन्ते किं धर्मिभेदवादिनं प्रति प्रथमे चोरापराधान्माण्डव्यनिग्रहन्यायापातः भवदभिधीयमानदूषणानां तद्विषयत्वात्। ननु वस्तुस्वरूपस्यैव भेदत्वे प्रतियोगिसापेक्षत्वं न घटते घटवत् प्रतियोगिसापेक्ष एव सर्वत्र भेदः प्रथत इति चेन्न प्रथमं सर्वतोविलक्षणतया वस्तुस्वरूपे ज्ञायमाने प्रतियोग्यपेक्षया विशिष्टव्यवहारोपपत्तेः। तथाहि परिमाणवटितं वस्तुस्वरूपं प्रथममवगम्यते पश्चात् प्रतियोगिविशेषापेक्षया ह्रस्वं दीर्घमिति तदेव विशिष्य व्यवहारभाजनं भवति ॥ ४ ॥

इस कारण, यदि कहो कि, भेद प्रत्यक्ष सुप्रसर नहीं तो इसको उत्तर कहा जावे, वस्तु स्वरूप भेद वादीको नही, धर्म्मि भेदवादीको दूषित करते हो ? यदि प्रथम होता है, तो चोरके अपराधसे माण्डव्य निग्रह न्यायसे संघटित होताहै। इसका कारण यह है जो, तुम्हारा प्रयोजित दूषण सब सर्व्वथा उसके अविषयीभूत । यदि कहो कि, वस्तु स्वरूपके ही भेदसे की नाई, प्रतियोगि सापेक्ष पक्षत्व संघटित नहीं होता । सर्व्वत्र प्रतियोगि सापेक्ष भेद प्रसिद्ध हैं। इसका उत्तर यह है, जो प्रथम सर्वतोभावसे वैलक्षण्य वशातः वस्तु स्वरूप परिज्ञात होनेपर, प्रतियोगीकी अपेक्षामें विशिष्ट व्यवहारकी उपपत्ति होती हैं । उसी प्रकार पश्चात् प्रतियोगि विशेषकी अपेक्षामें, ह्रस्व दीर्घ इत्यादि विशिष्ट व्यवहारका संघटन होता है ॥ ४ ॥

तदुक्तं विष्णुतत्त्वनिर्णये—न च विशेषणविशेष्यतया भेदसिद्धिः। विशेषणविशेष्यभावश्च भेदापेक्षधर्मिप्रतियोग्यपेक्षया भेदसिद्धिः भेदापेक्षञ्च धर्मिप्रतियोगित्वमित्यन्योन्याश्रयतया भेदस्यायुक्तिः पदार्थस्वरूपत्वाद्भेदस्येत्यादिना। अतएव गवार्थिनो गवयदर्शनान्न प्रवर्त्तन्ते गोशब्दञ्च न स्मरन्ति। न च नीरक्षीरादौ

स्वरूपे गृह्यमाणे भेदप्रतिभासोऽपि स्यादिति भणनीयं समानाभिहारादिप्रतिबन्धकबलाद्भेदभानव्यवहाराभावोपपत्तेः ॥ ५ ॥

सो विष्णुतत्त्वनिर्णयनामक पुस्तकमें कहा है:—जैसे विशेषण विशेष्यताद्वारा भेदकी सिद्धि नही होती । क्योंकि, विशेषण विशेष्यभाव भेद सापेक्ष । धर्म्मीके प्रतियोगीकी अपेक्षामें जैसे भेदकी असिद्धि होती है, धर्म्मके प्रतियोगित्व उसी प्रकार एकमात्र भेदसापेक्ष है इस प्रकार. परस्पर एक दूसरेका आश्रय भेद सिद्ध होजाता है । अतएव गवार्थी कभी गवयदर्शनमें प्रवृत्त नहीं होता; एवं गो शब्दका स्मरण नहीं करता । जल और दूधमें स्वरूप गृह्यमाण होनेपर भेद प्रतिभास होजाता, ऐसा भी नही कहा जासकता । क्योंकि समान अभिहारादि प्रतिबन्धक बलसे भेद ज्ञानका व्यवहाराभाव सिद्ध होजाता है ॥ ५ ॥

तदुक्तम्—

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्चेति ॥ ६ ॥

इसीप्रकार कहा है अतिदूर सामीप्य, इन्द्रियविघात, अनवस्थितचित्तता, सूक्ष्मत्त्व, व्यवधान, अभिभव और समान अभिहार, इन सब कारणोंसे यथावत् ग्रहणका व्यभिचार होजाता है ॥ ६ ॥

अतिदूराद् गिरिशिखरवर्त्तितर्वादौ अतिसामीप्याल्लोचनाञ्जनादौ इन्द्रियघाताद्विद्युदादौ मनोऽनवस्थानात् कामाद्युपप्लुतमनस्कस्य स्फीतालोकवर्त्तिनि घटादौ सौक्ष्म्यात् परमाण्वादौ व्यवधानात् कुड्याद्यन्तर्हिते अभिभवात् दिवा प्रदीपप्रभादौ समानाभिहारात् नीरक्षीरादौ यथावद् ग्रहणं नास्तीत्यर्थः ॥ ७ ॥

भवतु वा धर्मभेदवादस्तथापि न कश्चिद्दोषः धर्मिप्रतियोगित्वे धर्मभेदनानवसम्भवात् । न च धर्मभेदवादे तस्य तस्य भेदस्य भेदान्तरभेद्यत्वेनानवस्था दुरवस्था स्यादित्या-

स्थेयं भेदान्तरप्रसक्तौ मूलाभावात् भेदभेदिनौ भिन्नाविति व्यवहारादर्शनात् । न चैकभेदबलेनान्यभेदानुमानं दृष्टान्तभेदाविघातेनोत्थानदोषाभावात् । सोऽयं पिण्याकयाचनार्थं गतस्य खारिकातैलदातृत्वाभ्युपगम इव । दृष्टान्तभेदविमर्दे त्वनुत्थानमेव । न हि वरविघाताय कन्योद्वाहः । तस्मान्मूलक्षयाभावादनवस्था न दोषाय ॥ ८ ॥

अथवा धर्म्मभेदवाद स्वीकार करनेपर, यदि प्रतियोगी ग्रहण किया जावे, उसमें भी कोई दोष नहीं होसकता । क्योंकि, उसमें धर्म्मभेदकी प्रतीति होजाती है । धर्म्मभेदवाद सो उत्तरोत्तर भेदकी भेदान्तर भेद्यतावशात् अनवस्था या दुरवस्था भी आशङ्का किये जासकती है । क्योंकि, भेदान्तर प्रसङ्गसे मूलके अभाव वशतः भेद और भेदी दोनोंसे भिन्न होजाता है, इस प्रकार व्यवहार देखा जाता है । एक भेद द्वारा अन्य भेदका अनुमान नहीं हो सकता । क्योंकि, उनके दोषके अभाव हेतु दृष्टान्त भेदके अभिघात द्वारा उत्थान नहीं हो सकता । पिण्याक (तिलकातेल) माँगने गया, खारिका तैलका लेना स्वीकार करनेकी नाईं दृष्टान्त भेदके विमर्दनवशात अनुत्थान ही होजाता है । पुनः वरके नाशके लिये कन्याका विवाह नहीं होता । अतएव मूलके नाशके अभावके कारण अनवस्था हुई, वह दोषावह नहीं होता ॥ ८ ॥

अनुमानेनापि भेदोऽवसीयते । परमेश्वरो जीवाद्भिन्नः, तं प्रति सेव्यत्वात् यो यं प्रति सेव्यः स तस्माद्भिन्नः यथा भृत्याद्राजा । न हि सुखं मे स्यात् दुःखं मे न मनागपि इति पुरुषार्थमर्थयमानाः पुरुषाः स्थपतिपदं कामयमानाः सत्कारभाजो भवेयुः प्रत्युत सर्वानर्थभाजनं भवन्ति । यः स्वस्यात्मनो हीनत्वं परस्य गुणोत्कर्षञ्च कथयति स स्तुत्यः प्रीतः तावकरस्य तस्मा अभीष्टं प्रयच्छति । तदाह,

घातयन्ति हि राजानो राजाहमिति वादिनः ।
ददत्यखिलभोगांश्च स्वगुणोत्कर्षवादिनामिति ॥ ९ ॥

दूसरेके गुणोंकी प्रशंसा करता वह स्तुति करनेयोग्य प्रीत होकर उल्लिखित स्तोत्र करनेवालेके अभीष्टको पूरण करता है । इसीप्रकार कहा भी है,–

मैं राजा, इसप्रकारके वाक्य प्रयोग करनेमे प्रवृत्त व्यक्तियोंको राजालोग वध करते हैं । किन्तु स्वीयगुणोंको उत्तम कहनेवालोंको अखिल अभीष्ट प्रदान करदेते हैं ॥ ९ ॥

एवञ्च परमेश्वराभेदतृष्णाया विष्णोर्गुणोत्कर्षस्य मृगतृष्णिकासमत्वाभिधानं विपुलकदलीफललिप्सया जिह्वाच्छेदनं हरति एतादृशविष्णुविद्वेषणादन्धतमसप्रवेशप्रसङ्गात् । तत्तद् प्रतिपादितं मध्यमन्दिरेण महाभारततात्पर्य्यनिर्णये–

अनादिद्वेषिणो दैत्या विष्णोर्द्वेषो विवर्द्धितः ।
तमस्यन्धे पातयति दैत्यानन्धे विनिश्चयादिति ॥ १० ॥

इस प्रकार परमेश्वरकी अभेदवासनामें विष्णुके गुणोत्कर्षसे मृगतृष्णिकाके समान करनेपर. उसके प्रति ऐसा विद्वेष प्रकाश जनित अन्धतमस नरकमें प्रवेश करना पड़ता है । मध्यमन्दिर, महाभारत तात्पर्य निर्णयमें इस विषयको प्रतिपादन किया है । जैसे, दैत्यगण. बहुत दिनोंसे द्वेषभावमे प्रविष्ट है । विष्णुके प्रति उनका द्वेष बढ जानेसे, उनको अन्धतम नरक मिलागा ॥ १० ॥

सा च सेवा अङ्कननामकरणभजनभेदात्त्रिविधा । तत्राङ्कनं नारायणायुधादीनां तद्रूपस्मरणार्थमपेक्षितार्थसिद्ध्यर्थञ्च । तथाच शाकल्यसंहितापरिशिष्टम् ।

चक्रं बिभर्त्ति पुरुषोऽभितप्तं बलं देवानाममृतस्य विष्णोः ।
स याति नाकं दुरितावधूय विशन्ति यद् यतयो वीतरागाः ॥ ११ ॥

देवाय येन विधृतेन बाहुना सुदर्शनेन प्रयातान्समायन् ।
येनाङ्किता मनवो लोकसृष्टिं वितन्वन्ति ब्राह्मणास्तद्वहन्ति ॥ १२ ॥

पुनः कहा है कि, सुदर्शनचक्र बाहुमें धारण करनेसे मनुष्यजन्मसे निवृत्ति होजाती है। कहनेमें क्या, मनुगणने इस चक्रके अङ्कन सहायसे लोकोंकी सृष्टि कियी ॥ १२ ॥

तद्विष्णोः परमं पदं येन गच्छन्ति लाञ्छिताः ।
उरुक्रमस्य चिह्नैराङ्किता लोके सुभगा भवाम इति ॥ १३ ॥

इस चक्रसे चिह्नित होनेपर विष्णुके उस परमपदको प्राप्त होजाता है । हम लोग उसके सब चिह्नोंसे अङ्कित होनेपर संसारमें परम सौभाग्यशाली होंगे ॥ १३ ॥

अतप्ततनुर्नतदामो अश्नुते श्रितास इद्वहन्तस्तत्समासतेति तैत्तिरीयकोपनिषच्च । स्थानविशेषश्चाग्नेयपुराणे दर्शितः ।

दक्षिणे तु करे विप्रो बिभृयाच्च सुदर्शनम् ।
सव्येन शंखंच बिभृयादिति ब्रह्मविदो विदुरिति ॥ १४ ॥

तैत्तिरीयोपनिषदमें लिखा है, जो उसकी चक्रादिद्वारा शरीर इसप्रकार तपाकर चिह्नित न करनेपर उसके तेजकी स्फूर्त्ति नहीं होती । किस स्थानमें किस प्रकार वह २ चिह्न अङ्कित करना चाहिये सो अग्निपुराणमें विशेषरूपसे निर्देश किया है—जैसे,—ब्राह्मण दहिने हाथमें सुदर्शन और वामहस्तमें शंख धारण करे; वेद जाननेवाले ब्राह्मणके पक्षमें यह विधि विदित है॥ १४॥

अन्यत्र चक्रधारणे मन्त्रविशेषश्च दर्शितः ।
सुदर्शन महाज्वाल कोटिसूर्य्यसमप्रभ ।
अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय ॥ १५ ॥

अन्यत्र चक्र धारणके लिये मंत्र भी लिखा हैं जैसेः—हे सुदर्शन ! तुम प्रचण्ड ज्वाला युक्त परम्परासे है, । एवं करोडों सूर्यकी नाईं तुम्हारी प्रभा है । मैं अज्ञानान्ध हूं । अतएव मुझे विष्णुका वह अविनाशी मार्ग दिखलाओ ॥ १५ ॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते इति ॥ १६ ॥

हे पाञ्चजन्य ! तुम पूर्व्वमें समुद्रसे उत्पन्न हुए हो । भगवान् विष्णुने स्वयं तुम्हें धारण किया है सम्पूर्ण देवतागण तुझे नमस्कार करते हैं । तुमको प्रणाम करता हूं ॥ १६ ॥

नामकरणं पुत्रादीनां केशवादिनाम्ना व्यवहारः सर्वदा तन्नामानुस्मरणार्थम् । भजनं दशविधं वाचा सत्यं हितं प्रियं स्वाध्या-

यः कायेन दानं परित्राणं परिरक्षणं मनसा दया स्पृहा श्रद्धा चेति अत्रैकैकं निष्पाद्य नारायणे समर्पणं भजनम् ।

तदुक्तम्—

अङ्कनं नामकरणं भजनं दशधा च तदिति ॥ १७ ॥

नामकरण शब्दसे पुत्रादिका नाम केशवादिके नामसे रखनेका व्यवहार है । इसका उद्देश यह है जो, सदा उस परमेश्वरका नाम उस मार्गसे स्मरण रहेगा भजन दश प्रकारकाहै उनमें वाक्यसे सत्य, हित, प्रिय और स्वाध्याय ये चार प्रकारका है।अर्थात् असत्य बोलना, हित बात कहनी, प्रिय बात कहनी और वेद पाठ करना इसका नाम वाचिक भजन है । क्योंकि, भगवान् सत्य आदिके दास हैं। इसप्रकार दान, परित्राण और परिरक्षण भेदसे कायिक भजन तीनप्रकारका है । दरिद्रका दुःख मोचन; विपन्नका विपद् छुडाना, और शरणागतकी रक्षा करनी इत्यादि सदनुष्ठानसे भगवान् अवश्य ही प्रसन्न होते हैं । यही कायिक भजनको उद्देश्य है। इसी प्रकार मानसिक भजन भी तीन प्रकारका है । जैसे दया, स्पृहा और श्रद्धा । यहां स्पृहा शब्दसे विषय स्पृहा नहीं लेना: भगवान्के दासत्वमें ऐकान्तिक अभिलाषा है । इन सबको एक २ कर निष्पादन कर नारायणमें समर्पण करनेका नाम भजन है । उसीप्रकार कहा है। अङ्कन नामकरण और दशविध भजन इत्यादि ॥ १७ ॥

एवं ज्ञेयत्वादिनापि भेदोऽनुमातव्यः, तथा श्रुत्यापि भेदोऽवगन्तव्यः, सत्यमेतमनुविश्वे मदन्तिरातिं देवस्य गृणतो मघोनः सत्यासो अस्य महिमागृणे शवोयज्ञेषु विप्रराज्ये सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा मयि वारुण्यो मयि वारुण्यो मयि वारुण्य इति मोक्षानन्दभेदप्रतिपादक श्रुतिभ्यः ।

इदं ज्ञानमुपाश्रित्य मम सामर्थ्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ १८ ॥

जगद्व्यापारवर्जंप्रभुकरणासन्निहितत्वाच्चेत्यादिभ्यश्च । न च ब्रह्म विद् ब्रह्मैव भवतीति श्रुतिबलाज्जीवस्य पारमैश्वर्य्यं शक्यशङ्कं सम्पूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेदितिवत् संहितो भवतीत्यर्थपरत्वात् । ननु

प्रपञ्चो यदि वर्त्तेत निवर्त्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ १९ ॥

प्रभु करणका असान्निध्य वशात् वे केवल जगत्की सृष्टि नहीं करसकते । ब्रह्मको जीव जाननेसे, ब्रह्म होजाता हैं इत्यादि श्रुति प्रमाणसे जीवके जगत् सृष्टि प्रभृतिरूप उक्त प्रकार परमैश्वर्य संघटित होजाता है ऐसी शङ्का नहीं कियी जासकती तो, ब्राम्हणको भक्तिके सहकारसे विशेष विधानसे पूजा करनेपर, शूद्र ब्राम्हण होजाता है, इत्यादिके तुल्य, जीवका केवल बृंहित भाव सम्पन्न होता है । यदि कहो कि, इस प्रपञ्चके उत्पन्न होनेपर, अवगाही विनष्ट होगा । यह द्वैत मायामात्र है परमार्थतः अद्वैतही है ॥ १९ ॥

इति वचनात् द्वैतस्य कल्पितत्वमवगम्यत इति चेत् सत्यं भावमनभिसन्धायाभिधानात् । तथाहि यद्युत्पद्येत तर्हि निवर्त्तेत न संशयः । तस्मादनादिरेवायं प्रकृष्टः पञ्चविधो भेदप्रपञ्चः । न चायमविद्यमानो मायामात्रत्वान्मायेति भगवदिच्छोच्यते ।

इत्यादि वाक्यमें द्वैतको कल्पित कहकर बोध होता है । इसका उत्तर यह है जो, सत्यभावके अनभिसन्धान पूर्व्वक इस प्रकार कहागया है । उसी प्रकार यदि इस प्रपञ्चकी उत्पत्ति होती है, तो निवृत्ति होगी उसमें सन्देह नहीं । इसी कारण यह प्रकृष्ट पांच प्रकारकी भेदसे प्रपञ्च अनादि स्वरूप है । यह कभी मायाभाव कहकर विद्याभाव नहीं ह क्योंकि, मायाशब्दसे भगवान्की इच्छा निर्दिष्ट हुई है ।

महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येव तवेच्छानन्त कथ्यते ॥ २० ॥

माहामाया, अविद्या, सर्व्वलोक मोहिनी, नियति, प्रकृति और वासना, हे अनन्त । यह सब तुम्हारी इच्छा कहकर उद्दिष्ट हुआ है ॥ २० ॥

प्रकृतिः प्रकृष्टकरणाद्वासना वासयेद् यतः ।
अ इत्युक्तो हरिस्तस्य मायाऽविद्येति संज्ञिता ॥ २१ ॥

प्रकृष्टरूपसे करते हैं कहनेसे प्रकृति सबको वासित अर्थात् संसारमें लिप्त और आसक्त करती है । इसीकारण इसका नाम वासना है । अशब्दसे हरि । उसीकी माया कहनेसे इसका नाम अविद्या है ॥ २१ ॥

मायेत्युक्ता प्रकृष्टत्वात् प्रकृष्टे हि मया भिधा ।
विष्णोः प्रज्ञप्तिरेवैका शब्दैरेतैरुदीर्य्यते ॥
प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणा ॥ २२ ॥

प्रकृष्टत्ववशात् मायानाम हुआ है क्योंकि, प्रकृष्टका नाम माया है । विष्णुकी एक मात्र प्रज्ञप्तिही माया प्रकृति उल्लिखित शब्दोंका वाच्य होजाती है । क्योंकि, वह साक्षात् विज्ञप्तिरूप है । आत्मानन्दही प्रज्ञप्तिका लक्षण है ॥ २२ ॥

इत्यादिवचननिचयप्रामाण्यबलात् सैव प्रज्ञा मानत्राणकर्त्री च यस्य तन्मायामात्रं ततश्च परमेश्वरेण ज्ञातत्वाद्रक्षितत्वाच्च न द्वैतं भ्रान्तिकल्पितं, न हीश्वरे सर्वस्य भ्रान्तिः सम्भवति विशेषादर्शननिबन्धनत्वाद् भ्रान्तेः । तर्हि तद्व्यपदेशः कथमित्यत्रोत्तरम् अद्वैतं परमार्थत इति परमार्थापेक्षया तेन सर्वस्मादुत्तमस्य विष्णुतत्त्वस्य समाभ्यधिकशून्यत्वमुक्तं भवति । तथाच परमा श्रुतिः—

जीवेश्वरभिदा चैव जडेश्वरभिदा तथा ।
जीवभेदो मिथश्चैव जडजीवभिदा तथा ॥ २३ ॥

मिथश्च जड़भेदो यः प्रपञ्चो भेदपञ्चकः।
सोऽयं सत्योऽप्यनादिश्च सादिश्चेन्नाशमाप्नुयात् ॥ २४ ॥

और जड़भेद, ये पांच प्रकारका भेद भेद प्रपञ्च सत्य और अनादि है । अनादि न होनेसे, विनाशको प्राप्त होता ॥ २४ ॥

न च नाशं प्रयात्येष न चासौ भ्रान्तिकल्पितः।
कल्पितश्चेन्निवर्त्तेत न चासौ विनिवर्त्तते ॥ २५ ॥

किन्तु इसका कभी विनाश नहीं होता, एवं यह किसी प्रकार भ्रान्तिकल्पित भी नहीं यदि कल्पित होता, तो इसकी निवृत्तिभी होती ॥ २५ ॥

द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम्।
मतं हि ज्ञानिनामेतन्मितं त्रातं हि विष्णुना ॥
तस्मान्मात्रमिति प्रोक्तं परमो हरिरेव त्वित्यादि ॥ २६ ॥

जो लोग कहते हैं कि द्वैत विद्यमान नहीं, वे लोग अज्ञानी है, यह ज्ञानियोंका मत है। स्वयं विष्णुने इसका मान और त्राण विधान किया है ॥ २६ ॥

तस्माद्विष्णोः सर्वोत्कर्ष एव तात्पर्य्यं सर्वागमानाम्। एतदेवाभिसन्धायाभिहितं भगवता–

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ २७ ॥

इत्यादि कारणसे विष्णुको सर्वोत्कर्षही सब शास्त्रोंका तात्पर्य्य है इसी प्रकार अभिसन्धान कर भगवाननें कहा है इस संसारमें दो पुरुष हैं क्षर और अक्षर सब भूत क्षर शब्दका वाच्य है और, स्वयं कूटस्थको अक्षर कहते हैं ॥ २७ ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ २८ ॥

इन क्षर और अक्षरसे सर्व्वथा भिन्न उत्तम पुरुषको परमात्मा कहते हैं। वह अव्यय स्वरूप साक्षात् ईश्वर है। लोकत्रयमें अनुप्रवेशपूर्व्वक उसको धारण करते हैं ॥ २८ ॥

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ २९ ॥

जिस कारण, मैं क्षरके अतीत और अक्षरकी अपेक्षा भी उत्तम इसीसे लोक और वेद में पुरुषोत्तम कहकर प्रसिद्ध हूं ॥ २९ ॥

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारत ॥ ३० ॥

जो व्यक्ति सर्व्वथा मोहके बहिष्कृत एवं इसी कारण मुझको उत्तम पुरुष कहकर लोग जानते हैं । वही सर्व्वज्ञ और वही सर्व्वतोभावसे भजन सेवा करता है ॥ ३० ॥

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।
एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेति ॥ ३१ ॥

तुम सर्व्वथा निष्पापी इसी कारण तुम्हारे निकट अतीव गोपनीय यह शास्त्र कहा है । इसको जाननेहीसे लोकमें बुद्धिमान् होकर एवं कृतकृत्यता भी लाभ करता है ॥ ३१ ॥

महावराहेऽपि—
मुख्यश्च सर्ववेदानां तात्पर्य्यं श्रीपतौ परे ।
उत्कर्षे तु तदन्यत्र तात्पर्य्यं स्यादवान्तरमिति ॥ ३२ ॥

महावराहपुराणमे भी कहा है:—परमात्मारूपी श्रीपतिमेंही एक मात्र सबका मुख्यतात्पर्य्य है इससे भिन्न उत्कर्षमें अवान्तर अर्थात् गौण तात्पर्य्य है ॥ ३२ ॥

मुक्तौश्च विष्णोः सर्वोत्कर्षे महातात्पर्य्यम् । मोक्षो हि सर्वपुरुषार्थोत्तमः । धर्मार्थकामास्त्वनित्याः । मोक्ष एव नित्यः । तस्मान्नित्यं तदर्थाय यतेत मतिमान्नर इति भाल्लवेयश्रुतेः । मोक्षश्च विष्णुप्रसादमन्तरेण न लभ्यते । यस्य प्रसादात् परमा यत्स्वरूपात् संसारान्मुच्यते नावरैस्सुरा नाराधयन्तोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मादिति नारायणश्रुतेः ।

तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं
धर्मार्थकामैरलमल्पकास्ते ।
समाश्रिताद् ब्रह्मतरोरनन्तात्
निःसंशयं मुक्तिफलं प्रयाति इति ॥ ३३ ॥

एवं जिससे संसारकी निवृत्ति संघटित, इस कर्म्मपाशसे मुक्तिकाम पुरुषगण उस परमेश्वररूप विष्णुहीकी चिन्ता करे उसके प्रसन्न होनेसे इस संसारमें और क्या अलभ्य होसकता ? सब प्रकारका अर्थ काम तो सामान्य बात है । सुतरां उन लोगों और वस्तुओंसे प्रयोजन ही क्या रहा अनन्तस्वरूप ब्रह्मरूप गुरुके आश्रय लेनेसे, मुक्तिफल लाभ होजाता, उसमें सन्देह नहीं ॥ ३३ ॥

विष्णुपुराणोक्तेश्च । प्रसादश्च गुणोत्कर्षज्ञानादेव नाभेदज्ञानादित्युक्तम् । न च तत्त्वमस्यादितादात्म्यव्याकोपः श्रुतितात्पर्य्यापरिज्ञानविजृम्भणात् ।

आह नित्यपरोक्षन्तु तच्छब्दो ह्यविशेषितः ।
त्वंशब्दश्चापरोक्षार्थं तयोरैक्यं कथं भवेत् ॥ ३४ ॥

विष्णुपुराणमें भी इसप्रकार कहाहै । फलतः उसके गुणोत्कर्षके ज्ञान होनेही पर, उसकी प्रसन्नता संग्रहमें समर्थ होजाता है । अभेद ज्ञानद्वारा कभी वह प्रसाद लाभ नहीं होता, यह कहागया है । श्रुतिके तात्पर्य्यका अपरिज्ञान विजृम्भणसे तत्त्वमस्यादि वाक्यके तादात्म्यका कहना व्यर्थ नहीं होता है । तत् शब्द नित्य परोक्षार्थ एवं त्व शब्दसे नित्य अपरोक्ष । सुतरां किस प्रकार दोनोंकी एकता होसकती? ॥ ३४ ॥

आदित्यो यूप इतिवत् सादृश्यार्था तु सा श्रुतिरिति ॥
तथाच परमा श्रुतिः—
जीवस्य परमैक्यञ्च बुद्धिसारूप्यमेव वा ।
एकस्थाननिवेशो वा व्यक्तिस्थानमपेक्ष्य वा ॥ ३५ ॥

आदित्ययूप, इस प्रकार सादृश्य अर्थहीमें यह श्रुति प्रयोजित होती है । और परमाश्रुतिमें कहा है:—जीवकी आत्यन्तिक एकता बुद्धिसारूप्य, एकस्थान निवेश व्यक्तिस्थानकी सापेक्ष है ॥ ३५ ॥

न स्वरूपैकता तस्य मुक्तस्यापि विरूपतः ।
स्वातन्त्र्यपूर्णतेऽल्पत्वपारतन्त्र्ये विरूपतेति ॥ ३६ ॥

एवं मुक्तिहोनेपर भी स्वरूपकी एकता नहीं होती । विरूपताही इसकी कारण है । स्वातन्त्र्य और पूर्णता एवं अल्पत्व और परतन्त्रता इसीका नाम विरूपता है इसमें ईश्वरकी विरूपता स्वातन्त्र्य और पूर्णता एवं जीवकी विरूपता अल्पत्व अर्थात् अपूर्णता एवं परतन्त्रता है ॥ ३६ ॥

अथवा तत्त्वमसीत्यत्र स एवात्मा स्वातन्त्र्यादिगुणोपेतत्वात् अतत्त्वमसि त्वं तत्र भवसि तद्रहितत्वादित्येकत्वमतिशयेन निराकृतम् । तदाह–

अतत्त्वमिति वा छेदस्तेनैक्यं सुनिराकृतमिति ॥ ३७ ॥

अथवा, तत्त्वमसि इत्यादि वाक्यमें ज्ञानही आत्मा स्वातन्त्र्यादि गुणयुक्तताबशात् तुम-वह नहीं इस प्रकार अर्थ योगद्वारा तद्विरहितत्व प्रयुक्त, एकत्व एकवार ही निराकृत हुआ है । उसी प्रकार कहा है अथवा अतत्व, इस प्रकार छेदवशतः सर्वतो भावसे-एकताका परिहार हुआ है ॥ ३७ ॥

तत्तस्मात् दृष्टान्तवनकेऽपि स यथा शकुनिः सूत्रेण बद्ध इत्यादिना भेद एव दृष्टान्ताभिधानाय अयमभेदोपदेश इति तत्त्ववादरहस्यम् । तथाच महोपनिषत्–

यथा पक्षी च सूत्रञ्च नानावृक्षरसा यथा ।
यथा नद्यः समुद्राश्च शुद्धोदलवणो यथा ॥ ३८ ॥

और उसी प्रकार महोपनिषद्में कहा है अथवा पक्षी और सूत्र जिसप्रकार परस्पर भिन्न विविध वृक्ष और रस जैसे परस्परपृथक् अथवा नदी नदी और समुद्रमें जिस प्रकार विशेषिता अथवा शुद्धजल और लवणजल इन दोनोमें जैसे पार्थक्य है ॥ ३८ ॥

चौरापहार्य्यौ च यथा यथा पुंविषयावपि ।
तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ ॥ ३९ ॥

जीव और ईश्वररूपी हरि ये दोनों परस्पर पृथक् भावसे ज्ञात होनेपर लोकमें मुक्त होता है, नहीं तो बद्ध होजाता है । ब्रह्मा, शिव और सुरादि जितने पदार्थ जात शरीरके क्षरण वशात क्षर नामसे प्रसिद्ध हैं । केवल, लक्ष्मीके देहका क्षरण नही होता, इस कारण वह अक्षरका वाच्य है । भगवान हरि इसकी अपेक्षा भी अक्षर स्वभाव हैं ॥ ४१ ॥

स्वातन्त्र्यशक्तिविज्ञानसुखाद्यैरखिलैर्गुणैः ॥
निःसीमत्वेन ते सर्वे तद्वशाः सर्वदेवता इति ॥ ४२ ॥

वह स्वतन्त्रता, सर्व्व कर्तृकता, विज्ञान और सुखादि निखिल गुणका आधार है । उसको इन सबगुणोंकी सीमा नहीं । सबही देवता उसके वशीभुत हैं ॥ ४२ ॥

विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः ।
निर्दुःखानन्दभुङ्नित्यं तत्समीपे स मोदते ॥ ४३ ॥

इस प्रकार सब गुणोंसे पूर्ण विष्णुको विदित होनेपर संसार विनिवृत्त होता है; सब दुःखोंका एक साथ निर्णय होता है; नित्य परमानन्द भोग होता है; एवं उसका सामीप्य लाभ होता है ॥ ४३ ॥

मुक्तानाञ्चाश्रयो विष्णुरधिकाधिपतिस्तथा ।
तद्वशा एव ते सर्वे सर्वदैव स ईश्वर इति च ॥ ४४ ॥

वह विष्णु मुक्तलोगोंके आश्रय एवं सबका अद्वितीय अधिपति है । वे लोग सब सदा उनके वशीभूत होजाते हैं । वही सबका ईश्वर है ॥ ४४ ॥

एकविज्ञानेन सर्वविज्ञानञ्च प्रधानत्वकारणत्वादिना युज्यते न तु सर्वमिथ्यात्वेन । न हि सत्ताज्ञानेन मिथ्याज्ञानं सम्भवति । यथा प्रधानपुरुषाणां ज्ञानाज्ञानाभ्यां ग्रामो ज्ञातः अज्ञात इत्येवमादिव्यपदेशो दृष्ट एव । यथा च कारणे पितरि ज्ञाते जानात्यस्य पुत्रमिति । अन्यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञानमित्यत्र एकपिण्डशब्दो वृथा प्रसज्येयातां मृदा विज्ञातयेत्येतावतैव वाक्यस्य पूर्णत्वात् ॥ ४५ ॥

प्रधानत्व और कारणत्व प्रभृतिवशात एक विज्ञान द्वारा सर्व्वथा सज्ञान होजाता है, परन्तु सबके मिथ्यात्वसे नही । और सत्ताज्ञान द्वारा मिथ्या ज्ञानसम्भव नहीं होता, जैसे प्रधानपुरुषका ज्ञान और अज्ञान द्वारा ग्राम ज्ञात और अज्ञात होता है, इसप्रकार व्यपदेश

दीखता है । पुनः कारण स्वरूप पिताको जाननेपर, उसके पुत्रको जानते हैं । सो नहीं होनेसे, हे सौम्य एक मृपिण्डके ज्ञानद्वारा सम्पूर्ण मृन्मय पदार्थ परिज्ञात होजाता है, इस स्थानमें एक और पिण्ड शब्द वृथा प्रयोजित होता है । क्योंकि एक मृत्पिण्डके ज्ञानसे, इस प्रकार न कहकर, मृत्तिकाके ज्ञानद्वारा ऐसा कहनेसे वाक्य पूरा होता है ॥ ४५ ॥

न च वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्येतत् कार्य्यस्य मिथ्यात्वमाचष्टे इत्येष्टव्यं वाचारम्भणं विकारो यस्य तत् अविकृतं नित्यं नामधेयं मृत्तिकेत्यादिकामित्येतद्वचनं सत्यमिति तथ्यस्य स्वीकारात्। अपरथा नामधेयमेवेति शब्दयोर्वैयर्थ्यं प्रसज्येत अतो न कुत्रापि जगतो मिथ्यात्वसिद्धिः । किञ्च प्रपञ्चो मिथ्येत्यत्र मिथ्यात्वं तथ्यमतथ्यं वा । प्रथमे सत्याद्वैतभङ्गप्रसङ्गः । चरमे प्रपञ्चसत्यत्वापातः । नन्वनित्यत्वं नित्यमनित्यं वा उभयथाप्यनुपपत्तिरित्याक्षेपवदयमपि नित्यसमजातिभेदः स्यात्। तदुक्तं न्यायनिर्वाणवेधसा—नित्यमनित्यभावादनित्यत्वोपपत्तेर्नित्यसम इति ॥ ४६ ॥

अन्यथा, नामधेयादि शब्दका वैयर्थ्य दोषकी उपपत्ति होती है । इस कारणसे कुत्रापि जगतकी मिथ्यात्व सिद्धि सम्भव नहीं । अधिक क्या प्रपञ्च मिथ्या. इस वाक्यमें मिथ्या शब्दका प्रयोग है, सो सत्य या असत्य है ? सत्य होनेपर, सत्य अद्वैतकी भंग प्रसक्ति

अस्याः संज्ञाया उपलक्षणत्वमभिप्रेत्याभिहितं प्रबोधसिद्धौ अन्वर्थित्वात्तूपरञ्जकधर्मसमेति। तस्मात् सदुत्तरमेतदिति चेत् अशिक्षितत्रासनमेतत् दुष्टत्वमूलानिरूपणात्। तद्द्विविधं साधारणमसाधारणञ्च। तत्राद्यं स्वव्याघातकं द्वितीयं त्रिविधं युक्ताङ्गहीनत्वमयुक्ताङ्गाधिकत्वमविषयवृत्तित्वञ्चेति। तत्र साधारणमसम्भावितमेव उक्तस्याक्षेपस्य स्वात्मव्यापनानुपलम्भात्। एवमसाधारणमपि घटस्य नास्तितोक्तावस्तित्ववत् प्रकृतेऽप्युपपत्तेः। ननु प्रपञ्चस्य मिथ्यात्वमभ्युपेयते नासत्त्वमिति चेत्तदेतत् सोऽयं शिरश्छेदेऽपि शतं न ददाति विंशतिपञ्चकन्तु प्रयच्छतीति शाकटिकवृत्तान्तमनुहरेत् मिथ्यात्वासत्वयोः पर्य्यायत्वादित्यलमतिप्रपञ्चेन॥ ४८॥

इस संज्ञाका उपलक्षणत्व अभिप्राय करके, प्रबोध सिद्धिमें कहा है; अर्थके आनुगुणवशतः प्रपञ्च मिथ्या है, यह माना जावे, किन्तु वह असत्व यह स्वीकार नहीं किया जासकता। इस बातके उत्तरमें माथ काटकर फेकनेसे भी, वह व्यक्ति १०० एक शत नहीं देगा; पांच वीस प्रदान करेगा, इस प्रकार शाकटिक वृत्तान्तके अनुहार किया जासकता है। क्योंकि; इसमें मिथ्यात्व और असत्व दोनोंका पर्य्याय है, जो हो, बहुत विस्तार करनेकी आवश्यकता नहीं॥ ४८॥

तत्राथातो ब्रह्मजिज्ञासेति प्रथमसूत्रस्यायमर्थः। तत्राथशब्दो मङ्गलार्थोऽधिकारानन्तर्य्यार्थश्च स्वीक्रियते। अतःशब्दो हेत्वर्थः।

तदुक्तं गारुडे—

अथातःशब्दपूर्वाणि सूत्राणि निखिलान्यपि।
प्रारभेत नियत्यैव तात्किमत्र नियामकम्॥ ४९॥

अधुना, अतः ब्रह्मजिज्ञासा, इस प्रथम सूत्रका अर्थ किया जाता है। अथ शब्दसे मङ्गल एवं अधिकारका आनन्तर्य बोध होता है। और अतः शब्दका अर्थ हेतु है। गरुड़ पुराण में लिखा है,—सबही सूत्र नियमानुसार अथ और अतः ये दो शब्द निन्यास सहकारसे आरम्भ करना होता है। इस विषयमें नियामक क्या है?॥ ४९॥

कश्चार्थस्तु तयोर्विद्वान् कथमुत्तमता तयोः ।
एतदाख्याहि मे ब्रह्मन् यथा ज्ञास्यामि तत्त्वतः ॥ ५० ॥

इन दोनोंका अर्थ क्या ? किस प्रकार या किस लिये इनका ऐसा उत्कर्ष सम्पन्न हुआ है ? ब्रह्मन् जिसमें मैं प्रकृत (असल) प्रस्ताव को भलीभाँति समझ सकूं, ऐसी रीतिसे कहियो ॥ ५० ॥

एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः ।
आनन्तर्य्याधिकारे च मङ्गलार्थे तथैव च ॥
अथशब्दस्त्वतः शब्दो हेत्वर्थे समुदीरित इति ॥ ५१ ॥

नारदके इस प्रकार पूछनेपर, ब्रह्माने उन्हें कहा कि, अथ शब्द मङ्गलार्थमें और अधिकारयो आनन्तर्यार्थ एवं अतः शब्द हेत्वर्थमें प्रयोजित होता है ॥ ५१ ॥

यतो नारायणप्रसादमन्तरेण न मोक्षो लभ्यते प्रसादश्च न ज्ञानमन्तरेण, अतो ब्रह्मजिज्ञासा कर्त्तव्येति सिद्धम् । जिज्ञास्यब्रह्मणो लक्षणमुक्तं जन्माद्यस्य यत इति । सृष्टिस्थित्यादि यतो भवति तद् ब्रह्मेति वाक्यार्थः । तथाच स्कान्दं वचः—

उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः ।
बन्धमोक्षौ च पुरुषाद्यस्मात् स हरिरेकराडिति ॥ ५२ ॥

जिस कारण, श्रीनारायणकी प्रसन्नता भी बिना मोक्ष नहीं होती एवं ज्ञान बिना उसकी प्रसन्नता भी नहीं होती इस कारण ब्रह्म जिज्ञासा कर्त्तव्य है, यह सिद्ध हुआ । जिज्ञास्य ब्रह्मका लक्षण भी कहते हैं । जन्माद्यस्य यत इति इसका अर्थ यह है जो जिससे सृष्टि स्थित्यादि सम्पादित होती है, वही ब्रह्म है । स्कन्द पुराणमें कहा है:—जिस पुरुषसे उत्पत्ति स्थिति, संहार, नियति, ज्ञान, आवृति, बन्ध, और मुक्ति समुत्पादित होती है, वही हरि एकमात्र प्रधान नियन्ता और प्रभु है ॥ ५२ ॥

यतो वा इमानीत्यादिश्रुतिभ्यश्च । तत्र प्रमाणमप्युक्तं शास्त्रयोनित्वादिति । नावेदविन्मनुते तं बृहन्तं तन्त्वौपनिषदमित्यादिश्रुतिभ्यः तस्यानुमानिकत्वं निराक्रियते । न चानुमानस्य स्वातन्त्र्येण प्रामाण्यमस्ति । तदुक्तं कौर्मे—

श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् ।
निश्चयात् साधयेदर्थं प्रमाणान्तरमेव च ॥ ५३ ॥

श्रुतिमें कहाहै कि जिससे यह दृश्यमान भूत प्रपञ्च उत्पन्न हुआहै, इत्यादि । इस विषयका प्रमाण भी निर्देश किया है । जैसे, शास्त्रयोनित्वात् इति जो व्यक्ति भेद नहीं जानता वह उस ब्रह्मस्वरूपको विचारमें समर्थ नहीं होता । इत्यादि श्रुतिद्वारा उसका अनुमानिकत्वका खण्डन हुआ है, विना श्रुतिकी सहायताके अनुमान कहीं भी नियम पूर्वक अर्थ साधनमें समर्थ एवं प्रमाणान्तर रूपसे परिगणित नहीं होता ॥ ९३ ॥

श्रुतिस्मृतिसहायं यत् प्रमाणान्तरमुत्तमम् ।
प्रमाणपदवीं गच्छेन्नात्र कार्य्या विचारणेति ॥ ९४ ॥

जो श्रुति और स्मृतिकी सहायता युक्त है वही उत्कृष्ट प्रमाणान्तर एवं वही प्रमाण मार्ग रूपमें परिगणित होता है इस विषय विचार करनेकी आवश्यकता नहीं ॥ ९४ ॥

शास्त्रस्वरूपमुक्तं स्कान्दे–
ऋग्यजुःसामाथर्वञ्च भारतं पाञ्चरात्रकम् ।
मूलरामायणञ्चैव शास्त्रमित्यभिधीयते ॥ ९५ ॥

प्रकृत शास्त्र किसको कहते हैं, स्कन्द पुराणमें सो कहा है । जैसे, ऋक्, यजु; साम, अथर्व, महाभारत, पाञ्चरात्र, मूल रामायण, इन्हीं सबको शास्त्र कहते हैं ॥ ९५ ॥

यच्चानुकूलने तस्य तच्च शास्त्रं प्रकीर्त्तितम् ।
अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तदिति ॥ ९६ ॥

जो इन सबके अनुकूल हों, वे भी शास्त्र नामसे कहे जाते हैं । अत एव अन्यप्रकारके विस्तारको शास्त्र नहीं कहते । वह कुमार्ग मात्र है ॥ ९६ ॥

तदनेनानन्यलभ्यः शास्त्रार्थ इति न्यायेन भेदस्य प्राप्तत्वेन तत्र न तात्पर्य्यं किन्त्वद्वैत एव वेदवाक्यानां तात्पर्य्यमिति अद्वैतप्रत्याशा प्रतिक्षिप्ता अनुमानादीश्वरस्य सिद्धाभावेन तद्भेदस्यापि ततः सिद्ध्यभावात् । तस्मान्न भेदानुवादकत्वमिति तत्परत्वमवगम्यते । अतएवोक्तम्--

सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणमिति ॥ ९७ ॥

उक्त वाक्यानुसार शास्त्रार्थ अनन्यलभ्य इस प्रकार न्यायानुसार भेद प्राप्तिहेतु उसमें तात्पर्य्य नहीं; किन्तु अद्वैतही वेदवाक्यका तात्पर्य्य है, इस प्रकार अद्वैत प्रत्याशाका प्रतिक्षेप

किया गया है । क्योंकि अनुमानद्वारा ईश्वर सिद्धिके अभाववशात उस भेद सिद्धिका भी अभाव होजाता है । इसी कारण, भेदानुवादकत्त्व तत्परत्त्व, कहकर परिगणित नहीं होता । इसी कारण कहा है ॥ ५७ ॥

शास्त्रस्य तत्र प्रामाण्यमुपपादितं तत्तु समन्वयादिति । समन्वय उपक्रमादिलिङ्गम् उक्तं बृहत्संहितायाम् ।

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय इति ॥ ५८ ॥

उसी स्थानमें शास्त्रका प्रामाण्य उपपादित हुआ है । जैसे, तत्तु समन्वयादिति यहां समन्वय शब्दसे उपक्रमादि लिङ्ग । बृहत् संहितामें कहा है, उपक्रम, उपसंहार, अभ्यास, अपूर्वता, फल, अर्थवाद, उपपत्ति इन सबके तात्पर्य्य निर्णयमें लिङ्ग स्वरूप अर्थात् इनके द्वारा तात्पर्य्य निर्णय करना होता है ॥ ५८ ॥

एवं वेदान्ततात्पर्य्यवशात् तदेव ब्रह्म शास्त्रगम्यमित्युक्तं भवति । दिङ्मात्रमत्र प्रादर्शि शिष्टमानन्दतीर्थभाष्यव्याख्यानादौ द्रष्टव्यं ग्रन्थबहुत्वभियोपरम्यत इति । एतच्च रहस्य पूर्णप्रज्ञेन मध्यमन्दिरेण वायोस्तदीयावतारम्मन्येन निरूपितमिति ॥ ५९ ॥

इस प्रकार वेदान्तके तात्पर्य्य वशतः वही ब्रह्म शास्त्रसे प्रतिपाद्य हो जाता है, यह कहा गया है । फलतः, प्रसङ्गतः दिङ्मात्र दिखलाया गया । अवशिष्ट आनन्द तीर्थके भाष्य और व्याख्यान प्रभृतिमें देखना चाहिये । ग्रन्थ विस्तार भयसे यहां निवृत्त हुआ । पूर्णप्रज्ञ मध्य मन्दिर अपनेको वायुका तीसरा अवतार समझते हैं । इन्होंने यह रहस्य निरूपण किया है ॥५९॥

प्रथमस्तु हनूमान् स्यात् द्वितीयो भीम एव च ।
पूर्णप्रज्ञस्तृतीयश्च भगवत्कार्य्यसाधक इति ॥
एतदभिप्रेत्य तत्र तत्र ग्रन्थसमाप्ताविदं पद्यं लिख्यते ।
यस्य त्रीण्युदितानि वेदवचने दिव्यानि रूपाण्यलं
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ ६० ॥

जैसेः—प्रथम हनुमान्, द्वितीय भीम, एवं तृतीय पूर्णप्रज्ञ भगवान्के कार्य्यसाधक हैं इस प्रकार अभिप्राय करके, सर्वत्रही ग्रन्थसमाप्तिमें निम्नलिखित पद्य लिखे२ रहते हैंः—वेदवचनमें उसका तीन प्रकार दिव्यरूप सविशेष समुदित हुआ है, रामभक्त हनूमान् उनमें प्रथम, भीम द्वितीय, एवं मध्यमन्दिर तृतीय हैं ॥ ॥ ६० ॥

एतत्पद्यार्थस्तु बलित्थातद्वपुलियाधि दर्शितं देवस्य भर्गः सहसो यतो जनीत्यादिश्रुतिपर्य्यालोचनयावगम्यत इति । तस्मात् सर्वस्य शास्त्रस्य विष्णुतत्त्वं सर्वोत्तममित्यत्र तात्पर्य्यमिति सर्वं निरवद्यम् ॥ ६१ ॥

इति सर्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शनम् समाप्तम् ॥ ५ ॥

जो हो, उल्लिखित कारणोंसे विष्णुतत्त्वही सबसे श्रेष्ठ है। इसी कारण, यही तत्त्व सब शास्त्रोंका तात्पर्य्य है। यह सर्व्वथा प्रतिपादित हुआ है ॥ ६१ ॥

इति सर्व्वदर्शनसंग्रहमें पूर्णप्रज्ञदर्शन समाप्त हुआ ॥ ५ ॥

अथ नकुलीशपाशुपतदर्शनम् ॥ ६ ॥

तदेतद्वैष्णवमतं दासत्वादिपदवेदनीयं परतन्त्रदुःखावहत्वान्न दुःखान्तादीप्सितास्पदमित्यरोचयमानाः पारमैश्वर्य्यं कामयमानाः पराभिहता मुक्ता न भवन्ति परतन्त्रत्वात् पारमैश्वर्य्यरहितत्वादस्मदादिवत् मुक्तात्मानश्च परमेश्वरगुणसम्बन्धिनः पुरपत्वे सति समस्तदुःखबीजविधुरत्वात् परमेश्वरवदित्याद्यनुमानं प्रमाणं प्रतिपद्यमानाः केचन माहेश्वराः परमपुरुषार्थसाधनपञ्चार्थप्रपञ्चनपरं पाशुपतशास्त्रमाश्रयन्ते। तत्रेदमादिसूत्रम्, अथातः पशुपतेः पाशुपतयोगविधिं व्याख्यास्याम इति । अस्यार्थः—अत्राथशब्दः पूर्वप्रकृतापेक्षः । पूर्वप्रकृतश्च गुरुं प्रति शिष्यस्य प्रश्नः। गुरुस्वरूपं गणकारिकायां निरूपितम् ।

पञ्चकास्त्वष्ट विज्ञेया गणश्चैकत्रिकात्मकः ।
वेत्ता नवगणस्यास्य संस्कर्त्ता गुरुरुच्यत इति ॥ १ ॥

उल्लिखित वैष्णवमतानुसार भगवानका दासत्वही करना होता है। सुतरां, वह परतन्त्र होनेसे दुःखजनक है । उसमें दुःखका अन्त होता नहीं इसी कारण उसकी [illegible]

चाहना नहीं होती । ऐसी विवेचना करनेमें उसमें रुचि नहीं होती; विशेषतः जो लोग हम लोगोंके तुल्य परमैश्वर्य्य रहित और परतन्त्र हैं वे कभी मुक्त नहीं होसक्ते, पक्षान्तरमें मुक्तात्मा पुरुष परमेश्वरके गणसम्बन्धितावशात् पुरुषत्व लाभ पुरःसर समस्त दुःख बीज नाश करे साक्षात् परमेश्वरकी नाईं होजाते हैं, इस प्रकार अनुमान प्रमाण प्रतिपादन पूर्व्वक कोई महेश्वरोपासक व्यक्तिगण परमैश्वर्य्य कामनासे वशंवद होकर परम पुरुषार्थ प्राप्तिका उपाय स्वरूप पञ्चार्थ प्रपञ्चनपर पाशुपतशास्त्रका आश्रय करते हैं । इसका प्रथम सूत्र यह है, अर्थात् इत्यादि यहां अथ शब्द पूर्व प्रकृतापेक्ष है पूर्व्व प्रकृत शब्दसे गुरुके प्रति शिष्यका प्रश्न है । अर्थात् शिष्य गुरुको जिज्ञासा करनेके पीछे, गुरुदेव पाशुपत याग विधिकी व्याख्या करते हैं इत्यादि । गुरु किसको कहते उसका लक्षण क्या इस विषयमें गण कारिकामें लिखा है जैसे, अष्ट और वृत्ति त्रय, इन सबको पञ्चक कहते हैं । जो नवगणके विशेषज्ञ और संस्कार करानेमें समर्थ हैं । उनको गुरु कहते हैं ॥ १ ॥

लाभा मला उपायाश्च देशावस्थाविशुद्धयः ।
दीक्षाकारिबलान्यष्टौ पञ्चकास्त्रीणि वृत्तय इति ॥ २ ॥

लाभ, मल, उपाय, देश, अवस्था, विशुद्धि, दीक्षा कारिक और बल ये आठ एवं तीन वृत्ति इन सबको पञ्चक कहते हैं ॥ २ ॥

तिस्रो वृत्तय इति प्रयोक्तव्ये त्रीणि वृत्तय इति छान्दसः प्रयोगः । तत्र विधीयमानमुपायफलं लाभः ज्ञानतपोदेवनित्यत्वस्थितिशुद्धिभेदात् पञ्चविधः । तदाह हरदत्ताचार्य्यः—

ज्ञानं तपोऽथ नित्यत्वं स्थितिः शुद्धिश्च पञ्चममिति ॥ ३ ॥

इनमें विधीयमान उपाय फलका नाम लाभ है वह ज्ञान, तपस्या, नित्यत्व, स्थिति और शुद्धिभेदसे पांच प्रकारका है । हरदत्ताचार्य्यने कहा है ज्ञान, तपस्या, नित्यत्व, स्थिति और शुद्धि ये पांच इत्यादि ॥ ३ ॥

आत्माश्रितो दुष्टभावो मलः । स मिथ्याज्ञानादिभेदात् पञ्चविधः । तदप्याह--

साधकस्य शुद्धिहेतुरुपायः वासचर्य्यादिभेदात् पञ्चविधः।
तदप्याह--

वासचर्य्या जपो ध्यानं सदा रुद्रस्मृतिस्तथा।
प्रतिपत्तिश्च लाभानामुपायाः पञ्च निश्चिता इति ॥ ५ ॥

साधकके शुद्धि हेतुको उपाय कहते हैं। वह भी वासचर्य्यादि भेदसे पांच प्रकारका है। जैसे वासचर्य्या, जप, ध्यान, सदा रुद्रका स्मरण करना, प्रतिपत्ति, इन्हीं पांचको लाभका उपाय कहते हैं ॥ ५ ॥

येनार्थानुसन्धानपूर्वकं ज्ञानतपोवृद्धी प्राप्नोति स देशो गुरुजनादिः। यदाह--

गुरुर्जनो गुहादेशः श्मशानं रुद्र एव चेति ॥ ६ ॥

जिसके द्वारा अर्थानुसन्धानपूर्व्वक ज्ञान और तपस्याकी वृद्धि होती है, उसका नाम देश है। जैसे गुरुजनादि। उसी प्रकार कहा है गुरुजन, गुहा, श्मशान और रुद्र इनको देश कहते हैं ॥ ६ ॥

आलाभप्राप्तेरेकत आदौ यदवस्थानं सावस्था व्यक्तादिविशेषेण विशिष्टा। तदुक्तम्–

व्यक्ताव्यक्तजपादानं निष्ठा चैव हि पञ्चममिति ॥ ७ ॥

जबतक लाभ प्राप्ति न हो तबतक इन सबके एकमादिमें जो अवस्थान है उसका नाम अवस्था है यह अवस्था व्यक्तादि भेद विशिष्ट है जैसे, व्यक्त, अव्यक्त, जप, आदान और निष्ठा ॥ ७ ॥

मिथ्याज्ञानादीनामत्यन्तव्यपोहो विशुद्धिः। सा प्रतियोगिभेदात् पञ्चविधा। तदुक्तम्--

अज्ञानस्याप्यसङ्गस्य हानिः सङ्करस्य च।
च्युतिर्हानिः पशुत्वस्य शुद्धिः पञ्चविधा स्मृतेति ॥ ८ ॥

मिथ्याज्ञानादिके आत्यन्तिक विनाशका नाम विशुद्धि है। वह प्रतियोगि भेदसे पांच प्रकारका है जैसे–अज्ञान हानि, असङ्गच्युति, सङ्करविनाश, पशुत्वस्खलन, एवं [illegible] ॥ ८ ॥

दीक्षाकारिपञ्चकं चोक्तम्–

द्रव्यं कालः क्रिया मूर्त्तिर्गुरुश्चैव हि पञ्चम इति ॥ ९ ॥

दीक्षाकारिक पञ्चकने भी निर्देश किया है--जैसे, द्रव्य, काल, क्रिया, मूर्ति और गुरु इन पांचोंका नाम दीक्षाकारक पञ्चक है ॥ ९ ॥

बलपञ्चकञ्च—

गुरुभक्तिः प्रसादश्च मतेर्द्वन्द्वजयस्तथा।
धर्मश्चैवाप्रसादश्च बलं पञ्चविधं स्मृतमिति ॥ १० ॥

बलपञ्चक जैसे, गुरुभक्ति, मनकी प्रसन्नता, सुखदुःखादि द्वन्द्वजय धर्म्म और अप्रसाद इन पांचोंकानाम बल है ॥ १० ॥

पञ्चमललघूकरणार्थं मानामानविरोधिनोऽन्नार्जनोपाया वृत्तयः भैक्ष्योत्सृष्टयथालब्धाभिधा इति। शेषमशेषमाकर एवावगन्तव्यम् ॥ ११ ॥

पाच प्रकारका मल लघूकरणार्थ मानामानविरोधि अन्नार्जनोपायका नाम वृत्ति है। तद्गत वृत्ति भैक्ष्य उत्सृष्ट और यथालब्ध नामसे विख्यात है अर्थात् भिक्षाद्वारा, उत्सृष्ट संग्रह द्वारा अन्न उपार्जन करना चाहिये। इस कारण अन्य किसी प्रकार आयास या यत्न नहीं करना चाहिये ॥ ११ ॥

अत्राथशब्देन दुःखान्तस्य प्रतिपादनम्। आध्यात्मिकादिदुःखव्यपोहप्रश्नार्थत्वात्तस्य पशुशब्देन कार्य्यस्य परतन्त्रवचनत्वात्तस्य पतिशब्देन कारणस्येश्वरः पतिरीशितेति जगत्कारणीभूतेश्वरवचनत्वात्तस्य। योगविधी तु प्रसिद्धौ। तत्र दुःखान्तो द्विविधः अनात्मकः सात्मकश्चेति। तत्रानात्मकः सर्वदुःखानामत्यन्तोच्छेदरूपः। सात्मकस्तु दृक्क्रिया शक्तिलक्षणमैश्वर्यम्। तत्र दृक्शक्तिरेकापि विषयभेदात् पञ्चविधोपचर्य्यते दर्शनं श्रवणं मननं विज्ञानं सर्वज्ञत्वञ्चेति ॥ १२ ॥

तत्र सूक्ष्मव्यवहितविप्रकृष्टाशेषचाक्षुषस्पर्शादिविषयं ज्ञानं दर्शनम्। अशेषशब्दाविषयं सिद्धिज्ञानं श्रवणम्। समस्तचिन्ताविषयं सिद्धिज्ञानं मननम्। निरवशेषशास्त्रविषयं ग्रन्थतोऽर्थतश्च सिद्धिज्ञानं विज्ञानम्। उक्तानुक्ताशेषार्थेषु समासविस्तरविभागविशेषतश्च तत्त्वव्याप्तसदोदितसिद्धिज्ञानं सर्वज्ञत्वम् इत्येषा धीशक्तिः॥ १३॥

उनमें सूक्ष्म, व्यवहित, विप्रकृष्ट, प्रभृति अशेष चाक्षुषविषयक ज्ञानका नाम दर्शन है। इस प्रकार अशेष शब्दविषयके सिद्धिज्ञान श्रवण, समस्त चिन्ताविषयक सिद्धिज्ञान मनन, ग्रन्थतः और अर्थतः सबही शास्त्रविषयक ज्ञान विज्ञान एवं संक्षेप विस्तार विभाग और विशेषरूपसे उक्त और अनुक्त जितने विषयमें जो तत्त्व व्याप्त सार्वकालिक सिद्धिज्ञान उसको सर्वज्ञत्व कहते हैं। ये सब धीशक्ति हैं॥ १३॥

क्रियाशक्तिरेकापि त्रिविधोपचर्य्यते मनोजवित्वं कामरूपित्वं विक्रमणधर्मित्वञ्चेति। तत्र निरतिशयशीघ्रकारित्वं मनोजवित्वम्। कर्मादिनिरपेक्षस्य स्वेच्छयैवानन्तसलक्षणाविलक्षणसरूपकरणाधिष्ठातृत्वं कामरूपित्वम्। उपसंहृतकरणस्यापि निरतिशयैश्वर्य्यसम्बन्धित्वं विक्रमणधर्मित्वमित्येषा क्रियाशक्तिः॥ १४॥

क्रियाशक्ति एक होनेपर भी तीन प्रकारकी है जैसे मनोजवित्व, कामरूपित्व और विक्रमण धर्मित्व। उनमें निरतिशय शीघ्रकारित्वको मनोजवित्व कहते हैं। कर्म्मादि निरपेक्ष होनेपर, स्वेच्छा क्रमहीसे अनेक प्रकारसे सलक्षण और विलक्षण सरूपकरणमें जो अधिष्ठातृत्व उसका नाम कामरूपित्व है। करणसमुदाय उपसंहृत होनेपर, जो निरतिशय ऐश्वर्य्य सम्बन्ध संघटन होजाताहै उसको विक्रमण धर्म्मित्व कहते हैं—येही कईएक क्रियाशक्ति हैं॥ १४॥

वदस्व तन्त्रं सर्वं कार्य्यं त्रिविधविद्या कला पशुश्चेति। तत्र पशुगणो विद्या। सापि द्विविधा बोधाबोधस्वभावभेदात। बोधस्वभावा विवेकाविवेकप्रवृत्तिभेदात द्विविधा। तत्र या विवेकप्रवृत्तिः प्रमाणमात्रव्यङ्ग्या चित्तत्युच्यते। चित्तेन हि सर्वः प्राणी बाह्यार्थात्मकप्रकाशानुगृहीतं सामान्येन विवेचितमविवेचितञ्चार्थं चेतयते इति। पशवर्थधर्माधर्मिका पुनरबोधात्मिका

विद्या स्वशास्त्रं येनोच्यते चेतनपरतन्त्रत्वे सत्यचेतना कला। सापि द्विविधा कार्य्याख्या कारणाख्या चेति। तत्र कार्य्याख्या दशविधा। पृथिव्यादीनि पञ्च तत्त्वानि रूपादयः पञ्च गुणाश्चेति। कारणाख्या त्रयोदशविधा। ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकम् अध्यवसायाभिमानसङ्कल्पाभिधवृत्तिभेदात् बुद्ध्यहङ्कारमनोलक्षणमन्तःकरणत्रयञ्चेति। पशुत्वसम्बन्धी पशुः। सोऽपि द्विविधः साञ्जनो निरञ्जनश्चेति। तत्र साञ्जनः शरीरेन्द्रियसम्बन्धी निरञ्जनस्तु तद्रहितः। तत्प्रपञ्चस्तु पञ्चार्थभाष्यदीपिकादौ द्रष्टव्यः। समस्तसृष्टिसंहारानुग्रहकारि कारणं तस्यैकस्यापि गुणकर्मभेदापेक्षया विभाग उक्तः पतिः साद्य इत्यादिना। तत्र पतित्वं निरतिशयदृक्क्रियाशक्तिमत्त्वं तेनैश्वर्य्येण नित्यसम्बन्धित्वम् आद्यत्वमनागन्तुकैश्वर्य्यसम्बन्धित्वम् इत्यादर्शकारादिभिस्तीर्थकरैर्निरूपितम्॥ १८॥

जितने अस्वतन्त्र पदार्थ हैं वे सब तीन प्रकारके हैं विद्या कला और पशु इनमें पशुगण विद्या दो प्रकारकी है, बोध स्वभावा और अबोध स्वभावा। बोधस्वभावा और भी दो प्रकारकी है। जैसे, विवेकप्रवृत्ति और अविवेकप्रवृत्ति। इनमें विवेकप्रवृत्तिको चित्त कहते हैं। क्योंकि, चित्तद्वारा ही सम्पूर्ण प्राणी सामान्यतः विवेचित और अविवेचित विषयक

चित्तद्वारेणात्मेश्वरसम्बन्धो योगः । स च द्विविधः क्रियालक्षणः क्रियोपरमलक्षणश्चेति । तत्र जप्यध्यानादिरूपः क्रियालक्षणः क्रियोपरमलक्षणस्तु संविद्गत्यादिसंज्ञितः धर्मार्थसाधकव्यापारो विधिः । स च द्विविधः प्रधानभूतो गुणभूतश्च । तत्र प्रधानभूतःसाक्षाद्धर्महेतुः चर्य्या सा द्विविधा व्रतं द्वाराणि चेति । तत्र भस्मस्नानशय्योपहारजपप्रदक्षिणानि व्रतम् । तदुक्तं भगवता नकुलीशेन । भस्मना त्रिषवणं स्नायीत भस्मनि शयीतेति ॥ १६ ॥

चित्तद्वारा आत्मा और ईश्वरका नाम योग है । वह दो प्रकारका है । क्रियालक्षण और क्रियोपरम लक्षण । उनमें जप और ध्यानादि रूपसे नाम क्रिया लक्षण और संविद् गति प्रभृतिका नाम क्रियोपलक्षण है । धर्म्मार्थसाधक व्यापारका नाम विधि है । विधि भी दो प्रकारका है । प्रधान भूत और अप्रधान भूत । उनमें साक्षात् धर्म्म हेतु चर्य्याका नाम प्रधान भूत है । वह दो प्रकारका है । व्रत और समस्त द्वार । उनमें भस्मस्नान, भस्मशयन, उपहार, जप और प्रदक्षिणा इन कतिपयका नाम व्रत है । स्वयं भगवान् नकुलीशने कहा है, जो भस्मद्वारा त्रिसन्ध्या, स्नान और भस्मही पर शयन करे ॥ १६ ॥

अत्रोपहारो नियमः । स च षडङ्गः । तदुक्तं सूत्रकारेण । हसितगीतनृत्यहुडुक्कारनमस्कारजप्यषडङ्गोपहारेण उपतिष्ठेतेति । तत्र हसितं नाम कण्ठौष्ठपुटविस्फूर्जनपुरःसरमहहहेत्यट्टहासः । गीतं गान्धर्वशास्त्रसमयानुसारेण महेश्वरसम्बन्धिगुणधर्मादिनिमित्तानां चिन्तनम् । नृत्यमपि नाट्यशास्त्रानुसारेण हस्तपादादीनामुत्क्षेपणादिकमङ्गप्रत्यंगोपांगसहितं भावाभावसमेतञ्च प्रयोक्तव्यम् । हुडुक्कारो नाम जिह्वातालुसंयोगान्निष्पाद्यमानः पुण्यो वृषनादसदृशो नादः हुडुगिति शब्दानुकारो वषडितिवत् । यत्र लौकिका भवन्ति तत्रैतत सर्वं गूढं प्रयोक्तव्यम् । शिष्टं प्रसिद्धम् । द्वाराणि तु क्राथनस्पन्दनमन्दनशृङ्गारणावितत्करणावितद्भाषणानि । तत्रासुप्तस्यैव सुप्तलिङ्गप्रदर्शनं क्राथनम् । वाय्वभिभूतस्येव शरीरावयवानां स्पन्दनं कम्पनम् । उपहतपाद-

न्द्रियस्येव गमनं मन्दनम् । रूपयौवनसम्पन्नां कामिनीमवलोक्यात्मानं कामुकमिव यैर्विलासैः प्रदर्शयति तत् शृङ्गारणम् । कार्य्याकार्य्यविवेकविकलस्येव लोकनिन्दितकर्मकरणमवितत्करणम् । व्याहतापार्थकादिशब्दोच्चारणमवितद्भापणमिति । गुणभूतस्तु चर्य्या अनुग्राहकोऽनुस्नानादिः भैक्ष्योच्छिष्टादिनिर्मितायोग्यताप्रत्ययनिवृत्त्यर्थः । तदप्युक्तं सूत्रकारेण । अनुस्नाननिर्माल्यलिंगधारीति ॥ १७ ॥

यहां उपहार शब्दसे नियम समझना । उसके छः अङ्ग हैं । सूत्रकारने कहा है, हसित, गीत, नृत्य, हुडुक्कार, नमस्कार, जप, इन षडङ्ग उपहारकी सहायतासे उपासना करनी चाहिये । इनमें हसित शब्दसे कण्ठ और ओष्ठके पुटके विस्फूर्जित पुरःसर अहह शब्दसे अट्टहास करना-जानना । गीत शब्दसे गान्धर्व्वशास्त्रके नियमानुसार महेश्वरके गुण और धर्म्मादि निमित्त सब चिन्ता करनी । नृत्यशब्दसे नाट्यशास्त्रके अनुसार हाथ पांव आदि सङ्क्षेपणादि अङ्ग प्रत्यङ्ग और उपाङ्ग सहित भावाभावसमेत प्रयोग करना चाहिये । हुडुक्कार शब्दसे जिह्वा और तालु इन दोनोंके संयोगमें निष्पद्यमान परम पवित्र वृषनादके तुल्य शब्द । जहां लोगोंका सञ्चार, वहां इन सबका प्रयोग अति गोपनीयभावसे करना चाहिये । इनके अतिरिक्त जप और प्रदक्षिणका अर्थ सबकोही अवगत है इस कारण उनकी स्वतन्त्र व्याख्याकी आवश्यकता नहीं । द्वार शब्दसे क्राथन, स्पन्दन, मन्दन, शृङ्गारण, अवितत्करण और अवितद्भाषण । इनमें असुप्तका सुप्त लिङ्गके तुल्य दर्शनको क्राथन कहते हैं । इसी प्रकार वायु द्वारा अभिभूतकी नाईं शरीरके सब अवयवके स्पन्दनका नाम स्पन्दन है । [illegible] विकलकी नाईं गमन करनेको मन्दन कहते हैं । रूपयौवन शालिनी कामिनीको [illegible] कर, आत्माको जो विलास द्वारासे कामुककी नाईं लोकनिन्दित कर्म्म करनेका [illegible] ... [illegible] और व्याहत शब्दोच्चारणको अवितद्भाषण कहते हैं [illegible] ... [illegible] अनुस्नान, भैक्ष्य और उच्छिष्टादि संग्रह है । [illegible] ... [illegible] इसी प्रकार सूत्रकारने कहा है अनुस्नान [illegible] ॥ १७ ॥

[illegible] मलाभो नाम धर्मिज्ञानाभिधानम् । तत्र प्रथमसूत्र एव [illegible] । एतेषां पदार्थानां प्रमाणतः पश्चादभिधानं विस्तरः । [illegible] ... [illegible] । एतेषां यथासम्भवं लक्षणतोऽ[illegible] विस्तरः । न तु [illegible] ऽस्योऽस्मिपां-

गुणातिशयेन कथनं विशेषः। तथाहि अन्यत्र दुःखनिवृत्तिरेव दुःखान्तः इह तु पारमैश्वर्य्यप्राप्तिश्च। अन्यत्राभूत्वा भावि कार्य्यमिह तु नित्यं पश्वादि। अन्यत्र सापेक्षं कारणं इह तु निरपेक्षो भगवानेव। अन्यत्र कैवल्यादिफलको योगः इह तु पारमैश्वर्य्यदुःखान्तफलकः। अन्यत्र पुनरावृत्तिः स्वर्गादिः इह पुनरपुनरावृत्तिरूपः सामीप्यादिफलकः॥ १८॥

पहिले जो समास और विस्तारादिकी बात कही गयी है उन सबका अर्थ यह है, जो समास शब्दसे अर्थमात्राभिधान। सो पहिले सूत्रमें कहा गया है। विस्तर शब्दसे पांच पदार्थको प्रमाण अनुसार पञ्चविधान राशीकरभाष्यमें यह देखना। यथासम्भव लक्षण अनुसार किसी प्रकार सङ्कर न करके, इन सबके अभिधान करणको विभाग बलसे एवं निहित शास्त्रान्तरसे इन सबके गुणातिशय सहकारसे कथनका नाम विशेष है। अन्यत्र दुःखनिवृति कोही दुःखान्त कहा गया है, अन्यत्र होता नहीं, इस प्रकार भावी कार्य्यकी वर्णना है। किन्तु इसमे नित्य पश्वादि निर्द्दिष्टहै। अन्यत्र, अपेक्षा कारण कहा है किन्तु इसमें निरपेक्ष भगवान्हीने इसप्रकार निर्देश किया है। अन्यत्र योगको कैवल्यादि फलक कहा है। किन्तु इसमें पारमैश्वर्य्य दुःखान्तको ही योगका फल रूपसे निर्वाचित किया है। अन्यत्र पुनः आवृत्तिको स्वर्गादि कहा है। किन्तु इसमें अपुनरावृत्ति रूप और सामीप्यादि फलमें परिणत होता है, ऐसा निर्देश किया है॥ १८॥

ननु महदेतदिन्द्रजालं यन्निरपेक्षं परमेश्वरकारणमिति तथात्वे कर्मवैफल्यं सर्वकार्य्याणां समसमयसमुत्पादश्चेति दोषद्वयं प्रादुःष्यात् मैवं मन्येथाः व्यधिकरणत्वात्। यदि निरपेक्षस्य भगवतः कारणत्वं स्यात्तर्हि कर्मणो वैफल्ये किमायातम्। प्रयोजनाभाव इति चेत् कस्य प्रयोजनाभावः। कर्मवैफल्ये कारणं किं कर्मिणः किं वा भगवतः। नाद्यः ईश्वरेच्छानुगृहीतस्य कर्मणः सफलत्वोपपत्तेः। तदनुगृहीतस्य ययातिप्रभृतिकर्मवत कदाचिन्न निष्फलत्वसम्भवाच्च। न चैतावता कर्मस्वप्रवृत्तिः कर्षकादिवदुपपत्तेः ईश्वरेच्छायतत्वाच्च पशूनां प्रवृत्तेः। नापि द्वितीयः परमेश्वरस्य पर्य्याप्तकामत्वेन कर्मसाध्यप्रयोजनापेक्षाया अभावात्। यदुक्तं

समसमयसमुत्पाद इति तदप्ययुक्तम् अचिन्त्यशक्तिकस्य पर-मेश्वरस्येच्छानुविधायिन्या अव्याहतक्रियाशक्त्या कार्यकारित्वाभ्युपगमात् । तदुक्तं सम्प्रदायविद्भिः—

कर्मादिनिरपेक्षस्तु स्वेच्छाचारी यतो ह्ययम् ।
ततः कारणतः शास्त्रे सर्वकारणकारणमिति ॥ १९ ॥

यदि कहो कि, यह अपेक्षा इन्द्रजाल क्या होसकता है, जो परमेश्वर कारण निरपेक्ष ऐसा होनेसे कर्मका वैफल्य एवं सब ही कार्य्य [illegible] समयमें उत्पन्न हो ऐसा नही कह सकते, क्योंकि, कदाचित्कारणत्व होजाता है । यदि निरपेक्ष भगवान्ही कारण हो तो, क्या कर्म्मका वैफल्य आसकता है ? यदि कहो कि, ऐसा होनेसे कर्म्मका अभाव होता है, जिससे प्रयोजनका अभाव कर्म्मवैफल्य कारण होताहै कर्म्मीका नही; भग-वानका । कर्म्मी कह नही सकते । कर्म्ममात्र ही ईश्वरेच्छा अनुगृहीत । अत एव कर्म्मका सफलत्व उत्पन्न होताहै । इससे अनुगृहीत कर्म्मका ययातिप्रभृतिके कर्म्मकी नाईं कदाचित् निष्फलत्व होजावे ईश्वरेच्छाके आयत्ताधीन करनेसे, पशुगणकी प्रवृत्ति संघटित होतीहै । जो हो, किंचित् नहीं भगवानका नहीं कहसकते । क्योंकि, वह स्वेच्छा [illegible] है । सुतरां, उसका कर्म्मका प्रयोजनकी अपेक्षामें सम्पर्क नहीं । पक्षा-न्तरमें सम समय समुत्पादमें जो उल्लेख किया गया है वह भी युक्तियुक्त नहीहै क्योंकि, अचिन्त्यशक्तिसम्पन्न परमेश्वरकी इच्छानुविधायिनी अव्याहत क्रियाशक्तिद्वारा कार्यकारित्व अभ्युपगत होताहै । सम्प्रदायविद् व्यक्तियोंने सो कहा है । जैसे जिस कारण वह कर्म्मादि निरपेक्ष और स्वेच्छाचारी, इसी कारण शास्त्रमें उनको सर्वकारणकारण कहा है॥ १९ ॥

ननु दर्शनान्तरेऽपीश्वरज्ञानान्मोक्षो लभ्यत एवेति कुतोऽस्य विशेष इति चेन्मैवं वादीः विकल्पानुपपत्तेः । किमीश्वरविषयज्ञानमात्रं निर्वाणकारणं किंवा साक्षात्कारः अथवा यथावत्तत्त्वनिश्चयः । नाद्यः शास्त्रमन्तरेणापि प्राकृतजनवद्देवानामधिपो

ज्ञानमात्रे यथा शास्त्रं साक्षाद्दृष्टिस्तु दुर्लभा।
पञ्चार्थादन्यतो नास्ति यथावत्तत्त्वनिश्चय इति ॥ २० ॥

यदि कहो, दर्शनान्तरमें कहाहै, जो ईश्वरज्ञानसेही मोक्षलाभ होताहै। इसप्रकार पृथक्बाधको कारण क्या ऐसा नहीं कहसकते। क्योंकि, इसको इसप्रकार विकल्पकी अनुपपत्ति होजातीहै, ईश्वरविषयकज्ञान जीवके निर्वाणका कारण है या उसका साक्षात्कारही कारण है, अथवा उसका तत्त्वका यथावत् ज्ञान होनेसे, इसप्रकार मुक्तिलाभ होजातीहै? प्रथम अर्थात् ज्ञानमात्रही मुक्तिका कारण नहीं कहसकते। क्योंकि, शास्त्रनिरपेक्ष होनेपरभी प्राकृत महादेव देवगणके अधिपति, इसप्रकार ज्ञानोपपत्ति मात्रही मोक्षसिद्धि होजानेमें शास्त्राभ्यासी पुरुषकी नाईं विफलता होजावे। द्वितीय अर्थात् साक्षात्कार और निर्व्वाणका कारण नहीं कहसकते हो। क्योंकि, बहुविधिमल एकत्र होनेपर उपचित पिशित लोचन पशुगण परमेश्वरके साक्षात्कारमें समर्थ नहीं होते। तृतीयपक्षभी हमलोगोंको अभिमत नहीं क्योंकि पाशुपतशास्त्रके विना यथावत् तत्त्वनिश्चयकी भी सम्भावना नहीं। आचार्य्योंने सो कहा है। जैसे, जो वह शास्त्र देखकर, उसके ज्ञानमात्रसे परमेश्वरका साक्षात्कार हो सो सहज नहीं है। पञ्चार्थके विना अन्य उपायसे भी ठीक २ तत्त्व निर्णय करना सम्भव नहीं ॥ २० ॥

तस्मात् पुरुषार्थकामैः पुरुषधौरेयैः पञ्चार्थप्रतिपादनपरं पाशुपतशास्त्रमाश्रयणीयम् ॥ २१ ॥

इति सर्वदर्शनसंग्रहे नकुलीशपाशुपतदर्शनं समाप्तम् ॥ ६ ॥

इस कारण पुरुषार्थ काम पुरुष प्रवरवर्ग पञ्चार्थका प्रतिपादनके पीछे पाशुपतशास्त्रका आश्रय करे ॥ २१ ॥

इति सर्व्वदर्शनसंग्रहमें नकुलीशपाशुपतदर्शन समाप्तहुआ ॥ ६ ॥

अथ शैवदर्शनम् ॥ ७ ॥

तामिमं परमेश्वरः कर्मादिनिरपेक्षः कारणमिति पक्षं वैषम्यनैर्घृण्यदोषदूषितत्वात् प्रतिक्षिपन्तः केचन माहेश्वराः शैवागमसिद्धान्ततत्त्वं यथावदीक्षमाणाः कर्मादिसापेक्षः परमेश्वरः कारणमिति पक्षं कक्षीकुर्वाणाः पक्षान्तरमुपक्षिपन्ति पतिपशुपाशभेदात् त्रयः पदार्था इति। तदुक्तं तन्त्रतत्त्वज्ञैः।

त्रिपदार्थं चतुष्पाद महातन्त्रं जगद्गुरुः ।
सूत्रेणैकेन संक्षिप्य प्राह विस्तरतः पुनरिति ॥ १ ॥

परमेश्वर कर्म्मादिनिरपेक्ष कारण है । इसप्रकारका पक्ष वैषम्य और नैर्घृण्य दोषोंसे दूषित है । इसकारण कोई २ माहेश्वरसम्प्रदायमें इसमतवादको प्रतिक्षेप करतेहैं । शैवशास्त्र-प्रसिद्ध सिद्धान्ततत्त्व ठीक ठीक आलोचनापूर्वक कर्म्मादि सापेक्ष परमेश्वर कारणहै, इत्यादि पक्ष आश्रय. और उसके सहकारसे पक्षान्तरका उत्क्षेप करजातेहैं । उनलोगोंके मतमें पति, पशु और पाश भेदसे पदार्थ तीन प्रकारका है । तन्त्रतत्त्वज्ञलोगोंने इसप्रकार कहाहै, जो जगदीश्वर तीनों पदार्थोंसे विशिष्ट और पादचतुष्टयसम्पन्न महातन्त्र संक्षेपसे कर एकमात्र सूत्रही विस्तारक्रमसे वर्णन किया है ॥ १ ॥

अस्यार्थः--उक्तास्त्रयः पदार्था यस्मिन् सन्ति तत्त्रिपदार्थं विद्या-क्रियायोगचर्य्याख्याश्चत्वारः पादा यस्मिन् तच्चतुश्चरणं महात-न्त्रमिति । तत्र पशूनामस्वतन्त्रत्वात् पाशानामचैतन्यात् तद्वि-लक्षणस्य पत्युः प्रथमसुद्देशः चेतनत्वसाधर्म्यात् पशूनां तदानन्तर्य्यम् । अवशिष्टानां पाशानामन्ते विनिवेश इति क्रमनियमः ॥ २ ॥

दीक्षाद्वारा परमपुरुषार्थ प्राप्ति होतीहै । जिसकी सहायतासे पशु, पाश और ईश्वरादिका माहात्म्य विनिर्णीत होता है, उसी ज्ञानके विना दीक्षाके कभी निष्पन्न होनेकी सम्भावना नहीं । इसी कारण ज्ञानका अवबोधक विद्यापाद प्रथमही निर्दिष्ट हुआ है । अनेकविध साङ्ग दीक्षाविधिका प्रदर्शक क्रियापाद उसके परेही उल्लिखित हुआ है । योगके विना अभिमत-प्राप्ति नहीं होती । इसकारण साङ्गयोगज्ञापक योगपाद क्रियापादके परेही उद्दिष्ट हुआ है । विहित अनुष्ठान और निषिद्धका त्यागरूप चर्य्याके विना योगका निर्वाह कभी नहीं होता । इसकारण, तत्प्रतिपादक चर्य्यापादका अन्तमें उल्लेख कियाहै ॥ ३ ॥

तत्र पतिपदार्थः शिवोऽभिमतः । मुक्तात्मनां विद्येश्वरादीनाञ्च यद्यपि शिवत्वमस्ति तथापि परमेश्वरपारतन्त्र्यात् स्वातन्त्र्यं नास्ति । ततश्च तदनुकरणभुवनादीनां भावानां सन्निवेशविशिष्टत्वेन कार्य्यत्वमवगम्यते । तेन च कार्य्यत्वेनैषां बुद्धिमत्पूर्वकत्वमनुमीयत इत्यनुमानवशात्परमेश्वरप्रसिद्धिरुपपद्यते ॥४॥

उनमें पतिपदार्थसे शिव अभिमत है, यद्यपि विद्येश्वरादि और मुक्तात्मागणका शिवत्व है, तथापि परमेश्वरकी परतन्त्रतावशात् उनकी स्वतन्त्रता नहीं है । उसके अनुकरण भुवनादि भाव समूहसन्निवेशविशिष्ट कहकर, उन सबका कार्य्यत्व अवगत होता है । इस प्रकार कार्य्यत्ववशात उनका बुद्धिपूर्वकत्व अनुमित होता है । इस प्रकार अनुमान वशसे परमेश्वरकी प्रसिद्धि उपपन्न होजाती है । अर्थात् सबके ऊपर एक जन जो ईश्वर है, सो कार्य्य देख ही कर समझा जासकता है, क्योंकि, यह विश्वादि कार्य्य अपने आप होता नहीं । अपने आप होनेसे, इस प्रकार सुशृङ्खला वा सुव्यवस्थापूर्वक नहीं दीखती और ये सब सुशृ-[illegible], जो एक अद्वितीय बुद्धिमान् व्यक्ति रचित है सो यह बुद्धिका काम नहीं है । सो पति-[illegible]में प्रतिपादित होजाता है ॥ ४ ॥

ननु देहस्यैव तावत्कार्य्यत्वमसिद्धम् । न हि क्वचित् केनचित्कदाचिद्देहः क्रियमाणो दृष्टचरः । सत्यं तथापि न केनचित्क्रियमाणत्वं देहस्य दृष्टमिति कर्तृदर्शनापह्नवो न युज्यते तस्यानुमेयत्वेनाप्युपपत्तेः । देहादिकं कार्य्यं भवितुमर्हति सन्निवेशविशिष्टत्वात् विनश्वरत्वाद्वा घटादिवत् तेन च कार्य्यत्वेन बुद्धिमत्पूर्वकत्वमनुमातुं सुकरमेव । विमतं सकर्तृकं कार्य्यत्वात्

घटवत् यदुक्तसाधनं तदुक्तसाध्यं न यदेवं न तदेवं यथा-त्मादि । परमेश्वरानुमानप्रामाण्यसाधनानुमानमन्यत्राकारी-त्युपरम्यते ॥ ५ ॥

यदि कहो कि देहका कार्य्यत्व असिद्ध है । क्योंकि, कोई किसी देशमें देहको बनते वा करते नहीं देखता । यह बात सत्य तो है । तथापि कोई कभी करते नहीं देखता, इस प्रकार कल्पना कर, कर्तृ दर्शनका अपह्नव (किसी वस्तुके रहनेपरभी उसको नहीं करके दिखलाना) करना युक्त नहीं होता । क्योंकि, एक पुरुष कर्त्ता है, अनुमानसे उपपत्ति होजाती है । देहादिका कार्य्यत्व होना उचित ही है । क्योंकि, वह घटादिके तुल्य सन्निवेश विशिष्ट और विनश्वर है । इस प्रकार कार्य्यद्वारा बुद्धिमत्पूर्वक भी अनायासही अनुमान किया जासकता । अन्यत्रभी कहाहै, इस प्रकार अनुमान प्रमाणसे ही ईश्वर सिद्ध होता है ॥ ५ ॥

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥ ६ ॥

पुनः कहा है कि, जन्तुमात्री ज्ञानशून्य एवं उन अपने सुख दुःख सर्वथा स्वाधीनतारहित हैं ईश्वरप्रेरित होकर, वे सब स्वर्ग वा नरकको गमन करते हैं ॥ ६ ॥

इति न्यायेन प्राणिकृतकर्मानुपेक्षया परमेश्वरस्य कर्तृत्वोपपत्तेः न च स्वातन्त्र्यविरतिरिति वाच्यं करणापेक्षया कर्तुः स्वातन्त्र्य-विरतेरनुपलम्भात् कोपाध्यक्षापेक्षस्य राज्ञःप्रसादादिना दानवत्। यथोक्तं सिद्धगुरुभिः—

स्वतन्त्रस्याप्रयोज्यत्वं करणादिप्रयोक्तृता ।
कर्तुः स्वातन्त्र्यमेतद्धि नच कर्माद्यपेक्षकेति ॥ ७ ॥

तथाच तत्तत्कर्माशयवशाद्भोगतत्साधनतदुपादानादिविशेषज्ञः कर्त्ता अनुमानादिसिद्ध इति सिद्धम् । तदिदमुक्तं तत्र भवद्भिर्बृहस्पतिभिः—

इह भोग्यभोगसाधनतदुपादानादि यो विजानाति ।
तमृते भूतन्नहीदं पुंस्कर्माशयविपाकज्ञमिति ॥ ८ ॥

जो हो, उस २ कर्म्मकी आशावशात् भोग, उसका साधन और उपादान प्रभृति विशेषज्ञ कर्त्ता अनुमानादिसे सिद्ध होजाता है, यह सिद्ध हुआ इस पर भगवान बृहस्पतिने यह सम्बन्ध यों कहा है किः—जो भोग, भोग्य, उसका साधन और उपादानादि विशेष रूपसे जानते हैं उनके विना पुरुषका कर्म्माशय विपाक विषयमें और किसीकाभी अभिज्ञान नही ॥ ८ ॥

अन्यत्रापि—
विवादाध्यासितं सर्वं बुद्धिमत्पूर्वकर्तृकम् ।
कार्य्यत्वादावयोः सिद्धं कार्य्यं कुम्भादिकं यथेति ॥ ९ ॥

अन्यत्र भी कहाहै जो, विवादास्पदीभूत सब प्रकारकी वस्तुही बुद्धिमत्पूर्वक कर्तृताका आयत्तीकृत है । घटादिकार्य्यकी नाईं, कार्य्यत्व वशात् हमारे दोनोंहीका कार्य्यत्व सिद्ध हुआ ॥ ९ ॥

सर्वात्मकत्वादेवास्य सर्वज्ञत्वं सिद्धम् अज्ञस्य करणासम्भवात् । उक्तञ्च श्रीमन्मृगेन्द्रैः—

सर्वज्ञः सर्वकर्तृत्वात साधनाङ्गफलैः सह ।
यो यज्जानाति कुरुते स तदेवेति सुस्थितमिति ॥ १० ॥

सर्व्वात्मक कहनेसे, इसका सर्वज्ञत्वस्वभाव सिद्ध है । क्योंकि, अज्ञ कारणकी सम्भावना नही, श्रीमान् मृगेन्द्रने कहाहै कि, साधन अङ्ग और फलकेसहित सबका कर्त्ता कहनेसे उसको ज्ञ कहतेहैं । जो जिसवस्तुको जानता है, वह उसे करताहै, यही सर्वाभिमत सिद्धान्तित वाक्य है ॥ १० ॥

अस्तु तर्हि स्वतन्त्र ईश्वरः कर्त्ता स तु तावदशरीरः घटादिकार्य्यस्य शरीरवता कुलालादिना क्रियमाणत्वदर्शनात् । शरीरवत्त्वे चास्मदादिवदीश्वरः क्लेशयुक्तोऽसर्वज्ञः परिमितशक्तिः प्राप्नो-

दिति चेन्मैवं मंस्थाः अशरीरस्याप्यात्मनः स्वशरीरस्पन्दादौ कर्तृत्वदर्शनादभ्युपगम्यापि ब्रूमहे शरीरवत्त्वेऽपि भगवतो न प्रागुक्तदोषानुसङ्गः ॥ ११ ॥

अच्छा माना कि ईश्वर स्वतन्त्र कर्त्ता है. किन्तु वह शरीररहित है शरीरविशिष्ट कुम्भकारादि-द्वारा घटादिकार्य्यका क्रियमाणत्त्व देखकर, शरीरविशिष्टता माननेसे, ईश्वरको, हमलोगोकी नांई क्लेशयुक्त और, असर्वज्ञ एवं सर्व्वथा परिमितशक्तिसम्पन्न कहना किन्तु यह बात नहीं कहसकते । क्योंकि, आत्मा अशरीरीहै । तथापि, स्वशरीरास्पन्दनादिमें कर्त्तृत्त्व देखकर उसकी शरीरवत्ता माननेपरभी, वह ऐश्वर्य्यादि छः गुणोंसे परमपूर्ण कहनेसे उसको कभी हमलोगोंकी बराबर क्लेशादिउल्लिखित दोषका विषयीभूत होना नहीं पडेगा ॥ ११ ॥

परमेश्वरस्य हि मलकर्मादिपाशजालासम्भवेन प्राकृतं शरीरं न भवति किन्तु शाक्तं शक्तिरूपैरीशानादिभिः पञ्चभिर्मन्त्रैर्मस्तकादिकल्पनायामीशानमस्तकस्तत्पुरुषवक्त्रो घोरहृदयो वामदेवगुह्यः सद्योजातपाद ईश्वर इति प्रसिद्ध्या यथाक्रमानुग्रहतिरोभावादानलक्षणस्थितिलक्षणोद्भवलक्षणकृत्यपञ्चककारणं स्वेच्छानिर्मितं तच्छरीरं न चास्मच्छरीरसदृशम् ।

तदुक्तं श्रीमन्मृगेन्द्रैः--

मलाद्यसम्भवाच्छाक्तं वपुर्नैतादृशं प्रभोरिति ॥ १२ ॥

पञ्चकृत्योपयोगि पांच प्रकारके मंत्रोंसे तदीय शरीर कल्पित हुआ है । अन्यत्र लिखा है ईशान, तत्पुरुष, अघोर और वामादि इस देहका मस्तकादि है इत्यादि ॥ १३ ॥

नतु पञ्चवक्त्रस्त्रिपञ्चदृगित्यादिना आगमेषु परमेश्वरस्य मुख्यत एव शरीरेन्द्रियादियोगः श्रूयत इति चेत् सत्यं निराकारे ध्यान-पूजाद्यसम्भवेन भक्तानुग्रहकरणाय तत्तदाकारग्रहणाविरोधात् । तदुक्तं श्रीमत्पौष्करे--

साधकस्य तु रक्षार्थं तस्य रूपमिदं स्मृतमिति ॥ १४ ॥

यदि कहो कि, सब शास्त्रोंमें लिखा है, जो वह पञ्चमुख और त्रिपञ्चदृक् । इत्यादि वाक्यानुसार प्रधानतः ईश्वरका शरीर और इन्द्रियादि योग श्रूयमाण होता है, यह बात सत्य तो है । किन्तु निराकारादिका ध्यान पूजादि असम्भववशात् भक्तोंके प्रति अनुग्रह करनेके लिये उस २ आकारका स्वीकार करना किसी प्रकार विरोध सम्भव नहीं । श्रीमत्पौष्करमें कहा है, -साधनके रक्षणार्थ ही उसका रूप कल्पित होता है ॥ १४ ॥

अन्यत्रापि—

आकारवांस्त्वं नियमादुपास्यो
न वस्त्वनाकारमुपैति बुद्धिरिति ॥ १५ ॥

अन्यत्रभी कहाहै कि, तुम आकारवान् कहनेसे नियमानुसार उपास्य होते हो जिसको आकार नहीं तादृश वस्तुमें किसीप्रकार बुद्धिका प्रवेश नहीं होता ॥ १५ ॥

कृत्यपञ्चकं च प्रपञ्चितं भोजराजेन--

पञ्चविधं तत्कृत्यं सृष्टिस्थितिसंहारतिरोभावाः ।
तद्वदनुग्रहकरणं प्रोक्तं सततोदितस्यास्येति ॥ १६ ॥

भोजराज कर्तृक उल्लिखित कृत्यपञ्चक आविष्कृत हुआ है । जैसा, तदीय कृत्य पांचप्रकार जैसे सृष्टि, स्थिति, संहार, तिरोभाव और अनुग्रह करण । वह ईश्वर इस प्रकार सर्वदा काल में उदित अर्थात् प्रकट होजाताहै ॥ १६ ॥

एतच्च कृत्यपञ्चकं शुद्धाध्वविषये साक्षाच्छिवकर्तृकं कृच्छ्राध्व-विषये त्वनन्तादिद्वारेणेति विवेकः । तदुक्तं श्रीमत्करण-शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽहिते प्रभोरिति ॥ १७ ॥

ये पांचप्रकारका कृत्य शुद्धाध्वविषयमें साक्षात् शिवके कर्तृत्वसे निष्पादित होता है और कृच्छ्राध्वविषयमें अनन्तादिद्वारा निष्पादित होताहै ॥ १७ ॥

एवञ्च शिवशब्देन शिवत्वयोगिनां मन्त्रेश्वरमहेश्वरमुक्तात्मशिवानां सवाचकानां शिवत्वप्राप्तिसाधनेन दीक्षादिनोपायकलापेन सह पतिपदार्थ संग्रहः कृत इति बोद्धव्यम् । तदित्थं पतिपदार्थो निरूपितः ।

सम्प्रति पशुपदार्थो निरूप्यते । अनणुक्षेत्रज्ञादिपदवेदनीयो जीवात्मा पशुः न तु चार्वाकादिवद्देहादिरूपः नान्यदृष्टं स्मरत्यन्य इति न्यायेन प्रतिसन्धानानुपपत्तेः । नापि नैयायिकादिवत् प्रकाश्यः अनवस्थाप्रसङ्गात् ।

तदुक्तम्—

आत्मा यदि भवेन्मेयस्तस्य माता भवेत् परः ।
पर आत्मा तदानीं स्यात् स परो यदि दृश्यत इति ॥ १८ ॥

इस प्रकार शिवशब्दसे शिवत्वयोगविशिष्ट मन्त्रेश्वर, महेश्वर और मुक्तात्मा शिवगणका शिवत्व प्राप्तिसाधन दीक्षादि उपाय सब सहित प्रकार पदार्थसंग्रह कहागया है, यह जानना चाहिये । ऐसे ही पतिपदार्थका स्वरूपादि निरूपित हुआ अधुना पशुपदार्थका निरूपण किया जाता है । अनणुस्वरूप क्षेत्रज्ञादि पद प्रतिपाद्य जीवात्मा पशु शब्दका वाच्य चार्वाकादिके उल्लिखित देहादि स्वरूप जीवको पशु नहीं कहते । क्योंकि, उससे प्रतिसन्धान नहीं । नैयायिक लोगोंके उल्लिखित तुल्य प्रकाशभी नहीं है । क्योंकि, उसमें अनवस्था प्रसङ्ग होजाता है इसीप्रकार कहाभी है, आत्मा यदि मेय हो, तो पर उसका माता होगा ॥ १८ ॥

न च जैनवदव्यापकः नापि बौद्धवत् क्षणिकः देशकालाभ्यामनवच्छिन्नत्वात् । तदप्युक्तम्—

नाप्यद्वैतवादिनामिवैकः भोगप्रतिनियमस्य पुरुषबहुत्वज्ञापकस्य सम्भवात् नापि साङ्ख्यानामिवाकर्त्ता पाशजालापोहने नित्यनिरतिशयदृक्क्रियारूपचैतन्यात्मकशिवत्वश्रवणात् । तदुक्तं श्रीमन्मृगेन्द्रैः–

पाशान्ते शिवताश्रुतेरिति ।

चैतन्यं दृक्क्रियारूपं तदस्यात्मनि सर्वदा ।

सर्वतश्च यतो मुक्तौ श्रूयते सर्वतोमुखमिति ॥ २० ॥

अद्वैतवादी लोगोंकी नाईं एक भी नहीं क्योंकि, बहुपुरुषत्व ज्ञापक भोगप्रतिनियमका सम्पर्क है । सांख्यगणकी नाईं अकर्ताभी नही है । क्योंकि, नित्य निरतिशय दृक्क्रिया रूप चैतन्यमय शिवस्वरूप कहनेसे, पाश जालका निराकरण करता है श्रीमान् मृगेन्द्रने कहाहै, पाशके अन्तमें शिवकी स्वरूपता प्राप्तहोता है ऐसा सुननेमें आताहै । पुनः कहा है जो, दृक्क्रियारूप चैतन्य आत्माका स्वभावसिद्ध धर्म्म है क्योंकि, मुक्तिमें वह सर्वतोभावसे श्रुत होजाता है ॥ २० ॥

तत्त्वप्रकाशेऽपि–

मुक्तात्मानोऽपि शिवाः किन्त्वेते तत्प्रसादतो मुक्ताः ।

सोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनुरिति ॥ २१ ॥

तत्त्व प्रकाशमें भी कहाहै, मुक्तात्मा व्यक्ति भी शिवस्वरूप होजाता है । शिवकेप्रसादहीसे मुक्ति मिलतीहै । वह परमेश्वर एक, अनादि मुक्त एवं पञ्चमंत्ररूप शरीर विशिष्ट है ॥ २१ ॥

पशुस्त्रिविधः विज्ञानाकलप्रलयाकलसकलभेदात् तत्र प्रथमो विज्ञानयोगसंन्यासैर्भोगेन वा कर्मक्षये सति कर्मक्षयार्थस्य कलादिभोगबन्धस्याभावात् केवलमलमात्रयुक्तो विज्ञानाकल इति व्यपदिश्यते । द्वितीयस्तु प्रलयेन कलादेरुपसंहारात् मलकर्मयुक्तः प्रलयाकल इति व्यवह्रियते । तृतीयस्तु मलमायाकर्मात्मकबन्धत्रयसहितः सकल इति संलप्यते । तत्र प्रथमो द्विप्रकारो भवति समाप्तकलुषासमाप्तकलुषभेदात् । तत्राद्यान् कालुष्यपरिपाकवतः पुरुषधौरेयान् अधिकारयोग्याननुगृह्यानन्तादिविद्येश्वराष्टपदं प्रापयति । तद्विद्येश्वराष्टकं निर्दिष्टं बहुदैवत्ये–

अनन्तश्चैव सूक्ष्मश्च तथैव च शिवोत्तमः ।
एकनेत्रस्तथैवैकरुद्रश्चापि त्रिमूर्त्तिकः ।
श्रीकण्ठश्च शिखण्डी च प्रोक्ता विद्येश्वरा इमे ॥ २२ ॥

पशु तीन प्रकारका है विज्ञानाकल, मलयाकल और सकल । उनमें विज्ञान, योग संन्यास, अथवा भोगद्वारा कर्म्मके क्षय होनेपर, कर्म्मक्षयार्थ फलादिभोगबन्धका अभावप्रयुक्त केवलमात्र मुक्तको विज्ञानाकल कहतेहैं। द्वितीय मलया कलहै । तृतीयको अर्थात् मल माया कर्म्मरूप बन्धत्रय युक्तको सकल कहते हैं। उनमें विज्ञानाकल दो प्रकारका, समाप्तकलुष और असमाप्तकलुष है। उनमें समाप्तकलुष पुरुष प्रधानगण कालुष्यका परिपाकप्रयुक्त अधिकारयोग होनेपर अनुगतगृह्य अनन्तादि विद्येश्वराष्टपद प्राप्त होतेहैं । बहुदैवत्यमें यह विद्येश्वराष्टपद निर्दिष्टहै । अनन्त, सूक्ष्म, शिवोत्तम, एकनेत्र, एकरुद्र, त्रिमूर्त्तिक, श्रीखण्ड, शिखण्डी इत्यादिकको विद्येश्वर कहते हैं ॥ २२ ॥

अन्त्यान् सप्तकोटिसङ्ख्यातान् मन्त्राननुग्रहकरणान् निधत्ते । तदुक्तं तत्त्वप्रकाशे–

पशवस्त्रिविधाः प्रोक्ता विज्ञानप्रलयकेवलौ सकलः ।
मलयुक्तस्तत्राद्यो मलकर्मयुतो द्वितीयः स्यात् ॥ २३ ॥

अन्तमें सातकोटिसंख्यक अनुग्रह करणमन्त्र विधान करतेहैं । तत्त्वप्रकाशमें सो कहाहै, पशु तीन प्रकारकाहै, विज्ञानाकल, प्रलयाकल, एवं सकल । उनमें प्रथम मलयुक्त और द्वितीय मलकर्म्मयुक्त ॥ २३ ॥

मलमायाकर्मयुतः सकलस्तेषु द्विधा भवेदाद्यः ।
आद्यः समाप्तकलुषोऽसमाप्तकलुषो द्वितीयः स्यात् ॥ २४ ॥

अवशिष्ट अर्थात् तृतीय मलमायाकर्म्मयुक्त होताहै । आद्य औरभी दो प्रकारकाहै । उनमें प्रथम समाप्तकलुष और द्वितीय असमाप्तकलुष ॥ २४ ॥

आद्याननुगृह्य शिवो विद्येशत्वे नियोजयत्यष्टौ ।
मन्त्रांश्च करोत्यपरान् ते चोक्ताः कोटयः सप्तेति ॥ २५ ॥

शिव अनुग्रहकर समाप्तकलुष पुरुषोंको अष्टविध विद्येश्वरत्वमें नियोजित करतेहैं एवं सातकोटिमन्त्रभी विधान करतेहैं ॥ २५ ॥

सोमशम्भुनाप्यभिहितम्–
विज्ञानाकलनामैको द्वितीयः प्रलयाकलः ।
तृतीयः सकलः शास्त्रेऽनुग्राह्यास्त्रिविधो मतः ॥ २६ ॥

सोमशम्भुने भी कहा है, एकका नाम विज्ञानाकल, दूसरेका नाम मलयाकल एवं तीसरे का नाम सकल, शास्त्रमें इन्हीं तीनको अनुग्राह्य कहा है ॥ २६ ॥

तत्राद्यो मलमात्रेण युक्तोऽन्ये मलकर्मभिः ।
कलादिभूमिपर्य्यन्ततत्त्वैस्तु सकलो युत इति ॥ २७ ॥

उनमें मलमात्र मुक्तका नाम प्रथम, मल कर्म्मयुक्तका नाम द्वितीय एवं कलादि भूमि पर्य्यन्त तत्त्वयुक्तका नाम तृतीय अर्थात् सकल कहते हैं ॥ २७ ॥

प्रलयाकलोऽपि द्विविधः पक्वपाशद्वयः तद्विलक्षणश्च । तत्र प्रथमो मोक्षं प्राप्नोति, द्वितीयस्तु पुर्य्यष्टकयुतः कर्मवशान्नानाविधजन्मभाग् भवति । तदप्युक्तं तत्त्वप्रकाशे—

प्रलयाकलेषु येषामपक्वमलकर्मणी व्रजन्त्येते ।
पुर्य्यष्टकदेहयुता योनिषु निखिलासु कर्मवशादिति ॥ २८ ॥

मलयाकलभी और दो प्रकारका है, पक्वपाश द्वय और तद्विलक्षण । उनमें प्रथम अर्थात् पक्वपाशद्वयसे मोक्ष प्राप्त होता है । द्वितीय अर्थात् सकल पुर्य्यष्टक युक्त होकर कर्म्मवशात नानाप्रकारका जन्म लाभ करता है । तत्वप्रकाशमें भी वही लिखा है:—जिनका मल और कर्म्म परिपाक नहीं होता, वे मलयकालमें पुर्य्यष्टकरूप देहयुक्त होकर कर्म्मवशात् निखिल योनिमें संक्रमण करते हैं ॥ २८ ॥

पुर्य्यष्टकमपि तत्रैव निर्दिष्टम्—

स्यात् पुर्य्यष्टकमन्तःकरणधीः कर्म करणानीति ॥ २९ ॥

पुर्य्यष्टक किसको कहते हैं, वह भी उसमें निर्दिष्ट हुआ है, जैसे—बुद्धि, कर्म्म, अन्तः- [illegible] और पांच इन्द्रिय इन्हीं आठको पुर्य्यष्टक कहते हैं ॥ २९ ॥

विवृतं चाघोरशिवाचार्य्येण—पुर्य्यष्टकं नाम प्रतिपुरुषनियतः सर्गादारभ्य कल्पान्तं मोक्षान्तं वा स्थितः पृथिव्यादिकलापर्य्यन्तस्त्रिंशत्तत्वात्मकः सूक्ष्मो देहः । तथा चोक्तं तत्त्वसंग्रहे—

वसुधाद्यस्तत्त्वगणः प्रतिपुन्नियतः कलान्तोऽयम् ।
पर्य्यटति कर्मवशाद्भुवनजदेहेष्वयञ्च सर्वेष्विति ॥ ३० ॥

मोक्ष पर्य्यन्त अवस्थिति करता है उसका नाम पुर्य्यष्टक है । उसी प्रकार, तत्वसंग्रहमें कहा है, वसुधादि तत्व गण प्रतिपुरुषहीमें नियत हुआ है एवं कर्म्मवशात उस २ भुवनन देहमें पर्य्यटन करता है ॥ ३० ॥

तथा चायमर्थः समपद्यत अन्तःकरणशब्देन मनोबुद्ध्यहङ्कारचित्तवाचिना अन्यान्यपि पुंसो भोगक्रियायामन्तरङ्गाणि कलाकालनियतिविद्यारागप्रकृतिगुणाख्यानि सप्त तत्त्वानि उपलक्ष्यन्ते । धीकर्मशब्देन ज्ञेयानि पञ्च भूतानि तत्करणानि च तन्मात्राणि विवक्ष्यन्ते । करणशब्देन ज्ञानकर्मेन्द्रियदशकं संगृह्यते ॥ ३१ ॥

इसका अर्थ इसप्रकार मीमांसित हुआ है, अन्तकरण शब्दसे मन, बुद्धि, अहङ्कार, चित्त और पुरुषको योगक्रियाका अन्तरङ्गरूप कला, काल, नियति, विद्या, राग, प्रकृति, और गुण ये सम्पूर्ण तत्व उपलक्षित होजाते हैं । इसप्रकार धी कर्म्म शब्दसे पांचभूत और इनका करण सब एवं तन्मात्र सब । यहां करण शब्दसे ज्ञानेन्द्रिय और कर्मेन्द्रिय समझना चाहिये । इसीका नाम वसुधादि तत्वगण है ॥ ३१ ॥

ननु श्रीमत्कालोत्तरे--शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चकम् । बुद्धिर्मनस्त्वहङ्कारः पुर्य्यष्टकमुदाहृतमिति श्रूयते तत्कथमन्यथा कथ्यते। अद्धा अतएव च तत्रभवता रामकण्ठेन तत्सूत्रं शक्तत्वपरतया व्याख्यायीत्यलमतिप्रपञ्चेन । तथापि कथं पुनरस्य पुर्य्यष्टकत्वम् । भूततन्मात्रबुद्धीन्द्रियकर्मेन्द्रियान्तःकरणसंज्ञैः पञ्चभिर्वर्गैस्तत्करणेन प्रधानेन कलादिपञ्चकात्मना वर्गेण चारब्धत्वादित्यविरोधः ॥ ३२ ॥

यदि कहो कि, श्रीमत् कालोत्तरमें कहा है जो शब्द, स्पर्श, रूप, रस, और गन्ध ये पांच एवं बुद्धि, मन और अहङ्कार ये तीन, इन आठको पुर्यष्टक कहते हैं । इत्यादि वाक्य किस प्रकार सङ्गत हो सकता है ? इसी कारण तत्र भगवन् रामकण्ठने इस सूत्र को [illegible] कहकर व्याख्या किया है । तथापि, किसप्रकार इसका पुर्य्यष्टकत्व सिद्ध होसकता ? इसका समन्वय यह है जो, भूत, तन्मात्र, बुद्धिन्द्रिय, कर्म्मेन्द्रिय, और अन्तःकरण नामक पञ्चवर्ग एवं तत्करण, प्रधान और कलादिपञ्चात्मक ये तीन, इन सबको लेकर [illegible] हुआ है, [illegible] किसीप्रकार विरोधकी अपेक्षा नहीं रही ॥ ३२ ॥

तत्र पुर्य्यष्टकयुतान् विशिष्टपुण्यसम्पन्नान् कांश्चिदनुगृह्य भुवन-पतित्वमत्र महेश्वरोऽनन्तः प्रयच्छति । तदुक्तम्--

कांश्चिदनुगृह्य वितरति भुवनपतित्वं महेश्वरस्तेषामिति ॥

सकलोऽपि द्विविधः पक्ककलुषापक्ककलुषभेदात् । तत्राद्यान् परमेश्वरस्तत्परिपाकपरिपाट्या तदनुगुणशक्तिपातेन मण्डल्याद्यष्टादशोत्तरशतं मन्त्रेश्वरपदं प्रापयति । तदुक्तम्--

> शेषा भवन्ति सकलाः कलादियोगादहर्मुखे काले ।
> शतमष्टादश तेषां कुरुते स्वयमेव मन्त्रेशान् ॥ २३ ॥

अनन्तरूप महेश्वर उनमें पुर्य्यष्टक युक्त और विशिष्ट पुण्यसम्पन्न किसी २ पुरुषको अनुग्रहकर भुवनपतित्व प्रदान करते हैं । इसी प्रकार कहा भी है, महेश्वर उनमें किसीको अनुग्रहकर भुवनपतित्व प्रदान करते हैं । पक्ककलुष और अपक्ककलुष भेदसे सकल भी और दो प्रकारका है । उनमें परमेश्वर कलुष परिपाककी अनुसार तदनुगुण शक्तिपात द्वारा कलुषमें पुरुषोंको मण्डलादि ११८ मन्त्रेश्वरपद प्रदान करते हैं । इसी प्रकार कहा है; सबपुरुष सब प्रलयसमयमें कलादि योगवशात शेष होनेपर, स्वयं ईश्वर उन सबको ११८ मन्त्रेश्वर करदेते हैं ॥ २३ ॥

> तत्राष्टौ मण्डलिनः क्रोधाद्यास्तत्समाश्च वीरेशः ।
> श्रीकण्ठः शतरुद्राः शतमित्यष्टादशाभ्यधिकमिति ॥ २४ ॥

उनमें, आठ जनमण्डली, क्रोधादि इसके समान, वीरेशभी श्रीकण्ठ दो एवं १०० रुद्र ये सब मिलकर ११८ हैं ॥ २४ ॥

तत्परिपाकाधिक्यनिरोधेन शक्त्युपसंहारेण दीक्षाकरणेन मोक्षप्रदो भवत्याचार्य्यमूर्तिमास्थाय परमेश्वरः । तदप्युक्तम्--

> परिपक्कमलानेतानुत्सादनशक्तिपातेन ।
> योजयति परे तत्त्वे स दीक्षयाचार्य्यमूर्तिस्थ इति ॥ २५ ॥

श्रीमन्मृगेंद्रोऽपि–

पूर्वं व्यत्यासितस्याणोः पाशजालमपोहतीति ॥ ३६ ॥

श्रीमन्मृगेन्द्रने भी कहा है;–उस जीवका पाशजाल काट डालते हैं ॥ ३६ ॥

व्याकृतश्च नारायणकण्ठेन तत्सर्वं तत एवावधार्य्यम् अस्माभिस्तु विस्तरभिया न प्रस्तूयते । अपक्वकलुषान् बद्धानणून् भोगभाजो विधत्ते परमेश्वरः कर्मवशात् । तदप्युक्तम्–

बद्धान् शेषानपरान् विनियुङ्क्ते भोगभुक्तये पुंसः ।
तत्कर्मणामनुगमादित्येवं कीर्तिताः पशव इति ॥ ३७ ॥

नारायणकण्ठनें इन सबकी विस्तारपूर्व्वक व्याख्या कियी है । उसीसे यह विषय निश्चय करना । हमने विस्तारभयसे अधिक प्रस्ताव नही किया । जो सब जीव अपक्व कलुष, परमेश्वर कर्म्मवशात् उन सबको बद्ध और भोगयुक्त करते हैं । वह भी कहा है, अवशिष्ट अपर पुरुषों-को उनके कर्म्मानुसार बद्ध करके, भोगभुक्तिके लिये विनियुक्त करते हैं । पशुगणका विषय यह कहागया ॥ ३७ ॥

अथ पाशपदार्थः कथ्यते । पाशश्चतुर्विधो मलकर्ममायारोधशक्तिभेदात् । ननु शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमात्त्रितयम् । तत्र पतिः शिव उक्तः, पशवो ह्यणवोऽर्थपञ्चकं पाशा इति । पाशः पञ्चविधः कथ्यते तत् कथं चतुर्विध इति गण्यते । उच्यते विन्दोर्मायात्मनः शिवतत्त्वपदवेदनीयस्य शिवपदप्राप्तिलक्षणपरममुक्त्यपेक्षया पाशत्वेऽपि तद्योगस्य विद्येश्वरादिपदप्राप्तिहेतुत्वेनापरमुक्तित्वात् पाशत्वेनानुपादानमित्यविरोधः । अतएवोक्तं तत्त्वप्रकाशे–

पाशाश्चतुर्विधाः स्युरिति ॥ ३८ ॥

अधुना, पाशपदार्थका विवरण किया जाता है । पाश चारप्रकारका है मल, कर्म्म, माया और रोधशक्ति । यदि कहो, शैवशास्त्रमें कहाहै, पति, पशु और पाश इत्यादि क्रमसे तीनपदार्थ हैं । उनमें पतिशब्दसे शिव कहा गयाहै । पशु शब्दसे अणु सब । और पाश शब्दसे अर्थपञ्चक । इसप्रकार, पांच प्रकार पाश कहा गया है । तो और किस प्रकार ४ प्रकार कहा गया ? इसका उत्तर यह है जो, साक्षात् शिव तत्वपद प्रतिपाद्य–मायामय बिन्दुपदार्थ पाशरूपित होनेपरभी, उसको जब शिवपदप्राप्तिरूप परममुक्तिकी अपेक्षा है

एवं उस मुक्तिका योग होनेपर जिस समय विद्येश्वरादि पदप्राप्तिपूर्वक मुक्ति होजाती है तब उसका और पाशत्वका उपादान होनहीं सकता । इसी कारण तत्त्वप्रकाशमें कहा है पाश सब ४ प्रकारका है ॥ ३८ ॥

श्रीमन्मृगेन्द्रोऽपि–

आवृतीशौ बलं कर्म मायाकार्य्यं चतुर्विधम् ।
पाशजालं समासेन धर्मनाम्नैव कीर्त्तिता इति ॥ ३९ ॥

श्रीमन्मृगेन्द्रनेभी कहाहै,–मल, ईश, बल, और कर्म्म ये ४ प्रकार मायाकारी पाशजाल नामसे परिगणित होता है । इन सबको संक्षेपसे धर्म्मनामसे कहा करते हैं ॥ ३९ ॥

अस्यार्थः, आवृणोति प्रकर्षेणाच्छादयत्यात्मनो दृक्क्रिये इति आवृतिः स्वाभाविक्यशुचिर्मलः । स च ईष्टे स्वातन्त्र्येणेति । तदुक्तम्–

एको ह्यनेकशक्तिदृक्क्रिययोच्छादको मलः पुंसः ।
तुषतण्डुलवज्ज्ञेयस्ताम्राश्रितकालिकावद्वेति ॥ ४० ॥

इस मलका दूसरा नाम 'आवृति' है । प्रशब्दसे प्रकर्ष एवं आवृति शब्दसे आच्छादन करना । यह आत्माका दृक् और दृक्शक्ति दोनों आच्छन्न करते हैं, इसकारण इसका नाम वृत्ति है । इसशब्दसे जो सदा स्वाधीनभावसे प्रभुत्वादि करे । उसीप्रकार कहा भी है, एक मल पुरुषकी अनेकशक्ति, दृक् और क्रियाका आच्छादन करता है । तुषमें जिस प्रकार तण्डुल एवं ताम्रमें जैसे कालिका प्रच्छन्न रहती है मलसे दृक्क्रियाका उस प्रकार प्रच्छादन होता है ॥ ४० ॥

बलं रोधशक्तिः अस्याः शिवशक्तेः पाशाधिष्ठानेन पुरुषतिरोधायकत्वादुपचारेण पाशत्वम् । तदुक्तम्–

तासामहं वरा शक्तिः सर्वानुग्राहिका शिवा ।
धर्मानुवर्त्तनादेव पाश इत्युपचर्य्यत इति ॥ ४१ ॥

क्रियते फलार्थिभिरिति कर्म धर्माधर्मात्मकं बीजाङ्कुरवत्प्रवाहरूपेणानादि यथोक्तं श्रीमत्किरणे–

यथानादिर्मलस्तस्य कर्मालपकमनादिकम् ।
यद्यनादिरसंसिद्धं वैचित्र्यं केन हेतुनेति ॥ ४२ ॥

फलार्थी व्यक्तिगण करते हैं, इसकारण इसका नाम कर्म्म है । यह धर्म्म और अधर्म्म उभयात्मक है । एवं बीजांकुरकी नाई, प्रवाहरूपसे अनादि श्रीमत् किरणमें कहा है,– मल. जैसे अनादि उसका कर्म्म भी वैसाही अनादि है । सुतरां चिन्ता करनेका विषय क्या ? ॥ ४२ ॥

बुद्धेर्बुद्ध्यन्तरविनाश्यत्वे संस्कारविनाश्यत्वे च प्रमाणं विवादाध्यासितानि ज्ञानानि उत्तरोत्तरकार्य्यविनाश्यानि क्षणिकविभुविशेषगुणत्वात् शब्दवत् । द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मसमकालमेकत्वसामान्यचिन्तया आश्रयनिवृत्तेरेव द्वित्वनिवृत्तिः कर्मसमकालमपेक्षाबुद्धिचिन्तनादुभाभ्यामिति संक्षेपः ।

अपेक्षाबुद्धिर्नाम विनाशकविनाशप्रतियोगिनी बुद्धिरिति बोद्धव्यम् ॥ १९ ॥

अपरबुद्धिको हृदय और संस्कारके आविर्भावसे जो बुद्धिका विनाश होता है, उसविषयमें परस्पर विरुद्धज्ञान सबहीप्रमाणहै। वह२ज्ञान उत्तरोत्तर कार्य्यद्वारा विनष्ट होताहै । इसविषयमें शब्दही दृष्टान्तहै शब्दही आकाशका गुण विशेषहै । वह क्षणिकहै । क्योंकि, एकशब्दके परे और एकशब्दकी उत्पत्ति होनेहीसे, प्रथमोत्पन्न शब्दका विनाश होताहै । उसप्रकार एकविषयके ज्ञानके परे अपरविषयके ज्ञान होनेपर प्रथम ज्ञानका नाश होता है । विभागजनक कर्म्ममात्रही द्रव्यारम्भक संयोगका प्रतिद्वन्द्वी है । इसकर्म्मके समकालमें एकत्वसामान्य चिन्ताद्वारा आश्रयका विनाश एवं अपेक्षाबुद्धिकी चिन्ता इन दोनोंप्रकारके कारणोंसे द्वित्वकी विनिवृत्ति होती है । संक्षेपमें इसीप्रकार कहा जाता है । विनाशक और विनाश्य इन दोनोंकी प्रतियोगिनी बुद्धिका नाम अपेक्षा बुद्धिहै । अर्थात् जिस बुद्धिसे विनाशक और विनाश्य दोनोंका पृथक् आकारसे ज्ञान हो उसीको अपेक्षाबुद्धि कहते हैं ॥ १९ ॥

अथ द्व्यणुकनाशमारभ्य कतिभिः क्षणैः पुनरन्यद्द्व्यणुकमुत्पद्य रूपादिमद्भवतीति जिज्ञासायामुत्पत्तिप्रकारः कथ्यते । नोदनादिक्रमेण द्व्यणुकनाशः, नष्टे द्व्यणुके परमाणावग्निसंयोगात् श्यामादीनां निवृत्तिः, निवृत्तेषु श्यामादिषु पुनरन्यस्मादग्निसंयोगाद्रक्तादीनामुत्पत्तिः उत्पन्नेषु रक्तादिषु अदृष्टवदात्मसंयोगात् परमाणौ द्रव्यारम्भणाय क्रिया, तया पूर्वदेशाद्विभागः, विभागेन पूर्वदेशसंयोगनिवृत्तिः, तस्मिन्निवृत्ते परमाण्वन्तरेण संयोगोत्पत्तिः, संयुक्ताभ्यां परमाणुभ्यां द्व्यणुकारम्भः, आरब्धे द्व्यणुके कारणगुणादिभ्यः कार्य्यगुणादीनां रूपादीनामुत्पत्ति-

रिति यथाक्रमं नव क्षणाः । दशक्षणादिप्रकारान्तरं विस्तरभयान्नेह प्रतन्यते । इत्थं पीलुपाकप्रक्रिया पीठपाकप्रक्रिया तु नैयायिकधीसम्मता ॥ २० ॥

इससमय द्व्यणुकके विनाशसे पुनः अन्य द्व्यणुककी उत्पत्ति होती है । रूपादिका आविर्भाव होता है । ऐसे प्रश्नकी अपेक्षामें उत्पत्ति प्रकार कहा जाता है । परस्पर संचालनादि क्रमसे द्व्यणुकका नाश होता है । अर्थात् दो अणु एकत्र होकरहै । सो किसीप्रकार चालित होनेपर, परस्पर वियुक्त होताहै । उसीमें द्व्यणुकका नाश होता है द्व्यणुकके नष्ट होनेपर, परमाणुमें अग्निके संयोगवशतः श्यामादिकी निवृत्ति होती है । श्यामादिकी निवृत्ति होनेपर, फिर अन्यप्रकार अग्निसंयोगसे रक्तादिकी उत्पत्ति होती है । रक्तादि उत्पन्न होनेपर अदृष्टकी नाईं आत्मसंयोगवशसे परमाणुमें द्रव्यकी आरम्भजन्य उत्पत्ति होतीहै । उसीके द्वारा पूर्व्व देशसे विभाग होताहै । विभागके द्वारा पूर्वदेशके संयोगकी निवृत्ति होती है । संयोगनिवृत्त होनेपर, अन्यपरमाणुकी सहायतासे संयोगकी और उत्पत्ति होतीहै । इसप्रकार दो प्रमाणुके संयोगसे द्व्यणुकका आरम्भ होताहै । द्व्यणुकके आरम्भ होनेसे कारणगुणादिसे कार्य्यगुणादि रूपादिकी उत्पत्ति होतीहै । येही नवक्षणहैं । अर्थात् इसप्रकार नवक्षणहीमें रूपादिका उद्भव होताहै । इसके अतिरिक्त, कोई २ देश क्षणादि प्रकारभेद निर्देश करते हैं । बाहुल्यभयसे उसका विस्तारनही किया गया । एवं प्रकार अणु और द्व्यणुककी सिद्धि प्रक्रियाही नैयायिकोंकी बुद्धिसम्मत है ॥ २० ॥

विभागजविभागो द्विविधः कारणमात्रविभागजः कारणाकारणविभागजश्च । तत्र प्रथमः कथ्यते । कार्य्यव्याप्ते कारणे कर्मोत्पन्नं यदावयवान्तराद्विभागं विधत्ते न तदाकाशादिदेशाद्विभागः यदा त्वाकाशादिदेशाद्विभागः न तदावयवान्तरादिति स्थितिनियमः कर्मणो गगनविभागाकर्तृत्वस्य द्रव्यारम्भकसंयोगाविरोधिविभागारम्भकत्वेन धूमस्य धूमध्वजवर्गेणैव व्यभिचारानुपलम्भात् ततश्चावयवकर्म अवयवान्तरादेव विभागं करोति नाकाशादिदेशात् तस्माद्विभागाद्द्रव्यारम्भकसंयोगनिवृत्तिः । ततः कारणाभावात् कार्य्याभाव इति न्यायादवयविनिवृत्तिः, निवृत्तेऽवयविनि तत्कारणयोरवयवयोर्वर्त्तमानो विभागः कार्य्यविनाशविशिष्टं कालं स्वतन्त्रं वावयवमपेक्ष्य सक्रियस्यैवावयव-

स्य कार्य्यसंयुक्तादाकाशदेशाद्विभागमारभते न निष्क्रियस्य कारणाभावात् ॥ २१ ॥

विभागज विभाग दो प्रकारका है कारणमात्र विभागज है और कारणाकारणविभागज है। उनमें पहिले कारणमात्र विभागजका विवरण किया जाता है कारण कार्य्यव्याप्त होनेपर, कर्म्म उत्पन्न होकर जिससमय अवयवान्तरसे विभाग विधान करता है, उस समय आकाशादि देशका विभाग नहीं होता। समझोकि, एकपात्र, उसको तोड़कर विभागकरनेपर उसके अवयवहीका परस्पर वियोग होता है। किन्तु उसके भीतर जो आकाश है—उसका विभाग नहीं होता वह जैसाका तैसा रहताहै। जिससमय आकाशादि देशसे विभाग होताहै, उस समय अवयवान्तरादिसे विभाग नहीं होता। यही स्थितिका नियमहै। आकाश विभाग जिस कर्म्मका कर्त्ता नहीं है उस पक्षमें किसी प्रकार अन्यथाभाव नहीं है। इस कर्म्मके द्वारा जो द्रव्यसमुत्पादक संयोगका व्याघात साधक विभाग संघटित होताहै, उसीसे प्रमाणित होताहै। अनन्तर अवयवकर्म्म अवयवान्तरसे विभाग विधान करताहै, अकाशादिदेशसे नहीं। उल्लिखित विभागसेही द्रव्यान्तरके संयोगकी निवृत्ति होतीहै। अनन्तर "कारणके अभावसे कार्य्यका अभाव होता है" इत्यादिन्याय अनुसार अवयवीकी निवृत्ति होती है। अवयवीकी निवृत्ति होनेपर, उसका कारणस्वरूप दोनों अवयवोंका वर्त्तमान विभाग समुत्पादित होता है। उसीसे कार्य्यविनाश विशिष्ट और कालसे स्वतन्त्र अवयवकी अपेक्षा कर, क्रियायुक्त अवयवका कार्य्यसंयुक्त आकाशदेशसे विभाग विहित होता है। कारण के अभावसे क्रियाहीन अवयवका विभाग नहीं होता ॥ २१ ॥

द्वितीयस्तु हस्ते कर्मोत्पन्नमवयवान्तराद्विभागं कुर्वत् आकाशादिदेशेभ्यो विभागानारभते। ते कारणाकारणविभागाः कर्म यां दिशं प्रति कार्य्यारम्भाभिमुखं तामपेक्ष्य कार्य्याकार्य्यविभागमारभते यथा हस्ताकाशविभागाच्छरीराकाशविभागः। न चासौ शरीरक्रियाकार्य्यस्तदा तस्य निष्क्रियत्वात् नापि हस्तक्रियाकार्य्यः व्यधिकरणस्य कर्मणो विभागकर्तृत्वानुपपत्तेः। अतः पारिशेष्यात् कारणाकारणविभागस्य कारणत्वमङ्गीकरणीयम् ॥ २२ ॥

अधुना दूसरा प्रकार कहा जाता है। हस्तमें कर्म्म उत्पन्न होकर अवयवान्तरसे विभाग विधान करते हुए आकाशादि देशसे विभाग सबका समाधान करता है, उन्हीं सबका नाम कारणाकारण विभाग है, कर्म्म जो दिशाके प्रतिकार्य्यके आरम्भनमें सन्मुख होता है, उसी

अपेक्षा कर, कार्य्याकार्य्यविभाग संसाधित करताहै, जिस प्रकार, हाथके आकाश विभागसे शरीराकाश विभाग । वह शरीर क्रियाका कार्य्य नहीं । क्योंकि, तत्काल उसकी किसी प्रकार क्रिया नहीं रहती । और वह हस्तक्रिया कार्य्य नहीं है क्योंकि, अधिकरणशून्य, कर्म्मका विभागकर्तृत्व कहां ? अतएव परिशेष्यसे कारणाकारणविभागके कारणत्व अवश्य मानने योग्यहैं ॥ २२ ॥

यद्वादि अन्धकारादौ भावत्वं निषिध्यत इति तदसङ्गतं तत्र चतुर्द्धाविवादसम्भवात् । तथाहि द्रव्यंतम इति भट्टाः वेदान्तिनश्च भणन्ति आरोपितं नीलरूपमिति श्रीधराचार्य्याः आलोकज्ञानभाव इति प्रभाकरैकदेशिनः आलोकाभाव इति नैयायिकादयः इति चेत्तत्र द्रव्यत्वपक्षो न घटते विकल्पानुपपत्तेः द्रव्यं भवदन्धकारं द्रव्याद्यन्यतममन्यद्वा नाद्यः यत्रान्तर्भावोऽस्य तस्य यावन्तो गुणास्तावद्गुणकत्वप्रसङ्गात् न च तमसो द्रव्यबहिर्भाव इति साम्प्रतं निर्गुणस्य तस्य द्रव्यत्वासम्भवेन द्रव्यान्तरत्वस्य सुतरामसम्भवात् ॥ २३ ॥

अन्धकारादि, भाव पदार्थ नहीं है, वह अभाव पदार्थ है, इसप्रकार जो कहा गया है, सो सङ्गत नहीं इसमें चारप्रकारका विवाद सम्भव होताहै । उसी प्रकार, भट्ट और वेदान्तियोंके मतसे अन्धकार द्रव्यहै । श्रीधर आचार्यगणने आरोपित नीलरूप कहा है । प्रभाकर एकदेशियोंके मतसे आलोकज्ञानका अभाव अन्धकार है । नैयायिकादिके मतसे आलोकका अभावही अन्धकार है। अन्धकार कभी द्रव्य नहीं होसकता । क्योंकि, ऐसा होनेसे विकल्पकी अनुपपत्ति होती है । अन्धकार द्रव्य होनेपर, वह द्रव्यादिसे अन्यतम या अन्य इसप्रकार प्रश्नकी सम्भावना होजाती है । इसके उत्तरमें अन्यतम नहीं कहा जा सकता । क्योंकि, यह अन्धकार जिसके भीतर रहता है । उसका सब गुण इसमें संसक्त रहता है । दूसरे पक्षमें अन्धकारसे द्रव्य बाहर नहीं । क्योंकि, वह निर्गुण है । सुतरां वह द्रव्य हो नहीं सकता । जो द्रव्य नहीं, उसकी और द्रव्यान्तरकी सम्भावना कहां? ॥ २३ ॥

ननु तमालश्यामलत्वेनोपलभ्यमानं तमः कथं निर्गुणं स्यादिति नीलं नभः इतिवत् भ्रान्तिरेवेत्यलं वृद्धवीवधया । अतएव नारोपितरूपं तमः अधिष्ठानप्रत्ययमन्तरेणारोपायोगात् बाह्यालोकसहकारिरहितस्य चक्षुषो रूपारोपे सामर्थ्यानुपलम्भाच्च । न चायमचाक्षुषः प्रत्ययः तदनुविधानस्यानन्यथासिद्धत्वात् । न च विधिप्रत्ययवेद्यत्वायोगो भावे इति साम्प्रतं प्रलयविनाशा-

वधानादिषु व्यभिचारात् । अतएव नालोकज्ञानाभावः अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्वनियमेन मानसत्वप्रसङ्गात् । तस्मादालोकाभाव एव तमः न चाभावे भावधर्माध्यारोपो दुरुपपादः दुःखाभावे सुखत्वारोपस्य संयोगाभावे विभागत्वाभिमानस्य च दृष्टत्वात् ॥ २४ ॥

यदि कहो कि, तमालवृक्षकी श्यामलता द्वारा जब अन्धकारकी उपलब्धि होती है तो वह किसप्रकार निर्गुणहो सकता ? इसका उत्तर यह है कि, नील आकाश, इसकी नाई वह भ्रान्तिमात्र है । अर्थात् आकाशका कोई रङ्ग नहीं । भ्रमहीसे उसमें नील, पीतादि वर्णका आरोप किया जाता है । उसीप्रकार तमालवृक्षकी श्यामलता द्वारा अन्धकारकी उपलब्धिभी भ्रममात्रहै इसलिये अन्धकार आरोपितरूप नहीं है क्योंकि, अधिष्ठान प्रत्ययके विना आरोपका योग नहीं होता एवं बाह्यालोक सहकारि रहित होनेसे चक्षुके रूपारोपमें समर्थ नहीं रहता । यह अचाक्षुष प्रत्यय नहीं है । ऐसा होनेसे, वह अनुविधान अन्यथा होता है । और, अभावपदार्थमें विधिप्रत्ययवेद्यत्वका संयोग है । सुतरां प्रलय विनाश और अवधानादिमें व्यभिचार होता है । अतएव आलोकज्ञानका अभाव अन्धकार नहीं । क्योंकि, अभावका प्रतियोगिग्राहक इन्द्रियग्राह्यत्व नियमानुसार उसका मानसत्व प्रसङ्ग होता है ॥ २४ ॥

न चालोकाभावस्य घटाद्यभाववद्रूपवदभावत्वेनालोकसापेक्षचक्षुर्जन्यज्ञानविषयत्वं स्यादित्येपितव्यं यद्ग्रहे यदपेक्षं चक्षुस्तदभावग्रहेऽपि तदपेक्षत इति न्यायेनालोकग्रहे आलोकापेक्षाया अभावेन तदभावग्रहेऽपि तदपेक्षाया अभावात् । न चाधिकरणग्रहणावश्यम्भावः अभावप्रतीतावधिकरणग्रहणावश्यम्भावानङ्गीकारादपरथा निवृत्तः कोलाहल इति शब्दप्रध्वंसप्रत्यक्षो न स्यादिति अप्रमाणिकं तव वचनम् । परं तत्सर्वमभिसन्धाय भगवान् कणादः प्रणिनाय सूत्रं, द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तम इति प्रत्ययवेद्यत्वेनापि निरूपितम् ॥२५॥

इसलिये आलोकका अभावभी अन्धकार नहीं । क्योंकि, अभावमें भावधर्मका अध्यारोप करना दुःसाध्य है । दुःखके अभावमें सुखत्वका आरोप और संयोगके अभावमें विभागत्वाभिमानका आरोप दुर्घट है यह देखपडता है । घटादिके अभावकी नाई आलोकाभावके रूपवत् अभावत्व आलोकसापेक्ष चक्षुर्जनित ज्ञानका विषयीभूत नहीं होसकता, ऐसाभी नहीं

कहा जाता क्योंकि, चक्षु जिसके ग्रहणमें जिसकी अपेक्षा करता उसको अभावग्रहणसमयमेंभी उसीका अपेक्षा होती है इसप्रकार न्यायानुसार आलोकग्रहणकालमें अभावद्वारा उसके अभावग्रहणसमयमेंभी उसकी अपेक्षाका भी अभाव होता है और, अभाव प्रतीति समयमें अधिकरण ग्रहणकी अवश्यम्भाविता अनङ्गीकृत होजानेसे अधिकरण ग्रहणकी अवश्यम्भाविता भी नही । कोलाहल निवृत्त होनेपर, शब्दका एककालमें ध्वंस होजाता है, यह कभी प्रत्यक्ष नही होता । सुतरां, तुम्हारी बात प्रमाण सिद्ध नहीं । ये सब अभिसन्धान करकेही भगवान् कणादने द्रव्य, गुण, कर्म्मे निष्पत्तिके साथ सादृश्य न रहनेसे, अन्धकार अभाव पदार्थ है, इसप्रकार प्रत्यय पर-वशातानुसारसे सूत्र प्रणयन किया है ॥२५॥

अभावस्तु निषेधमुखप्रमाणगम्यः सप्तमो निरूप्यते । स चासमवायत्वे सत्यसमवायः संक्षेपतो द्विविधः संसर्गाभावान्योन्याभावभेदात् । संसर्गाभावोऽपि त्रिविधः प्राक्प्रध्वंसात्यन्ताभावभेदात् । तत्रानित्यो अनादितमः प्रागभावः उत्पत्तिमान् । विनाशी प्रध्वंसः प्रतियोग्याश्रयोऽभावोऽत्यन्ताभावः अत्यन्ताभावव्यतिरिक्तत्वे सत्यनवधिरभावोऽन्योन्याभावः ॥ २६ ॥

निषेधमुख प्रमाणद्वारा जिसका बोध हो उसका नाम अभाव है, वह सप्तम कहकर निरूपित हुआ है । वह संक्षेपतः दो प्रकारका है संसर्गाभाव और अन्योन्याभाव उनमें, अनित्य और अनित्यतम अभाव प्रागभाव, उत्पत्तिमान् विनाशी प्रध्वंसाभाव एवं प्रतियोग्याश्रय अभाव अत्यन्ताभाव । अत्यन्ताभावसे व्यतिरिक्तता घटनेपर, अनवधि अभावको अन्योन्याभाव कहते हैं ॥ २६ ॥

नन्वन्योन्याभाव एवात्यंताभाव इति चेत् अहो राजमार्ग एव भ्रमः । अन्योन्याभावो हि तादात्म्यप्रतियोगिकः प्रतिषेधः यथा घटः पटात्मा न भवतीति संसर्गप्रतियोगिकः प्रतिषेधोऽत्यन्ताभावः यथा वायौ रूपसम्बन्धो नास्तीति । न चास्य पुरुषार्थौपयिकत्वं नास्तीत्याशङ्कनीयं दुःखात्यन्तोच्छेदापरपर्य्यायनिःश्रेयसरूपत्वेन परमपुरुषार्थत्वात् ॥ २७ ॥

इति सर्वदर्शनसंग्रहे औलूक्यदर्शनं समाप्तम् ॥ १० ॥

अन्योन्याभावकोही अत्यन्ताभाव क्यों नही कहा जावे ? अरो राजमार्गहीमें भ्रम ? अन्योन्याभावका नाम तादात्म्यप्रतियोगिक प्रतिषेध है । जिसप्रकार, घट, पटात्मा नहीं, इत्यादि ।

जो संसर्गप्रतियोगिक प्रतिषेध, उसका नाम अत्यन्ताभाव है । जिसप्रकार वायुमें रूप सम्बन्ध नहीं, इसकी पुरुषार्थ उपयोगिता नहीं, इसप्रकार आशङ्का नहीं किई जासकती । क्योंकि, जिसका दूसरा नाम दुःखका अत्यन्त उच्छेद है, वही निःश्रेयसरूपत्ववशात् यह परम पुरुषार्थस्वरूप है ॥ २७ ॥

इति सर्वदर्शनसंग्रहमें औलूक्यदर्शन समाप्त हुआ ॥ १० ॥

अथाक्षपाददर्शनम् ॥ ११ ॥

तत्त्वज्ञानाद्दुःखात्यन्तोच्छेदलक्षणं निःश्रेयसम्भवतीति समानतन्त्रेऽपि प्रतिपादितं तदाह सूत्रकारः प्रमाणप्रमेयेत्यादितत्त्वज्ञानान्निःश्रेयसाधिगम इति । इदं न्यायशास्त्रस्यादिमं सूत्रं न्यायशास्त्रञ्च पञ्चाध्यायात्मकं, तत्र प्रत्यध्यायस्याह्निकद्वयम् । तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गोतमेन प्रमाणादिपदार्थनवकलक्षणनिरूपणं विधाय द्वितीये वादादिसप्तपदार्थलक्षणनिरूपणं कृतम् । द्वितीयस्य प्रथमे संशयपरीक्षणं प्रमाणचतुष्टयाप्रामाण्यशङ्कानिराकरणञ्च । द्वितीये अर्थापत्त्यादेरन्तर्भावनिरूपणम् । तृतीयस्य प्रथमे आत्मशरीरेन्द्रियार्थपरीक्षणं, द्वितीये बुद्धिमनःपरीक्षणम् । चतुर्थस्य प्रथमे प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गपरीक्षणं, द्वितीये दोषनिमित्तकत्वनिरूपणं अवयव्यादिनिरूपणञ्च । पञ्चमस्य प्रथमे जातिभेदनिरूपणं, द्वितीये निग्रहस्थानभेदनिरूपणम् ॥ १ ॥

तत्त्वज्ञानसे दुःखका अत्यन्त उच्छेदरूप निःश्रेयस होता है, यह सामान्यशास्त्रमें कहा गया है । सूत्रकारने भी यही कहा है । जैसे, प्रमाण प्रमेय इत्यादि एवं तत्त्वज्ञानसे निःश्रेयस (मोक्ष) की प्राप्ति होती है, इत्यादि । यही न्यायशास्त्रका पहिलासूत्र है । न्यायशास्त्र पांच अध्यायोंमें विभक्त है, उनमें प्रत्येक अध्यायमें दो २ आह्निक हैं । इन सबमें पहिले अध्यायके प्रथम आह्निकमें भगवान् गौतमने प्रमाणादि पदार्थके नव लक्षण निरूपणकर

द्वितीय अध्यायमें वादादि सात पदार्थोंका लक्षण निरूपण किया है। पहिलेमें संशय परीक्षा एवं प्रमाणचतुष्टयका अप्रमाण्य शङ्कानिराकरण, द्वितीयमें अर्थापत्त्यादिका अन्तर्भाव निरूपण, तृतीय अध्यायके पहिलेमें आत्मा, शरीर और इन्द्रियार्थकी परीक्षा और द्वितीय आह्निकमें बुद्धि और मनकी परीक्षा- चतुर्थअध्यायके पहिले आह्निकमें प्रवृत्तिदोष प्रेत्यभाव-फल दुःख और अपवर्गपरीक्षा और द्वितीयमें दोष निमित्तकत्व निरूपण और अवयविप्रभृतिका निर्धारण एवं पञ्चम अध्यायके प्रथम आह्निकमें जातिभेदनिरूपण और द्वितीयमें निग्रह स्थानभेदनिरूपण किया है ॥ १ ॥

मानाधीना मेयसिद्धिरिति न्यायेन प्रमाणस्य प्रथममुद्देशे तद-नुसारेण लक्षणस्य कथनीयतया प्रथमोद्दिष्टस्य प्रमाणस्य-प्रथमं लक्षणं कथ्यते ॥ २ ॥

मेयसिद्धिमानके अधीन है, इत्यादिन्यायानुसार प्रथमही प्रमाणका उद्देश होनेसे, तदनुसार लक्षण कथनीय है। यह जानकर प्रथमोद्दिष्ट प्रमाणका पहिले लक्षण कहा जाता है ॥ २ ॥

साधनाश्रयाव्यतिरिक्तत्वे सति प्रमाव्याप्तं प्रमाणम् । एवञ्च प्रति-तन्त्रसिद्धान्तसिद्धपरमेश्वरप्रामाण्यं संगृहीतं भवति । यदक-थयत् सूत्रकारः मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रा-माण्यादिति ॥ ३ ॥

साधनाश्रयका व्यतिरिक्तत्व घटनेसे, प्रमाण प्रमेय प्राप्त होता है । इसप्रकार प्रतितन्त्र-सिद्धान्तद्वारा सिद्धपरमेश्वर प्रामाण्य संगृहीत होता है। सूत्रकारनेभी कहा है शास्त्र और आयुर्वेदप्रामाण्यकी नाईं, आप्त प्रामाण्यसे तदीयप्रामाण्य सिद्ध होता है ॥ ३ ॥

तथाच न्यायपारावारपारदृश्वा विश्वविख्यातकीर्तिरुदयनाचा-र्योऽपि कुसुमाञ्जलौ चतुर्थ स्तबके-

मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते इति ॥ ४ ॥

न्यायपारावारदर्शी विश्वविख्यातकीर्त्ति उदयनाचार्य्यने भी कुसुमाञ्जलिके चतुर्थ स्तवकमें कहा है, मिति शब्दसे सम्यक्प्रकार परिच्छेद, प्रमातृ शब्दसे तद्वत्ता एवं प्रामाण्य शब्दसे तदयोग व्यवच्छेद । यही गौतमका मत है ॥ ४ ॥

साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः ।

लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिव इति च५॥

जो सबका प्रत्यक्ष, जिसका क्षय नहीं, जो स्वयं सिद्ध, तादृश यथार्थ अनुभवसे जिनने निखिल प्रस्तावि वस्तुक्रम सन्निविष्ट किया है, जिसमें लेशादृष्टि निबन्धन दोषका अपगम प्रयुक्त शङ्कारूप तुषका भ्रंश हुआ है। वही शिव मेरा प्रमाण। सन्देहके आविर्भावरूप कलङ्कयुक्त अन्यदेवतासे मुझे प्रयोजन नहीं ॥ ५ ॥

तच्चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात्। प्रमेयं द्वादशप्रकारं आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदात् ॥ ६ ॥

प्रमाण ४ प्रकारका है। जैसे, प्रत्यक्ष, अनुमान, उपमान और शब्द। प्रमेय १२ प्रकारका है। जैसे, आत्मा, शरीर, इन्द्रिय, विषय, बुद्धि, मन, प्रवृत्ति, दोष, प्रेत्यभावफल, दुःख और अपवर्ग है ॥ ६ ॥

अनवधारणात्मकं ज्ञानं संशयः स त्रिविधः साधारणधर्मासाधारणधर्मविप्रतिपत्तिलक्षणभेदात् ॥ ७ ॥

अनवधारणात्मक ज्ञानका नाम संशय है। वह तीन प्रकारका है। जैसे, साधारणधर्म्म असाधारणधर्म्म और विप्रतिपत्ति ॥ ७ ॥

यमधिकृत्य प्रवर्त्तन्ते पुरुषास्तत्प्रयोजनम्। तद्द्विधं दृष्टादृष्टभेदात् ॥ ८ ॥

लोग जिसका अधिकारकर, प्रवृत्त होते हैं उसका नाम प्रयोजन है। वह दो प्रकारका है। जैसे, दृष्ट और अदृष्ट ॥ ८ ॥

व्याप्तिसंवेदनभूमिर्दृष्टान्तः। स द्विविधः साधर्म्यवैधर्म्यभेदात्॥९॥

व्याप्ति संवेदन भूमिका नाम दृष्टान्त है वह दो प्रकारका है, साधर्म्य और वैधर्म्य॥९॥

प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः। स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमभेदात् ॥ १० ॥

जो विषय प्रामाणिक कहकर स्वीकार किया जावे उसका नाम सिद्धान्त है। वह चार प्रकारका। सर्व्वतन्त्र, प्रतितन्त्र, अधिकरण और अभ्युपगम ॥ १० ॥

परार्थानुमानवाक्यैकदेशोऽवयवः। स पञ्चविधः प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदात् ॥ ११ ॥

परार्थानुमान वाक्यके एकदेशको अवयव कहते हैं। वह पांच प्रकारका है । जैसे प्रतिज्ञा, हेतु, उदाहरण, उपनय और निगम ॥ ११ ॥

व्याप्यारोपे व्यापकारोपस्तर्कः। स चैकादशविधः व्याघातात्माश्रयेतरेतराश्रयचक्रकाश्रयानवस्थाप्रतिबन्धिकल्पनालाघवकल्पनागौरवोत्सर्गापवादवैजात्यभेदात् ॥ १२ ॥

व्याप्यारोपमें व्यापकारोपका नाम तर्क है। वह ११ प्रकारका है। जैसे, व्याघात आत्माश्रय, इतरेतराश्रय, चक्रकाश्रय, अनवस्था, प्रतिबन्धि कल्पना, लाघव कल्पना, गौरव उत्सर्ग, अपवाद और वैजात्य ॥ १२ ॥

यथार्थानुभवपर्य्याया प्रमितिर्निर्णयः। स चतुर्विधः साक्षात्कृत्यनुमित्युपमितिशाब्दभेदात् ॥ १३ ॥

यथार्थानुभवनाम्नी प्रमितिका नाम निर्णय है । वह ४ प्रकारका है, साक्षात्कृति, अनुमिति, उपमिति और शाब्द ॥ १३ ॥

तत्त्वनिर्णयफलः कथाविशेषो वादः ॥ १४ ॥

जिसमें तत्त्वनिर्णयरूप फल है, ऐसी कथा विशेषका नाम वाद है ॥ १४ ॥

उभयसाधनवती विजिगीषुकथा जल्पः ॥ १५ ॥

उभय साधनवती विजिगीषुका नाम जल्प है ॥ १५ ॥

स्वपक्षस्थापनाहीनः कथाविशेषो वितण्डा ॥ १६ ॥

स्वपक्षस्थापनाहीन कथाविशेषका नाम वितण्डा है ॥ १६ ॥

कथा नाम वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः ॥ १७ ॥

वादी और प्रतिवादी इन दोनोंके पक्ष प्रतिपक्ष परिग्रहका नाम कथा है ॥ १७ ॥

असाधको हेतुत्वेनाभिमतो हेत्वाभासः। स पञ्चविधः सव्यभिचारविरुद्धप्रकरणसमातीतकालभेदात् ॥ १८ ॥

जो असाधक और हेतु कहकर अभिमत उसका नाम हेत्वाभास है। वह पांच प्रकारका है। जैसे सव्यभिचार, विरुद्ध, प्रकरण, समसाध्य और समातीतकाल ॥ १८ ॥

शब्दावृत्तिव्यत्ययेन प्रतिषेधहेतुश्छलम्। तत्त्रिविधमभिधानतात्पर्य्योपचारव्यत्ययवृत्तिभेदात ॥ १९ ॥

शब्दवृत्तिके व्यत्ययद्वारा प्रतिषेधहेतुका नाम छल है। वह तीन प्रकारका है। जैसे-अभिधानतात्पर्य, उपचार, व्यत्यय और वृत्ति ॥ १९ ॥

स्वव्याघातकमुत्तरं जातिः सा चतुर्विंशतिविधा साधर्म्यवैधर्म्यो-त्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्ता-नुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्तिविशेषापत्त्युपलब्ध्यनुपलब्धि-नित्यानित्यकार्य्यसमभेदात् ॥ २० ॥

स्वव्याघातक उत्तरका नाम जाति है । वह २४ प्रकारकी है । जैसे साधर्म्य, वैधर्म्य-उत्कर्ष, अपकर्ष, वर्ण्य, अवर्ण्य, विकल्प, साध्य, प्राप्ति, अप्राप्ति, प्रसङ्ग, प्रतिदृष्टान्त, अनुत्पत्ति, संशय, प्रकरण, हेत्वर्थापत्ति, विशेषोपपत्ति, उपलब्धि, अनुपलब्धि, नित्य, नित्यकार्य्य, सम ॥ २० ॥

पराजयनिमित्तं निग्रहस्थानम् । तद्द्वाविंशतिप्रकारं प्रतिज्ञाहा-निप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञासन्न्यासहेत्वन्तरार्थान्तर-निरर्थकाविज्ञातार्थापार्थकाप्राप्तकालन्यूनाधिकपुनरुक्तानुभाष-णाज्ञानाप्रतिभाविक्षेपमतानुज्ञापर्य्यनुयोज्योपेक्षणनिरनुयो-ज्यानुयोगापसिद्धान्तहेत्वाभासभेदात् ॥ २१ ॥

पराजयनिमित्तका नाम निग्रह स्थान है । वह २२ प्रकारका है । जैसे, प्रतिज्ञाहानि प्रतिज्ञान्तर, प्रतिज्ञाविरोध, प्रतिज्ञासंन्यास, हेत्वन्तर, अर्थान्तर, निरर्थक, अविज्ञातार्थ, अपार्थक अप्राप्तकालन्यूनाधिक, पुनरुक्त, अनुभाषण, अज्ञान, अप्रतिभा, विक्षेप, मतानुज्ञा, पर्यनुयोज्य, उपेक्षण, निरनुयोज्य, अनुयोग, अपसिद्धान्त और हेत्वाभास ॥ २१ ॥

अत्र सर्वान्तर्गणिकस्तु विशेपस्तत्र शास्त्रे विस्पष्टोऽपि विस्तर-भिया न प्रस्तूयते ॥ २२ ॥

इसप्रकार उल्लिखित शास्त्रमें अतीवस्पष्टतया भिन्न २ आकारसे ये सब विषय वर्णित हुआ । विस्तारभयसे और उल्लेख नहीं किया गया ॥ २२ ॥

ननु प्रमाणादिपदार्थषोडशके प्रतिपाद्यमाने कथमिदं न्यायशास्त्र मिति व्यपदिश्यते सत्यं तथाप्यसाधारण्येन व्यपदेशा भवन्तीति न्यायेन न्यायस्य परार्थानुमानापरपर्य्यायस्य सकलविद्या-नुग्राहकतया सर्वकर्मानुष्ठानसाधनतया प्रधानत्वेन तथा व्यप-देशो युज्यते ॥ २३ ॥

प्रमाणादि १६ पदार्थ प्रतिपादित होनानेसे, इसका नाम किसप्रकार न्यायशास्त्र होसकता ? यह बात सत्यनोहै । तथापि असाधारण्य अनुसारही व्यपदेश होताहै । इसयुक्तिमें परार्थानुमान

जिसका अन्यतर नाम वही न्यायशास्त्र है, सब विद्याओंका अनुग्राहक और सर्वविध कर्म्मा-नुष्ठानका साधक कहकर सबमें प्रधान है । सुतरां इसप्रकार व्यपदेश सङ्गत होता है ॥ २३॥

तथाभाणि सर्वज्ञेन, सोऽयं परमो न्यायः विप्रतिपन्नपुरुषप्रतिपादकत्वात् तथा प्रवृत्तिहेतुत्वाच्चेति ॥ २४ ॥

सर्व्वज्ञनेभी कहा है, विप्रतिपन्नपुरुषका प्रतिपादक और प्रवृत्तिके हेतु कहकर वह २ न्याय शास्त्र सबमें श्रेष्ठ है ॥ २४ ॥

पक्षिलस्वामिना च सेयमान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैः प्रविभज्यमाना—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां विद्योद्देशे परीक्षितेति ॥ २५ ॥

पक्षिलस्वामीनेभी कहा है कि यह आन्वीक्षिकी विद्या प्रमाणादि पदार्थ परम्परासे प्रविभक्त होनेसे, सब विद्याओंका प्रदीपस्वरूप सबकर्म्मोंका साधकस्वरूप और सबधर्म्मका आश्रय-स्वरूप है ॥ २५ ॥

ननु तत्त्वज्ञानान्निःश्रेयसम्भवतीत्युक्तं तत्र किं तत्त्वज्ञानादनन्तरमेव निःश्रेयसं सम्पद्यते नेत्युच्यते किन्तु तत्त्वज्ञानाद्दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभाव इति ॥ २६ ॥

तत्त्वज्ञानसे निःश्रेयस प्राप्ति होती है । इसविषयमें जिज्ञास्य यह है जो, तत्त्वज्ञानके अव्यवहित परेही प्राप्त होजाता या नही ? इसका उत्तर यह है जो, तत्त्वज्ञानका उदय होनेसे दुःखजन्मप्रभृतिदोष मिथ्याज्ञान इनसबका उत्तरोत्तर विनाश होता है । सुतरां,तत्त्वज्ञानके परेही कहा नही जाता ॥ २६ ॥

तत्र मिथ्याज्ञानं नामानात्मनि देहादावात्मबुद्धिः तदनुकूलेषु रागः तत्प्रतिकूलेषु द्वेषः वस्तुतस्त्वात्मनः प्रतिकूलमनुकूलं वा न किञ्चित्समस्ति । परस्परानुबन्धत्वाच्च रागादीनां मूढो रज्यति रक्तो मुह्यति मूढः कुप्यति कुपितो मुह्यतीति । ततस्तैर्दोषैः प्रेरितः प्राणी प्रतिषिद्धानि शरीरेण हिंसास्तेयादीन्याचरति वाचा अनृतादीनि मनसा परद्रोहादीनि सेयं पापरूपा प्रवृत्तिरधर्मसाधनीति ॥ २७॥

उनमें मिथ्याज्ञानशब्दसे अनात्म देहादिमें आत्मबुद्धि उसकी अनुकूल विषयमें आसक्ति और प्रतिकूल वस्तुमें द्वेष। वस्तुतः आत्माका प्रातिकूल और अनुकूल कुछभी नहीं। परस्पर अनुबन्धवशात् मूढ़लोकमें रागादिमें आसक्ति होतीहै। रागादियुक्त होनेसे, मोहका वश होता है मोहके वश होनेहीसे कुपित होता है एवं कुपित होनेहीसे मोहमें आच्छन्न होताहै। अनन्तर प्राणिगण उस २ दोषकी प्रेरणापरतन्त्र होकर शरीरद्वारा हिंसा और चौर्यादिप्रतिषिद्ध व्यापारका अनुष्ठान करता है वाक्यद्वारा अनृतप्रभृति और मनद्वारा परद्रोहादि निषिद्धकार्य्यमें प्रवृत्त होता है। इसप्रकार यह पापरूपा प्रवृत्ति अधर्म्मको उत्पन्न करती है ॥ २७ ॥

शरीरेण प्रशस्तानि दानपरपरित्राणादीनि वाचा हितसत्यादीनि मनसा अहिंसादीनि सेयं पुण्यरूपा प्रवृत्तिधर्मः ॥ २८ ॥

शरीरद्वारा दान और पररक्षणादि वाक्यद्वारा हित सत्यादि और मनद्वारा अहिंसादिका अनुष्ठान करनेको पुण्यरूपा प्रवृत्ति कहते हैं यही धर्म्म नामसे कथित ॥ २८ ॥

सेयमुभयी वृत्तिः ततः स्वानुरूपं प्रशस्तं निन्दितं वा जन्म पुनः शरीरादेः प्रादुर्भावः। तस्मिन् सति प्रतिकूलवेदनीयतया वासनात्मकं दुःखं भवति। त इमे मिथ्याज्ञानादयो दुःखान्ता अविच्छेदेन प्रवर्त्तमानाः। संसारशब्दार्थो घटीचक्रवन्निरवधिरनुवर्त्तते ॥ २९ ॥

इसप्रकारमें दोषप्रकारकी प्रवृत्ति है। इसीसे स्वानुरूप प्रशस्त या निन्दित जन्म और पुनःशरीरादिका प्रादुर्भाव होता है इसप्रकार प्रादुर्भावघटनेपर प्रतिकूलशब्दसे कहा हुआ वासनात्मक दुःख समुत्पन्न होता है। मिथ्याज्ञानसे दुःखपर्य्यन्त, वही धर्मसमुदाय अविच्छेदसे ँम। एवं संसारशब्दार्थ घटीचक्रकी नाईं निरवधि उनका अनुगामी होता है ॥ २९ ॥

कश्चित् पुरुषधौरेयः पुराकृतसुकृतपरिपाकवशादाचार्य्योपदेशेन सर्वमिदं दुःखायतनं दुःखानुषक्तञ्च पश्यति तदा तत्सर्वं हेयत्वेन बुध्यते। ततस्तन्निवर्त्तकमविद्यादि निवर्त्तयितुमिच्छति, तन्निवर्त्तनोपायश्च तत्त्वज्ञानमिति ॥ ३० ॥

कस्यचिच्चतसृभिर्विद्याभिर्विभक्तं प्रमेयं भावयतः सम्यग्दर्शनपदवेदनीयतया तत्त्वज्ञानं जायते, तत्त्वज्ञानान्मिथ्याज्ञानमपैति मिथ्याज्ञानापाये दोषाः अपयान्ति, दोषापाये प्रवृत्तिरपैति-प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमत्यन्तं निवर्त्तते, सात्यन्तिकी निवृत्तिरपवर्गः । निवृत्तेरात्यन्तिकत्वं नाम निवर्त्यं सजातीयस्य पुनस्तत्रानुत्पाद इति ॥ २१ ॥

इसतत्त्वज्ञानका दूसरा नाम सम्यग् दर्शन है । विद्याचतुष्टयसे परिच्छिन्न प्रमेय भावना करते २ किस व्यक्तिका तत्वज्ञान उपस्थित होता है।तत्वज्ञानके उदयसे मिथ्याज्ञानका अपसारण होता है। मिथ्याज्ञानके अपसारणसे सब दोष दूर होते हैं दोषोंके दूर होनेपर प्रवृत्ति निराकृत होती है । प्रवृत्तिके नाश होनेपर जन्मका क्षय होता है । जन्मके क्षय होनेपर दुःखकी आत्यन्तिक निवृत्ति होती है । इसी आत्यन्तिक निवृत्तिका नाम अपवर्ग वा मोक्ष है । निवृत्तिका आत्यन्तिकत्व कहनेसे, यह समझना चाहिये कि, निवृत्त सजातीयका फिर उसमें उद्भव नहीं होता ॥ २१ ॥

तथाच पारमर्षं सूत्रं, दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति ॥ २२ ॥

सूत्रकारनेभी कहा है कि, दुःखजन्मप्रवृत्ति दोष मिथ्याज्ञान इनसबके उत्तरोत्तर नाश होनेपर तदनन्तर अभाववशात् मोक्ष लाभ होता है ॥ २२ ॥

ननु दुःखात्यन्तोच्छेदोपवर्ग इत्येतदद्यापि कफोणिगुडायितं वर्त्तते तत्कथं सिद्धवत्कृत्य व्यवह्रियत इति चेन्मैवं सर्वेषां मोक्षवादिनामपवर्गदशायामात्यन्तिकीदुःखनिवृत्तिरस्तीत्यस्यार्थस्य सर्वतन्त्रसिद्धान्तसिद्धतया घण्टापथत्वात् । नह्यप्रवृत्तस्य दुःखं प्रत्यापद्यते इति कश्चित् प्रपद्यते । तथा हि आत्मोच्छेदो मोक्ष इति माध्यमिकमते दुःखोच्छेदोऽस्तीत्येतावत्तावदविवादम् ॥ २३ ॥

[illegible] दुःखके अत्यन्तच्छेदका नाम अपवर्ग है यह विषय अद्यापि नितान्त प्रच्छन्न है । [illegible] इसको सिद्धवत् करके व्यवहार किया जावे ? ऐसा नहीं कहा जासकता [illegible] अपवर्ग दशामें [illegible] दुःखनिवृत्ति होती है । इसविषयमें

सबही शास्त्रमें सविशेष मीमांसाद्वारा प्रमाणित हुआ है । अप्रवृत्तका कभी दुःखप्रत्यापत्तिकी सम्भावना नहीं । माध्यमिक लोग कहते हैं, आत्माका उच्छेद मोक्ष है दुःखका उच्छेदही उसका अर्थ है यह सर्व्वथा विवादशून्य है ॥ ३३ ॥

अथ मन्येथाः शरीरादिवदात्मापि दुःखहेतुत्वादुच्छेद्य इति तन्न सङ्गच्छते विकल्पानुपपत्तेः ॥ ३४ ॥

शरीरादिकी नाईं आत्माभी दुःखका हेतु सुतरां उसका उच्छेद करना आवश्यक है। विकल्पकी अनुपपत्तिवशात् इसप्रकार समझना कदापि सङ्गत नहीं ॥ ३४ ॥

किमात्मा ज्ञानसन्तानो विवक्षितः तदतिरिक्तो वा। प्रथमे न विप्रतिपत्तिः । कः खल्वनुकूलमाचरति प्रतिकूलमाचरेत् । द्वितीये तस्य नित्यत्वे निवृत्तिरशक्यविधानैव । प्रवृत्त्यनुपपत्तिश्चाधिकं दूषणं, न खलु कश्चित् प्रेक्षावानात्मनस्तु कामाय सर्वं प्रियंभवतीति सर्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रयतते। सर्वो हि प्राणी मुक्त इति व्यवहराति ॥ ३५ ॥

यहां जिज्ञास्य यह है कि, यह आत्मा परम्परास्वरूप या उसके अतिरिक्त अन्य कोई पदार्थ ? ज्ञानपरम्परा कहनेसे किसी प्रकार विप्रतिपत्ति सम्भव नहीं । क्योंकि, कोई व्यक्ति अनुकूल आचरण करके प्रतिकूल आचरणमें प्रवृत्त होता है । उसके अतिरिक्त अन्य पदार्थ कहनेसे तदीय नित्यत्व वशतः निवृत्ति जिस प्रकार अशक्य नहीं, प्रवृत्तिकी भी उसी प्रकार अनुपपत्ति नहीं । आत्माकेही सुखके लिये सम्पूर्ण प्रिय होता है, इसकारण यह सर्व्वथा प्रियतम है। कौन प्रज्ञानवान् पुरुष तादृश आत्माके समुच्छेदसाधनमें यत्नवान् होता है सबही प्राणी मुक्त, इसप्रकार व्यवहार प्रचरित है ॥ ३५ ॥

ननु धर्मिनिवृत्तौ निर्मलज्ञानोदयो महोदय इति विज्ञानवादिवादे सामग्र्यभावः सामानाधिकरण्यानुपपत्तिश्च भावनाचतुष्टयं हि तस्य कारणमभीष्टम् । यच्च क्षणभङ्गपक्षे स्थिरैकाधारासम्भवात् लङ्घनाभ्यासादिवदनासादितप्रकर्षं न स्फुटमभिज्ञानमभिजनयितुं प्रभवति सोपप्लवस्य ज्ञानसन्तानस्य बद्धत्वे निरुपप्लवस्य च मुक्तत्वे यो बद्धः स एव मुक्त इति सामानाधिकरण्यं न सङ्गच्छते ॥ ३६ ॥

धर्म्मिके निवृत्त होनेपर निमल ज्ञानोदयरूप महोदय समाहित होता है । विज्ञानवादिगणका इस मतवादमे सामर्थ्यभाव और सामानाधिकरण्यकी अनुपपत्ति लक्षित होती है । भावना चतुष्टयही इसका कारण है । क्षणभङ्गपक्ष स्वीकार करनेपर स्थिरैकाधारके असम्भवप्रयुक्त लङ्घन और अभ्यासादिकी नाईं वह प्रकर्ष प्राप्त नहीं होता । उपप्लवयुक्तज्ञानसन्ततिही बद्ध एवं उससे भिन्नही मुक्त है । ऐसा होनेसे जो बद्ध, सो मुक्त इसप्रकार सामानाधिकरण्य नहीं होता ॥ २६ ॥

आवरणमुक्तिर्मुक्तिरिति जैनजनाभिमतोऽपि मार्गो न निर्गतो निरर्गलः । अङ्ग भवान् पृष्टो व्याचष्टां किमावरणं, धर्माधर्मभ्रान्तय इति चेत् इष्टमेव । अथ देहमेवावरणं तथाच तन्निवृत्तौ पञ्जरान्मुक्तस्य शुकस्येवात्मनः सततोर्ध्वगमनं मुक्तिरिति चेत्तदा वक्तव्यं किमयमात्मा मूर्त्तोऽमूर्त्तो वा । प्रथमे निरवयवः सावयवो वा । निरवयवत्वे निरवयवो मूर्त्तःपरमाणुरिति परमाणुलक्षणापत्त्या परमाणुधर्मवदात्मधर्माणामतीन्द्रियत्वं प्रसज्येत् ॥ २७ ॥

आवरणमुक्तिही मुक्ति जैन लोगोंके अभिमत यह मार्ग निर्गल नही । अच्छा आपहीको पूछता हूं आवरणशब्दका अर्थ क्या ? धर्म्माधर्मभ्रान्तिही आवरण । ऐसा होनेसे अनिष्टापत्ति नहीं किन्तु देह आवरण और उसकी निवृत्तिमें पञ्जरसे मुक्त शुककी नाई आत्माका सदैव ऊपरको जानेका नाम मुक्ति है यदि ऐसा होताहै तो जिज्ञास्य यह आत्मा मूर्त्त है या अमूर्त्त? मूर्त्त होनेसे निरवयव या सावयव ? निरवयव होनसे परमाणु निरवयव मूर्त्तपदार्थ । इसप्रकार परमाणु लक्षणापत्तिद्वारा परमाणुधर्म्मकी नाई आत्मधर्म्मका अतीन्द्रियत्व प्रसक्त होता है ॥ २७ ॥

सावयवत्वे यत्सावयवं तदनित्यमिति प्रतिबन्धबलेनानित्यत्वापत्तौ कृतप्रणाशाकृताभ्यागमौ निष्प्रतिबन्धौ प्रसरेताम् ॥ ३८ ॥

सावयव होनेसे जो सावयव वही अनित्य इत्यादि प्रतिबन्धबलसे अनित्यत्वकी उपपत्ति होती है । ऐसाहोनेसे कृतप्रणाश और कृताभ्यागम ये दो दोष निष्प्रतिबन्धरूपसे प्रसृत होता है ॥ २८ ॥

अमूर्त्तत्वे गमनमनुपपन्नमेव चलनात्मिकायाः क्रियायाः मूर्त्त प्रतिबन्धात् ॥ ३९ ॥

और अमूर्त्त होनेसे, गमन नही सिद्ध होता । क्योंकि, चलनात्मिका क्रियामें मूर्ति प्रतिबन्ध होती है ॥ २९ ॥

पारतन्त्र्यं बन्धः स्वातन्त्र्यं मोक्ष इति चार्वाकपक्षेऽपि स्वातन्त्र्यं दुःखनिवृत्तिश्चेदविवाद ऐश्वर्य्यं चेत्सातिशयतया सदृक्षतया च प्रेक्षावतां नाभिमतम् ॥ ४० ॥

परतन्त्रताही बन्ध और स्वतन्त्रताही मोक्ष है, इत्यादि चार्व्वाक पक्षमें यदि स्वतन्त्रताही दुःखनिवृत्ति होती है, तो इससे कोई आपत्ति नहीं । किन्तु ऐश्वर्य्य जाननेसे सातिशयता और सदृशता वशात् वह कभी विद्वानोंको अनुमोदनके योग्य नहीं होसकता ॥४०॥

प्रकृतिपुरुषान्यत्वख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं मुक्तिरिति साङ्ख्याख्यातेऽपि पक्षे दुःखोच्छेदोऽभ्युपेयते ॥४१॥

प्रकृति पुरुशन्यत्व वादसे, प्रकृतिके उपरम होनेसे पुरुषके स्वरूपमें अवस्थानको मुक्ति कहते हैं यह सांख्यसिद्धान्त होनेपरभी एक पक्षमे दुःखनाश प्राप्त होता है ॥ ४१ ॥

विवेकज्ञानं पुरुषाश्रयं प्रकृत्याश्रयं वेति एतावदवशिष्यते । तत्र पुरुषाश्रयमिति न श्लिष्यते पुरुपस्य कौटस्थात् स्थाननिरोधापातान्नापि प्रकृत्याश्रयः अचेतनत्वात्तस्याः ॥ ४२ ॥

विवेकज्ञान पुरुषके आश्रित, या प्रकृतिके आश्रित है ? ऐसे प्रश्नमें यही कहा जासकता पुरुषके आश्रित नहीं । क्योंकि, पुरुप कूटस्थ है और प्रकृति अचेतन । सुतरां, उसके आश्रित भी नही कहा जासकता ॥ ४२ ॥

किञ्च प्रकृतिः प्रवृत्तिस्वभावा निवृत्तिस्वभावा वा । आद्ये अनिर्मोक्षः स्वभावस्यानपायात् । द्वितीये सम्प्रति संसारोऽस्तमियात् ॥ ४३ ॥

प्रकृति प्रवृत्तिस्वभाववाली है या निवृत्तिस्वभाववाली ? प्रवृत्तिस्वभाववाली कहनेसे स्वभावके अनपाय वशात् मोक्ष लाभ नहीं होता निवृत्तिस्वभाववाली कहनेसे, संसार अस्तमित हो जाता है ॥ ४३ ॥

नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति । भट्टसर्वज्ञाद्यभिमतेऽपि दुःखनिवृत्तिरभिमतैव । परन्तु नित्यसुखं न प्रमाणपद्धतिमध्यास्ते ॥ ४४ ॥

भट्ट सर्वज्ञप्रभृतिने कहा है कि, नित्य, निरतिशय सुखाभिव्यक्ति ही मुक्ति । इसकाभी प्रकृत अर्थ दुःखनिवृत्ति । परन्तु, नित्यसुख प्रमाण पद्धतिका अतीत विषय है ॥ ४४ ॥

श्रुतिस्तत्र प्रमाणमिति चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा ग्रावप्लावेऽपि तथाभावप्रसङ्गात् ॥ ४५ ॥

श्रुति इसविषयका प्रमाण नहीं होसकती, जहां, योग्यानुपलब्धिका बाध घाटताहै, वहां श्रुतिका प्रवेशाधिकार नहीं । प्रवेशाधिकार होनेसे, जलके ऊपर पत्थरभी तैरसकता है कहा जावे ॥ ४५ ॥

ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः क्षीरं विहायारोचकग्रस्तस्य सौवीररुचिमनुभवतीति चेत्तदेतन्नाटकपक्षपतितं त्वद्वच इत्युपेक्ष्यते ॥ ४६ ॥

सुखाभिव्यक्ति मुक्ति, यह पक्ष छोड़कर दुःखनिवृत्तिही मुक्ति है इसप्रकार स्वीकार करना अरोचकग्रस्तका दुध छोड़कर सौवीर (बैर) के रुचिका अनुभव करना, ये दोनों बराबर है, तुम्हारी यह बात नाटक पक्षपतित; इसकारण उपेक्षा कियी गयी ॥ ४६ ॥

सुखस्य सातिशयतया प्रत्यक्षतया बहुप्रत्यनीकाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखाविनाभूतत्वेन विषानुषक्तमधुवत् दुःखपक्षनिक्षेपात् ॥ ४७ ॥

सुखकी जिसप्रकार अतिशयता और प्रत्यक्षता है, उसीप्रकार वह बहुत विघ्नोंसे विच्छिन्न और साधन प्रार्थनासे परिपीडित, और विना दुःखके वह नहीं मिलसकता, इस कारण विषलिप्त मधुके तुल्य, वह दुःखपक्षमें निक्षिप्त है ॥ ४७ ॥

नन्वेवमनुसन्धितस्सतोऽपरं प्रच्यवते इति न्यायेन दुःखवत् सुखमित्युच्छिद्यत इति अकाम्योऽयं पक्ष इति चेन्मैवं मंस्थाः । सुखसम्पादने दुःखसाधनबाहुल्यानुषङ्गनियमेन तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्त्तमानेन साम्यापातात् । तथाहि न्यायोपार्जितेषु विषयेषु कियन्तः सुखखद्योताः कियन्ति दुःखदुर्दिनानि अन्यायोपार्जितेषु तु यद्भविष्यति तन्मनसापि चिन्तयितुं न शक्यमित्येतत् स्वानुभवमप्रच्छादयन्तः सन्तो विदांकुर्वन्तु विदांवराः भवन्तः ॥ ४८ ॥

एक विषयमें अनुसन्धान करनेवालेको, दूसरा विषय प्रभ्रष्ट होजाता है, इसयुक्तिके अनुसार दुःखकी नाईं, सुखका उच्छेदन किया जावे; इत्यादि पक्षभी अकाम्य, इसप्रकार

नहीं समझना । सुख सम्पादन समयमें दुःखसाधनकी बहुलताका प्रसङ्ग घटता है । उक्त नियमानुसार तपेहुये लोहपिण्डमें स्वर्ण समझकर प्रवृत्त होनेपर, साम्यापात संघटित होता है । उसी प्रकार, न्यायोपार्जित विषयसमूहमें कितनी सुखस्फूर्त्ति और कितना दुःखदुर्दिन प्रादुर्भूत होता है, अन्यायोपार्जित विषयमें जो घटता है, सो मनमें भी चिन्ता नहीं कियी जासकती । आप स्वयं ज्ञान विज्ञान पारदर्शी, इस विषयमें अपने आप अनुसंधान करें ॥ ४८ ॥

तस्मात् परिशेषात् परमेश्वरानुग्रहवशाच्छ्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यम् ॥ ४९ ॥

इसकारण अन्तमें परमेश्वरके अनुग्रहवशात् श्रवणादि क्रमसे आत्मतत्त्वका साक्षात्कार संघटित होनेपर पुरुषप्रवरका आत्यन्तिकी दुःखनिवृत्तिरूप निःश्रेयस होता है, यह सर्वथा विवादशून्य है ॥ ४९ ॥

नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात्, नाप्यनुमानं तद्व्याप्तिलिङ्गाभावात्, नागमः विकल्पासहत्वात् ॥ ५० ॥

ईश्वर है, इसविषयमें प्रमाण क्या है, प्रत्यक्ष, अनुमान या आगम ? प्रत्यक्ष प्रमाण हो नहीं सकता । क्योंकि, वह रूपादिसे रहित है, सुतरां, इन्द्रियका अतीत है । अर्थात् इन्द्रियद्वारा ग्राह्य नहीं । अनुमान प्रमाण भी नहीं होसकता । क्योंकि, उसकी व्याप्ति लिङ्गका अभाव घटता है । विकल्पके असहत्ववशात् आगमभी प्रमाण कहकर ग्रहण नहीं होसकता ॥ ५० ॥

किं नित्योऽवगमयत्यनित्यो वा । आद्ये अपसिद्धान्तापातः । द्वितीये परस्पराश्रयापातः । उपमानादिकमशक्यशङ्कं नियतविषयत्वात् ॥ ५१ ॥

ईश्वर नित्यहै वा अनित्य ? नित्य होनेसे अपसिद्धान्तापातदोष आता है । अनित्य होनेसे परस्पराश्रयापात दोष आपतित होताहै । नियतविषयत्वकहकर उपमानादि, अशक्य शङ्का हो जाताहै अर्थात् ईश्वर चिरकालहीसे है । सुतरां सांसारिक किसी वस्तुके साथ उसीकी उपमा नहीं दी जासकती ॥ ५१ ॥

तस्मादीश्वरः शशविषाणायते इति चेत्तदेतन्न चतुरचेतसां चेतसि चमत्कारमाविष्करोति । विवादास्पदं नगसागरादिकं सकर्तृकं

कार्य्यत्वात् कुम्भवत् न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधनत्वात् ॥ ५२ ॥

तो ईश्वर, खरहेके सींगकी नाईं अलीक पदार्थ ठहरा । यह बात कहनेसे, चतुर चेतालोगोंके चित्तमें चमत्कार आविष्कार नहीं किया जाता । क्योंकि पर्व्वत और सागरादि विवादास्पद पदार्थ मात्र ही कुम्भकी नाईं, कार्य्यस्वरूप, सुतरां उनका कर्त्ताहै, मानना होगा । यह कदापि असिद्ध हेतु नहीं । क्योंकि, ये सब पदार्थ सावयव हैं । इसी कारण उनका सुखसाधनत्व लक्षित होताहै ॥ ५२ ॥

ननु किमिदं सावयवत्वम् अवयवसंयोगित्वं अवयवसमवायित्वं वा । नाद्यं गगनादौ व्यभिचारात् । न द्वितीयं तन्तुत्वादावनैकान्त्यात् । तस्मादनुपपन्नमिति चेन्मैवं वादीः । समवेतद्रव्यत्वं सावयवत्वमिति निरुक्तेर्वक्तुं शक्यत्वात् । अवान्तरमहत्त्वेन वा कार्य्यत्वानुमानस्य सुकरत्वात् नापि विरुद्धो हेतुः साध्यविपर्य्ययव्याप्तेरभावात् । नाप्यनैकान्तिकः पक्षादन्यत्र वृत्तेरदर्शनात् । नापि कालात्ययापदिष्टः बाधकानुपलम्भात् । नापि सत्प्रतिपक्षः प्रतिभटादर्शनात् ॥ ५३ ॥

यहां जिज्ञास्य यह है जो, सावयवत्व शब्दसे अवयवसंयोगित्व या अवयवसमवायित्व ? अवयवसंयोगित्व कहनेसे, आकाशादिमें व्यभिचार घटताहै । और अवयवसमवायित्व कहनेसे तन्तुप्रभृतिमें अनेकान्तत्व आपतित होताहै । इसलिये इसको अनुपपन्न नहीं कहसकते । समवेत द्रव्यत्व सावयत्व, ऐसे अर्थमें ऐसा कहा जासकता । और अवान्तर महत्त्ववशात् कार्य्यत्वानुमान सुकर होताहै । और विरुद्ध हेतुभी नहीं होसकता । क्योंकि, साध्य विपर्य्ययका अभाव नहीं और अनैकान्तिकभी नहीं होसकता । क्योंकि पक्षभिन्न अन्यविध वृत्ति नहीं दीख पड़ती । और, कालात्ययापादिष्टभी नहीं होसकता । क्योंकि, किसीप्रकार बाधकका उपलम्भ नहीं और सत्प्रतिपक्षभी नहीं होसकता । क्योंकि, किसी प्रकार, प्रतियोगी नहीं दीख पड़ता ॥ ५३ ॥

ननु नगादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत्परीक्षाक्षमर्मीक्ष्यते । न हि कठोरकण्ठीरवस्य कुरङ्गशावः प्रतिभटो भवति अजन्यत्वस्यैव समर्थतया शरीरविशेषणवैयर्थ्यात् ॥ ५४ ॥

शरीरकर्तृक अजन्य कहकर आकाशकी नाईं पर्वतादिका किसी प्रकार कर्त्ता नहीं । [illegible] नहीं कही जासकती । क्योंकि, यह विषय परीक्षा सह, कहकर नहीं दीखपड़ता ।

कुरङ्गशावका कभी कठोर कण्ठीरव प्रतियोगी नहीं होता । अजन्यत्वकी समर्थतावशात् शरीर विशेषण विफल होताहै ॥ ५४ ॥

तर्ह्यजन्यत्वमेव साधनमिति चेन्नासिद्धेः । नापि सोपाधिकत्व-शङ्काकलङ्कांकुरः सम्भवी अनुकूलतर्कसम्भवात् । यद्ययमक-र्तृकः स्यात् कार्य्यमपि न स्यादिह जगति नास्त्येव तत्कार्यं नाम यः कारकचक्रमवधीर्य्यात्मानमासादयेदित्येतदविवादम् ॥ ५५ ॥

तब अजन्यत्वही साधन । सोभी नहीं । क्योंकि उसमें सिद्धिका अभाव होताहै । और अनुकूल तर्कके सम्भववशात् सोपाधिक स्वरूप शङ्का कलङ्कांकुरकीभी सम्भावना नहीं । यदि यह कर्त्ता शून्य होता, तो कार्य्यभी नहीं होता । क्योंकि, इस जगतमें ऐसा कार्य्य नहीं है जो कारकचक्र परिहारकर स्वयंही सिद्ध होजावे, यह विषय सर्व्वथा विवादशून्य है ॥ ५५ ॥

तच्च सर्वं कर्तृविशेषोपहितमर्य्यादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम् ५६

अत एव समस्तही कर्तृविशेष कर्तृक उपहित हुआ है, उसी कर्तृविशेषका किसी प्रकार मर्य्यादा अर्थात् इयत्तादि नहीं । एवं वह अन्य किसी कारककाभी प्रयोजन नहीं स्वयंसिद्ध शक्तिसम्पन्न है । सुतरां, वह अन्यान्य कारक सबका प्रयोक्ता । एवं ज्ञान-चिकीर्षा और प्रयत्नका आधार ॥ ५६ ॥

एवञ्च कर्तृव्यावृत्तेस्तदुपहितसमस्तकारकव्यावृत्तावकारणककार्य्योत्पादप्रसङ्ग इति स्थूलः प्रमादः ॥ ५७ ॥

इसप्रकार कर्तृव्यावृत्तिवशतः उसकी उपहत सब कारक व्यावृत्ति जब सिद्ध हुई, तब विना कारण कार्य्य उत्पन्न होता है, ऐसा प्रसङ्ग करना स्थूल प्रमादभिन्न अन्य कुछ नहीं ॥ ५७ ॥

तथा निरटंकि शंकरकिंकरेण ।

अनुकूलेन तर्केण सनाथे सति साधने ।

साध्यव्यापकताभङ्गात पक्षे नोपाधिसम्भव इति ॥ ५८ ॥

शङ्करकिङ्करनेभी कहा है कि साधन अनुकूल तर्कसहित संमिलित होनेपर, साध्य व्यापकताका अभङ्गवशात, पक्षमें कभी उपाधिसम्भव नहीं होता ॥ ५८ ॥

यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कजातं जागर्त्तीति चेदीश्वरसिद्ध्यसिद्धिभ्यां व्याघातः ॥ ५९ ॥

यदि ईश्वर कर्त्ता हो तो वह शरीरी, इत्यादि प्रतिकूल तर्क सब जगजानेसे उसके सिद्ध्यसिद्धिमें व्याघात होता है ॥ ५९ ॥

तदुदितमुदयनेन ।

आगमादेः प्रमाणत्वे बाधनादनिषेधनम् ।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धतेति ॥ ६० ॥

उदयनाचार्य्यने भी कहा है कि, आगमादिका प्रमाणत्व सत्वमें बाधवशात् निषेधक सम्भावना नहीं ॥ ६० ॥

न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतत्वात् ॥ ६१ ॥

विशेष विरोधशङ्काभी नहीं कियी जासकती ज्ञातत्त्व और अज्ञातत्त्व विकल्पद्वारा वा पराहत होता है ॥ ६१ ॥

तदेतत्परमेश्वरस्य जगन्निर्माणे प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्येऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा । नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अत एव न द्वितीयः ॥ ६२ ॥

परमेश्वरको जगत्की सृष्टि करनेमें प्रवृत्त होनेका प्रयोजन क्या, स्वार्थ, नहीं परमार्थ संघटन ? स्वार्थ संघटन कहनेसे, यह पूछना है कि, इष्टप्राप्तिके लिये नहीं, अनिष्ट परिहारके निमित्त ? इष्टप्राप्तिके लिये नही कह सकते । क्योंकि, ईश्वर आप्तकाम है । उसके और क्या इष्ट ? सुतरां यह कभी सम्भव नहीं होसकता ॥ ६२ ॥

द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु पदार्थे प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत ॥ ६३ ॥

द्वितीय अर्थात् परार्थसंघटन कहनेसे, प्रवृत्तिकी अनुपपत्ति होती है । ६३ ॥

अथ करुणया प्रवृत्त्युपपत्तिरित्याचक्षीत कश्चित्तं प्रत्याचक्षीत तर्हि सर्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखशबलान् करुणाविरोधात् । स्वार्थमनपेक्ष्य परदुःखप्रहरणेच्छा हि कारुण्यम् । तस्मादीश्वरस्य जगत्सर्जनं न युज्यते ॥ ६४ ॥

यदि कोई कहे कि, करुणावशतः ही उत्पत्ति होती है । उसको पूछ सकते हो कि ऐसा होनेसे वह सब प्राणियोंको सुखी कर सृष्टि करते, दुःखयुक्त नहीं । क्योंकि, दुःखमिश्रि

करनेसे, करुणाका विरोध घटता है । स्वार्थकी उपेक्षाकर परदुःख दूर करनेकी इच्छा करनेका नाम करुणा है । अत एव ईश्वरकी जगत् सृष्टि संगत नहीं ॥ ६४ ॥

तदुक्तं भट्टाचार्य्यैः—

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते ।
जगच्चासृजतस्तस्य किं नाम न कृतं भवेदिति ॥ ६५ ॥

भट्टाचार्य्योंनेभी कहा है प्रयोजन न समझकर नितान्त मूढभी किसीकार्य्यमें प्रवृत्त नहीं होता । जगत्की सृष्टि करनेसे उसका क्या नहीं किया होता है ॥ ६५ ॥

नास्तिकशिरोमणे तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणया प्रवृत्तिरस्त्येव न च निसर्गतः सुखमयसर्गप्रसंगः सृज्यप्राणिकृतसुकृतदुष्कृतपरिपाकविशेषाद् वैषम्योपपत्तेः । न च स्वातन्त्र्यभंगः शङ्कनीयः स्वांगं स्वव्यवधायको न भवतीति न्यायेन प्रत्युत तन्निर्वाहात् एक एव रुद्रो न द्वितीयाय तस्थे इत्यादिरागमस्तत्र प्रमाणम् ॥ ६६ ॥

अयि नास्तिकशिरोमणे ! ईर्ष्याकषायित चक्षुर्द्वय बन्दकर चिन्ता कर देखो करुणावशतः ही ईश्वरकी जगत्सर्जनमें प्रवृत्ति है । सृज्यप्राणियोंका कृतसुकृत दुष्कृतका फल विशेषवशतः वैषम्यकी उपपत्ति घटती है, स्वभावतः सुखमय सृष्टिप्रसङ्ग सम्भव नहीं । इसमें ईश्वरकी स्वतन्त्रता भङ्गकी सम्भावना नहीं । स्वाङ्ग कभी स्वव्यवधायक नहीं हो सकता इसप्रकार युक्तिमें प्रत्युत उसमें स्वतन्त्रता ही की रक्षा होतीहै । रुद्र एकही द्वितीय नहीं इत्यादि आगम इसविषयका प्रमाण है ॥ ६६ ॥

यद्येवं तर्हि परस्पराश्रयबाधव्याधिं समाधत्स्वेति चेत् तस्यानुत्थानात् किमुत्पत्तौ परस्पराश्रयः शंक्यते ज्ञप्तौ वा नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः । नापि ज्ञप्तौ परमेश्वरस्य आगमाधीनज्ञप्तिकत्वेऽपि तस्यान्यतोऽवगमात् । नापि तदनित्यत्वज्ञप्तौ आगमाऽनित्यत्वस्य तीव्रादिधर्मोपेतत्वादिना सुगमत्वात् ॥ ६७ ॥

यदि इसप्रकार होता है तो परस्पराश्रय बाधव्याधिका समाधान करो । किन्तु उसकी सम्भावना नहीं । उत्पत्तिमें परस्पराश्रय शङ्का करते हो या ज्ञप्तिमें ? उत्पत्तिमें नहीं । क्योंकि आगमईश्वरके अधीन उत्पन्न होनेपरभी, वह नित्य, इसकारण उसकी उत्पत्ति सम्भव नहीं ।

ज्ञप्तिमेंभी परस्पराश्रयकी शङ्का नहीं कियी जासकती। क्योंकि, ईश्वरज्ञान आगमाधीन होनेपर भी, वह आगम व्यतीत अन्यप्रकारसेभी जानाजासकता है ॥ ६७ ॥

तस्मान्निर्वर्त्तकधर्मानुष्ठानवशादीश्वरप्रसादसिद्धावभिमतेष्टसिद्धिरिति सर्वमवदातम् ॥ ६७ ॥

इति सर्वदर्शनसंग्रहे अक्षपाददर्शनं समाप्तम् ॥ ११ ॥

अतएव निवर्त्तकधर्म्मानुष्ठानवशात् ईश्वर प्रसन्न होनेपर अभिमत इष्टसिद्धि संघटित होती है। यह सर्व्वथा विवादशून्य है ॥ ६८ ॥

इति सर्व्वदर्शनसंग्रहमें अक्षपाददर्शन समाप्त हुआ ॥ ११ ॥

अथ जैमिनीयदर्शनम् ॥ १२ ॥

ननु धर्मानुष्ठानवशादभिमतधर्मसिद्धिरिति जेगीयते भवता। तत्र धर्मः किं लक्षणकः किं प्रमाणक इति चेत् उच्यते श्रूयतामवधानेन। अस्य प्रश्नस्य प्रतिवचन प्राच्यां मीमांसायां प्रादर्शि जैमिनिना मुनिना ॥ १ ॥

तुमने जो कहा कि, धर्म्मानुवशतःही अभिमतधर्म्मसिद्धि होजाती है, उस धर्म्मका लक्षण क्या, या प्रमाणही क्या? अवधानपूर्वक सुनो, कहता हूं जैमिनिमुनिने मीमांसामें इसप्रश्नका प्रतिवचन अर्थात् उत्तर दिया है ॥ १ ॥

सा हि मीमांसा द्वादशलक्षणी। तत्र प्रथमेऽध्याये विध्यर्थवादमन्त्रस्मृतिनामधेयार्थकस्य शब्दराशेः प्रामाण्यम् ॥ २ ॥

वह पूर्व्वमीमांसा द्वादशलक्षणी। उसमें प्रथम अध्यायमें विधि, अर्थवाद, मन्त्रस्मृति, नामधेयार्थक शब्दराशिका प्रामाण्य स्थापित हुआ है ॥ २ ॥

द्वितीये कर्मभेदोपोद्घातप्रमाणापवादप्रयोगभेदरूपोऽर्थः ॥ ३ ॥

द्वितीयमें कर्म्मभेद, उपोद्घात, प्रमाण, अपवाद और प्रयोगभेदरूप अर्थनिरूपण किया है ॥ ३ ॥

तृतीये श्रुतिलिंगवाक्यादिविरोधप्रतिपत्तिकर्मानारभ्याधीतबहुप्रधानोपकारकप्रयाजादियाजमानाचिन्तनम् ॥ ४ ॥

तृतीयमें श्रुतिलिङ्ग वाक्यादिविरोधप्रतिपत्ति, कर्म्मअनारभ्य अधीत बहुप्रधानोपकारक प्रयाजादि याजमानचिन्तन विनिविष्ट हुआ है ॥ ४ ॥

चतुर्थे प्रधानप्रयोजकत्वाप्रधानप्रयोजकत्वजुहूपर्णतादिफलराजसूयगतजघन्याक्षद्यूतादिचिन्ता ॥ ५ ॥

चतुर्थमें प्रधानप्रयोजकत्व अप्रधानप्रयोजकत्व जुहूपर्णतादि फल राजसूयगतजघन्याङ्ग अक्षद्यूतादि आलोचना कियी है ॥ ५ ॥

पञ्चमे श्रुत्यादिक्रमतद्विशेषवृद्ध्यवर्द्धनप्राबल्यदौर्बल्यचिन्ता ॥६॥

पञ्चमम श्रुत्यादिक्रम तद्विशेषवृद्धि, अवर्द्धन प्राबल्य और दौर्बल्य चिन्तानिरूपित हुईहै ॥६॥

षष्ठे अधिकारितद्धर्मद्रव्यप्रतिनिध्यर्थलोपनप्रायश्चित्तसत्रदेयवह्निविचारः ॥ ७ ॥

छठामें अधिकारी उसका धर्म्मद्रव्यप्रतिनिध्यर्थ लोपका प्रायश्चित्त और सत्रदेय अग्निविचार संनिवेशित किया है ॥ ७ ॥

सप्तमे प्रत्यक्षावचनातिदेशेषु नामलिंगातिदेशविचारः ॥ ८ ॥

सप्तममें नाम लिङ्गातिदेश विचारित हुआ है ॥ ८ ॥

अष्टमे स्पष्टास्पष्टप्रबललिंगातिदेशापवादविचारः ॥ ९ ॥

अष्टममें स्पष्ट, अस्पष्ट और प्रबल लिङ्गातिदेशापवाद विचार किया है ॥ ९ ॥

नवमे ऊहविचारारम्भसामोहमन्त्रोहतत्प्रसंगागतविचारः॥ १० ॥

नवममें ऊह (तर्क) विचारका आरम्भ सामोह, मन्त्रोह और उसका प्रसङ्गगत विचार व्यवस्थित हुआ है ॥ १० ॥

दशमे बाधहेतुद्वारलोपविस्तारबाधकारणकार्य्यैकत्वग्रहादिसामप्रकीर्णनञर्थविचारः ॥ ११ ॥

दशममें बाधहेतुद्वार लोपविस्तार बाधका कारण और कार्य्यका एकत्व ग्रहादि सामप्रकीर्ण नञर्थविचार किया है ॥ ११ ॥

एकादशे तन्त्रोपोद्घाततन्त्रावापतन्त्रप्रपञ्चनावापप्रपञ्चनचिन्तनानि ॥ १२ ॥

ग्यारहवेंमें तन्त्रोपोद्घात तन्त्रावाप, तन्त्रप्रपञ्चन और अवापप्रपञ्चन आलोचित हुआहै ॥ १२ ॥

द्वादशे प्रसंगतन्त्रनिर्णयसमुच्चयविकल्पविचारः ॥ १३ ॥

बारहवेंमें प्रसङ्गतन्त्रका निर्णयसमुच्चय और विकल्पका विचार किया गयाहै ॥ १३ ॥

तत्राथातो धर्मजिज्ञासेति प्रथममधिकरणं पूर्वमीमांसारम्भोपपादनपरम् ॥ १४ ॥

उनमें "अथातो धर्म्मजिज्ञासा" इत्यादि वाक्यविन्यासपूर्वक, पूर्वमीमांसाका आरम्भ उपपादनार्थ प्रथम अधिकरण सन्निविष्ट हुआ है ॥ १४ ॥

अधिकरणञ्च पञ्चावयवमाचक्षते परीक्षकाः । ते च पञ्चावयवाः विषयसंशयपूर्वपक्षसिद्धान्तसङ्गतिरूपाः ॥ १५ ॥

परीक्षकोंने अधिकरणके पांच अवयव निर्देश किये हैं । जैसे--विषय, संशय, पूर्वपक्ष, सिद्धान्त और सङ्गति ॥ १५ ॥

तत्राचार्य्यमतानुसारेणाधिकरणं निरूप्यते । स्वाध्यायोऽध्येतव्य इत्येतद्वाक्यं विषयः ॥ १६ ॥

उनमें आचार्यके मतानुसार अधिकरण निरूपण किया गया है स्वाध्यायो अध्येतव्यः--अर्थात् वेदपाठ करना चाहिये, इस प्रकार वाक्यका नाम विषय है ॥ १६ ॥

चोदनालक्षणोऽर्थो धर्म इत्यारभ्यान्वाहार्य्ये च दर्शनादित्येतदन्तं जैमिनीयं धर्मशास्त्रमनारभ्यमारभ्यं वेति सन्देहः ॥ १७ ॥

चोदनालक्षण अर्थका नाम धर्म्म, इत्यादि वाक्य आरम्भकर अन्वाहार्य्ये च दर्शनात् इत्यादि पर्य्यन्त जैमिनिप्रणीत धर्म्मशास्त्र आरम्भ्य या अनारम्भ्य, इसका नाम संशय है॥ १७॥

अध्ययनविधेरदृष्टार्थ दृष्टार्थत्वाभ्यां तत्रानारभ्यमिति पूर्वःपक्षः । अध्ययनविधेरर्थावबोधलक्षकदृष्टफलकत्वानुपपत्तेरर्थावबोधार्थमध्ययनविधिरिति वदन् वादी प्रष्टव्यः किमत्यन्तमप्राप्तमध्ययनं विधीयते किंवा पाक्षिकमवघातवन्नियम्यत इति ॥ १८ ॥

उनमें अध्ययनविधिके अदृष्टार्थत्वद्वारा अनारभ्य ऐसा पूर्वपक्ष होता है । अध्ययन विधिका अर्थावबोधरूप दृष्टफलकत्व अनुपपन्न होजानेसे अर्थावबोधार्थ अध्ययन विधि, ऐसा वाक्यप्रयोगमें प्रवृत्त वादीसे यही जिज्ञास्य है कि, तुम्हारे मतमें अत्यन्त अप्राप्त अध्ययन विहित, या अवघातवत् पाक्षिक अध्ययन नियमित होता है ॥ १८ ॥

न तावदाद्यः विवादपदं वेदाध्ययनमर्थावबोधहेतुः अध्ययनत्वाद्भारताध्ययनवदित्यनुमानेन विध्यनपेक्षतया प्राप्तत्वात् ॥ १९ ॥

प्रथम अर्थात् अत्यन्त अप्राप्त अध्ययन नहीं कह सकते हो । क्योंकि, विवादास्पद वेदाध्ययन अर्थावबोधका हेतु, भारताध्ययनकी नाईं, अनुमानद्वारा इसमें किसी विधिकी अपेक्षा नहीं ॥ १९ ॥

अस्तु तर्हि द्वितीयः यथा नखविदलादिना तण्डुलनिष्पत्तिसम्भवात् अवघातनिष्पन्नैरेव तण्डुलैः पिष्टपुरोडाशादिकरणे अवान्तरापूर्वद्वारा दर्शपूर्णमासौ परमापूर्वमुत्पादयतः नापरथा अतः अपूर्वमवघातस्य नियमहेतुः प्रकृते लिखितपाठजन्येनाध्ययनजन्येन वार्थावबोधेन क्रत्वनुष्ठानसिद्धेरध्ययनस्य नियमहेतुर्नास्त्येव। तस्मादर्थावबोधहेतुविचारशास्त्रस्य वैधत्वं नास्तीति। तर्हि श्रूयमाणस्य विधेः का गतिरिति चेत् स्वर्गफलकोऽक्षरग्रहणमात्रविधिरिति भवान् परितुष्यतु विश्वजिन्न्यायेनाश्रुतस्यापि कल्पयितुं शक्यत्वात् यथा स स्वर्गः सर्वान् प्रत्यविशिष्टत्वादिति विश्वजित्यश्रुतमप्यधिकारिणं सम्पादयता तद्विशेषणं स्वर्गः फलं युक्त्या निरणायि तद्वदध्ययनेऽप्यस्तु ॥ २० ॥

अच्छा तो द्वितीय पक्षही स्वीकार किया जावे जैसे नखद्वारा विदलनादिकर, तण्डुल समुत्पादन सम्भव होता है। अवघात द्वारा समुत्पादित तण्डुल द्वाराही पिष्ट पुरोडाशादि करनेमें दर्शपूर्णमास उभय विधियज्ञ अवान्तर अदृष्टसाधनद्वारा परम अदृष्ट समुत्पादन करता है अन्य प्रकारसे नहीं। इसकारण अदृष्ट अववातका नियम हेतु। अध्ययनजनित अथवा अन्यप्रकार अर्थावबोध द्वारा यज्ञका अनुष्ठान सिद्ध होता है। सुतरां, अध्ययनका नियम हेतु नहीं, इसकारण, अर्थावबोध हेतु विचार शास्त्रका वैधत्व नहीं। तो श्रूयमाण विधिकी गति क्या होगी? इसका उत्तर यह है जो, अक्षरग्रहणमात्र विधिका स्वर्गही फल हो यह-जानकर, तुम परितुष्ट होओ। क्योंकि, विश्वजित्की नाई अश्रुत स्वर्गकीभी कल्पना यी जासकती है। जैसे वह स्वर्ग सबके प्रति अविशेषसे इत्यादि विधानसे विश्वजित्में ुत अधिकारीको भी सम्पादनकर युक्तिद्वारा तद्विशेषण स्वर्गफल निर्णय किया है, उस कार अध्ययनभी होवे ॥ २० ॥

तदुक्तम्—

विनापि विधिनादृष्टलाभान्न हि तदर्थता।
कल्पास्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवदिति ॥ २१ ॥

उसी प्रकार, कहा है, विधिके विनाभी अदृष्ट लाभ होनेसे, तदर्थता सम्पन्न नहीं होती, विश्वजित् प्रभृतिकी नाई, विधिसामर्थ्यवशतः स्वर्गकल्पना कियी जासकती है ॥ २१ ॥

एवञ्च सति वेदमधीत्य स्नायादिति स्मृतिरनुगृहीता भवति । अत्र हि वेदाध्ययनसमावर्त्तनयोरव्यवधानमवगम्यते ॥ २२ ॥

ऐसा होनेसे, वेद अध्ययनकर स्नान करना चाहिये, इत्यादि स्मृति अनुगृहीत होती है यहां, वेद अध्ययन और समावर्त्तन इन दोनोंका व्यवधान अवगत होताहै ॥ २२ ॥

तावके मते त्वधीतेऽपि वेदे धर्मविचाराय गुरुकुले वस्तव्यं तथा सत्यव्यवधानं बाध्येत । तस्माद्विचारशास्त्रस्य वैधत्वाभावात् पाठमात्रेण स्वर्गसिद्धेः समावर्तनशास्त्राच्च धर्मविचारशास्त्रमनारम्भणीयमिति पूर्वपक्षसंक्षेपः ॥ २३ ॥

तुम्हारे मतमें वेदअध्यन करनेपरभी, धर्म्मविचारके लिये गुरुकुलमें वास करना कर्त्तव्य है । ऐसा होनेसे, अव्यवधान बाधित होता है । इसकारण विचारशास्त्रका वैधत्वका अभाव घटनेसे, पाठमात्रसे स्वर्गसिद्धि सम्भव । इसलिये धर्म्मविचारशास्त्र अनारम्भणीय । यही पूर्व्व पक्षका संक्षेप है ॥ २३ ॥

सिद्धान्तस्त्वन्यतः प्राप्तत्वादप्राप्तविधित्वं मास्तु नियमविधित्वपक्षस्तु वज्रहस्तेनापि नापहस्तयितुं पार्य्यते ॥ २४ ॥

इसका सिद्धान्त यह है जो अन्यप्रकारसे प्राप्त होनेसे अप्राप्तविधित्व न हो स्वयं वज्रहस्तभी नियमविधित्व पक्ष अपहस्तित नहीं करसकते ॥ २४ ॥

तथाहि स्वाध्यायोध्येतव्य इति तव्यप्रत्ययः प्रेरणापरपर्य्यायां पुरुषप्रवृत्तिरूपार्थभावनाभाव्याममिधाभावनां प्रत्याययति । सा ह्यर्थभावनासहितमनुबद्धं भाव्यमाकाङ्क्षति न तावत्समानपदोपात्तमध्ययनभाव्यं परिरभते ॥ २५ ॥

इसीप्रकार स्वाध्याय अध्येतव्य । इसस्थानमें तव्यप्रत्यय द्वारा, जिसका अपर नाम प्रेरणा है, पुरुषका प्रवृत्तिरूप अर्थभावनाका भाव्य वही अभिधाभावनाकी प्रतीति उत्पन्न होती है । इसी अर्थभावनाद्वारा आनुषङ्गिक अनुभाव्य विषय आकांक्षित होता है । समानपदोंपात्त अध्ययनभाव्यकी आकांक्षा नहीं होती ॥ २५ ॥

अध्ययनशब्दार्थस्य स्वाधीनोच्चारणक्षमत्वस्य वाङ्मनसव्यापारस्य क्लेशार्थकस्य भाव्यत्वासम्भवात् । नापि समानवाक्योपात्तः स्वाध्यायः स्वाध्यायशब्दार्थस्य वर्णराशेर्नित्यत्वेन विभु-

त्वेन चोत्पत्त्यादीनां चतुर्णां क्रियाफलानामसम्भवात् । तस्मा-
त्सामर्थ्यप्राप्तोऽवबोधो भाव्यत्वेनावतिष्ठते ॥ २६ ॥

अध्ययन शब्दार्थका स्वाधीनोच्चारणक्षमतासे क्लेशार्थक वाङ्मनस व्यापारका भाव्यत्व सम्भव नहीं । और स्वाध्याय कभी समान वाक्योपात्त नहीं । क्योंकि, स्वध्यायशब्दार्थकी शब्द-राशि नित्य और विभुत्वविशिष्ट एवं उत्पत्ति प्रभृति चारप्रकारकी क्रियाफलका अतीत । सुतरां, सामर्थ्य प्राप्त अवबोध भावात्मरूपसे अवस्थिति करता है ॥ २६ ॥

अर्थीसमर्थो विद्वानधिक्रियत इति न्यायेन दर्शपूर्णमासादिवि-
षयावबोधमवेक्षमाणाः तत्त्वबोधे स्वाध्यायं विनियुञ्जते ॥ २७ ॥

अर्थी समर्थ विद्वान् अधिक्रियते इत्यादि न्यायानुसार दर्शपूर्णमासादि विषयावबोध अवेक्षाकर तत्त्वबोधविषयमें स्वाध्याय विनियोजित होताहै ॥ २७ ॥

अध्ययनविधिश्च लिखितपाठादिव्यावृत्त्या अध्ययनसंस्कृतत्वं
स्वाध्यायस्यावगमयति । तथा च यथा दर्शपूर्णमासादिजन्यं
परमापूर्वम् अवघातादिजन्यस्यावान्तरापूर्वस्य कल्पकं तथा
समस्तक्रतुजन्यमपूर्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यम-
पूर्वं कल्पयिष्यति नियमादृष्टानिष्टौ विधिश्रवणवैफल्यमापद्येत ।
न च विश्वजिन्न्यायेन फलकल्पनावकल्प्यते अर्थावबोधे
दृष्टे फले सति फलान्तरकल्पनायाः अयोगात् ॥ २८ ॥

पुनः अध्ययन विधि लिखितपाठादिकी व्यावृत्तिद्वारा स्वाध्यायका अध्ययन संस्कार सम- है । और उसी प्रकार, जैसे, दर्श पूर्णमासादि जनित परम अदृष्ट अवघातादि जनित . . अदृष्ट समुद्भावित करता है । उसीप्रकार सब क्रतुजनित अदृष्टजातक्रतुसाधन . . [illegible] उत्पादित अदृष्टकी उद्भावना करता है । नियमादृष्ट अनिष्ट विधिश्रवणका . प्राप्त होता है । विश्वजित न्यायानुसार फलकल्पना अवकल्पित नहीं होती । इसका कारण यह है जो अर्थावबोधरूप फल दृष्ट होनेपर, फलान्तर कल्पनाका संयोग अपगत होता है ॥ २८ ॥

तदुक्तम्—

लभ्यमाने फले दृष्टे नादृष्टफलकल्पना ।
विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यतीति ॥ २९ ॥

इसीप्रकार, कहा है लभ्यमान फल दृष्ट होनेपर, अदृष्ट फल कल्पनाका फिर प्रादुर्भाव नहीं होता । नियमार्थकतावशात् विधिका अनर्थकत्व सम्भव नहीं ॥ २९ ॥

